विमानार्चनाकल्पस्य समालोचनात्मकमध्ययनम्

डा. वेदान्तं श्रीविष्णुभट्टाचार्यः

कर्म निखिलं येन सूत्रितम् ।
समस्तवेदार्थविदे विखनसे नमः ।।

सम्पादकः

पण्डित वेदान्तं देशिकाचार्यः

8268

Sahitya Sl

विमानार्चनाकल्पस्य समालोचनात्मकमध्ययनम्

डा. वेदान्तं श्रीविष्णुभट्टाचार्यः

श्रौतस्मार्तादिकं कर्म निखिलं येन सूत्रितम्।
तस्मै समस्तवेदार्थविदे विखनसे नमः॥

RGCSLIB
08268

सम्पादकः
पण्डित वेदान्तं देशिकाचार्यः

विमानार्चनाकल्पस्य समालोचनात्मकमध्ययनम्

डा. वेदान्तं श्रीविष्णुभट्टाचार्यः

सम्पादकः

पण्डित वेदान्तं देशिकाचार्यः

प्रथममुद्रणम् - 2004

Copies : 1000

Price : Rs. 200/-

This Book is published with the financial assistance of Tirumala Tirupati Devasthanams under their Scheme "Aid to Publish Religious Books"

For Copies

Sri V. Desikacharyulu
Appikatla, Bapatla Mandal
Guntur Dt. Pin - 522 310
✆ : 08643-270224

Printed at

ANNAPURNA GRAPHICS
53/4, R.S. Gardens
TIRUPATI - 517 507 ✆ : 2235006

Pandita Vedantam Desikacharya
VAIKHANASAGAMA VIDWAN
Tirumala Tirupati Devasthanams
Appikatla, Bapatla Mandal
Guntur Dt. Andhra Pradesh

Ph. 08643-270224

सम्पादकीयम्

प्रविलसन्ति बहूनि शास्त्राण्यस्मिन् भारते वर्षे तत्त्ववैशद्याय संस्कारसंरक्षणाय ज्ञानसमुपार्जनाय इहपरसाधनाय च ।

यथा निगमः तथैव गुरुशिष्यपरंपरागतः वंशपरंपरागतो वा आगमोऽपि ।

वैखानसागमः भगवता विखनसोपदिष्टः भृगुमरीच्यत्रिकाश्यप-महर्षिप्रतिपादितश्च । ''आराधना'' रूपेयं कर्मज्ञानभक्तिरूपत्रिपथफलगामिनी अरण्यपर्वतपत्तनग्रामपल्यादिषु विश्वसाक्षिकतया आगमशास्त्ररूपेण जगज्जेगीयमानतां प्रसिद्धिमगमत् ।

अद्य श्री तिरुमलक्षेत्रे भगवत्प्रीतिपात्रं गर्भवैष्णवैः अनुष्ठीयमानं पादपद्माराधकैः परिचर्यमानमिदं च सौवर्णसुगन्धमलभत् ।

शास्त्रेऽस्मिन् सन्ति ग्रन्थाः बहवः । किन्तु मरीचिप्रोक्त आनन्दसंहितान्तर्गत विमानार्चनाकल्पः समग्रगद्यग्रन्थः परिपूर्णः क्रियाज्ञानयोगविषयत्रयपूजमार्गयुतः सर्वैरादृतश्च ।

एतत् ग्रन्थपरिशोधनलालसेन आयुष्मता ''श्रीविष्णुभट्टाचार्येण विमानार्चनाकल्पस्य समालोचनात्मकमध्ययनम्'' इति शोधप्रबन्धं सुबन्धयत् । श्रीवैखानसागमशास्त्रस्वरूपनिरूपणे विद्यमानेषु ग्रन्थेषु अयं परिपूर्णविवेचनात्मकः आगमज्ञानभाण्डागारः भवतु इति आशास्य, सप्ताचलनिवासरसिकस्य श्रीश्रीनिवासस्य निरवग्रहेणानुग्रहेण अयं श्रीविष्णुभट्टाचार्यः आयुरारोग्यभोगभाग्यसमृद्धः ग्रन्थरचनापटुश्च भूयात् इति भगवन्तं प्रार्थये ।

वैखानसे विमानार्चा
ज्ञानयोग क्रियान्विता ।
शोधिता विष्णुभट्टेन
भ्राजतात्प्रविराजतात् ॥

तारण-युगादिः — ***देशिकाचार्यः***

|| श्रीमते रामानुजाय नमः ||

आचार्यः का.इ. गोविन्दन्

आचार्यः एवं शैक्षिकसङ्कायप्रमुखः
राष्ट्रियसंस्कृतविद्यापीठम्
(मानितविश्वविद्यालयः)
तिरुपतिः, आं.प्र.

☎ : (O) 2287749
2287690 (317)
(R) 2231241

शुभाशंसनम्

भारतीयसंस्कृतेराधारभूतेषु अनेकेषु विषयेषु वेदोपबृंहणभूतागमोक्तालयादिरपि इति विदितमेव विपश्चिदपश्चिमानाम् । तत्रागमाः वैखानस-पाञ्चरात्र-शैवा इति त्रेधा विभक्ताः । तत्र 'पाञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्, इति बादरायणोक्तिबलात् समग्रमपि पाञ्चरात्रं भगवता श्रीमन्नारायणेनाभिहितमिति सिद्ध्यति । अत एव पाञ्चरात्रस्य भगवच्छास्त्रमिति व्यपदेशोऽपि संगच्छते । तादृशपाञ्चरात्रस्य प्रामाण्यविषये शङ्कायां समुत्थितायां भगवता बादरायणेन ब्रह्मसूत्रकृता द्वितीयाध्याय-द्वितीयपादे अन्तिमाधिकरणे प्रामाण्यं व्यवस्थापितम् ।

वैखानसागमस्य प्रवर्तकः श्रीमान् विखनोमुनिः । अस्यैव मुनेः अन्तेवासिनः भृगु-अत्रि-काश्यप-मरीचिमुनयः । तत्र भृगुप्रोक्ताः क्रियाधिकार, खिलाधिकार-वासाधिकार-यज्ञाधिकार-प्रकीर्णाधिकाराः, अत्रिप्रोक्तं समूर्तार्चनाधिकरणं, काश्यपप्रोक्तः ज्ञानकाण्डः, मरीचिविरचितः विमानार्चनाकल्पः इत्येते ग्रन्थाः वैखानसागमे उपलभ्यमानेषु अष्टपञ्चाशत् ग्रन्थेषु प्रधानाः । एतानाश्रित्यैव आलयादिनिर्माण-प्रतिष्ठा-पूजादयः प्रवर्तन्ते ।

तत्र 'कलौ वेङ्कटनायकः' इति प्रथिते आदिवराहक्षेत्रे भगवतः श्रीश्रीनिवासस्यार्चनादिकं सर्वं मरीचिप्रोक्तविमानार्चनकल्पप्रोक्तविधिना बहोः कालात् प्रवर्तते । ग्रन्थोऽयं त्रिभिः ज्ञान-योग-क्रियाभेदेन प्रकरणैः विभक्तः । पाञ्चरात्रादिषु चर्यानाम्ना सह चत्वारि प्रकरणानि भवन्ति । तत्र चर्यापादोक्तविषयाः सर्वेऽपि वैखानसागमग्रन्थेषु क्रियाभागे एवान्तर्भूताः ।

विमानार्चनाकल्पे ज्ञानभागे तत्त्वनिर्णयः, योगभागे ध्यानप्रकाराः क्रियाभागे च भगवदालयार्चन-बिम्बनिर्माण-प्रतिष्ठादयो विषयाः विस्तरेण निरूपिताः ।

तादृशस्यास्य ग्रन्थस्य विशिष्टं विमर्शनं विधाय 'विमानार्चनाकल्पस्य समालोचनात्मकमध्ययनम्' इति नाम्ना ग्रन्थं प्रणीय प्रकाशितवान् श्रीमान् श्रीविष्णुभट्टाचार्यः । चतुर्भिरध्यायैर्विभक्ते अस्मिन् अनुसन्धानग्रन्थे, आगमपरिचयः प्रथमे, द्वितीये विमानार्चनाकल्पस्य स्वरूपम्, तृतीये आलयनिर्माणात् प्रायश्चित्तपर्यन्तानामनेकेषां विषयाणां वैखानसागमग्रन्थान्तरैस्सह समालोचनं, चतुर्थे उपसंहारश्च इति विषयाः यथावत् विवेचिताः विदुषां हृदयङ्गमाश्च भवन्तीति तत्परम्परागतविद्वत्कुले जातजन्मा श्रीमान् श्रीविष्णुभट्टाचार्यः श्लाघामर्हति, इति च सहर्षं विनिवेदयामि ।

प्रीयतां भगवान् वासुदेवः ।

इत्थं

1-5-2004 सुधीजनविधेयः

तिरुपतिः *बालधन्वि गोविन्दाचार्यः*

Prof. K.V. Ramakrishnamacharyulu
Professor, Dept. of Vyakarana
Director, Distance Education
Co-ordinator, Ramayana Project
Special Officer, Sansk-Net Project
Rashtriya Sanskrit Vidyapeetha
(Deemed University)
Tirupati - 517 507 (A.P.)

☎ : (O) 2287745
2287649 (235)
(R) 2238185

आमुखम्

महानयं मे प्रमोदः श्रीविष्णुभट्टाचार्यप्रणीतस्य विमानार्चनाकल्पस्य समालोचनात्मकस्य प्रबन्धस्यामुखं विरचयतः।

वैष्णवं हि आगमद्वयं वैखानस-पाञ्चरात्रनामभ्यां प्रसिद्धम्। तत्रापि 'कलौ वेङ्कटनायक' इति प्रथितस्य कलियुगदैवस्य श्रीवेङ्कटेश्वरस्य समर्चायामुपयुज्यमानः विखनोमुनिना समनुगृहीतः, अत एव च वैखानसनाम्ना प्रथितः आगमः विष्णुपारम्यप्रतिपादक इति सर्वविदितम्। एष चागमः भृग्वत्रिकाश्यपमरीच्यादिमहर्षिभिः प्रचारपथमानीतस्सन् भारते लब्धप्रतिष्ठो राराजते।

समूर्तामूर्तभिदा द्विविधे भगवदर्चने समूर्तार्चनस्यैव प्रामुख्यमुपदिशन् आगमः, तत्रापि आलयार्चायाः एव महत्त्वं प्रतिपादयति। एवं प्रसिद्धस्यास्यागमस्य मरीचिप्रोक्तौ विमानार्चनाकल्प-आनन्दसंहिताख्यौ प्रधानभूतौ। तयोरन्यतरस्य विमानार्चनाकल्पस्य समालोचनं श्रीमता श्रीविष्णुभट्टाचार्येण सम्यग्विहितम्।

आन्ध्रप्रदेशे बहुषु विष्ण्वालयेषु अस्यैवागमस्य प्रचुरः प्रसारः दरीदृश्यते। विराजन्ते च महान्तः पण्डिताः अस्मिन् राज्ये। तत्र च प्रधानतया परिगण्यमानेषु 'वेदान्तम्', 'रोम्पिचर्ल' इति गृहनामभ्यां प्रसिद्धाः प्रथमगणनीया भवन्ति।

विशिष्य विद्यापीठेऽस्मिन् आगमकोशप्रक्रमे प्रथमं वैखानसागमग्रन्था एव विविधेभ्यः प्रान्तेभ्यः समाहृता आसन्। वैखानसागमकोशकार्यमेव च प्रथममारब्धम्। अत्र च मार्गदर्शनेन, मातृकाप्रदानेन, तथान्यविधसाहाय्येन च बहुधा विद्यापीठमिदमुपकृतवन्तः प्रातःस्मरणीयाः तिरुमलतिरुपतिदेवस्थानागमविद्वांसः रोंपिचर्ल पार्थसारथिभट्टाचार्याः। यैश्च बहवो वैखानसागमग्रन्थाः स्वयं सम्पाद्य प्रकाशिताः, स्वमार्गदर्शने अन्यैः प्राकाश्यं प्रापिताश्च सन्ति। एते च महान्तः आगमविषयविशेषान् आश्रित्य बहून् उपयुक्तान् लेखान् विलिख्य पण्डितलोकमुपकृतवन्तः। अन्ये च विद्वांसः न्यायवेदान्तादिषु शास्त्रेषु कृतभूरिपरिश्रमाः वैखानसशास्त्रनिष्णाताः तिरुमलतिरुपतिदेवस्थानास्थानविद्वांसः श्रीमन्तः वेदान्तं जगन्नाथाचार्याः। एते त्रिंशत्वर्षकालपर्यन्तं अखिलाण्डकोटिब्रह्माण्डनायकस्य श्रीश्रीनिवासस्य सेवाम् अकुर्वन्। एतेषां विद्वन्मणीनां प्रियपुत्राः एव वेदान्तं

देशिकाचार्याः। पितृपादानां मार्गदर्शने एव श्रीमन्तः वेदान्तं देशिकाचार्याः प्राचीनतालपत्रादीन् पर्यालोच्य वैखानसकल्पसूत्रं परिष्कृत्य प्राकाश्यं नीतवन्तः। एतेपि देशिकाचार्याः विद्वन्मणयः तिरुमल-तिरुपति-देवस्थानस्य आस्थानविद्वांसः आसन्। तादृशे साम्प्रदायिके वंशे जातः श्रीविष्णुभट्टाचार्यः बाल्यादेव स्वीये वैखानसे सम्प्रदाये सुशिक्षितः साम्प्रदायिकमेव स्वरूपं धारयन्, तत्रैव बहुपरिश्रमं करोतीति अभिनन्दनीयोऽयं विषयः।

अध्ययने चास्मिन् विमानार्चनाकल्पगताः विविधाः विषयाः ग्रन्थान्तरैः सह समालोचिताः, यत्र च बहवः उपयुक्तविषयाः पट्टिका (Table) रूपेण स्पष्टीकृताः। उदाहरणार्थम् - अर्चनाविधौ विष्ण्वादीनां स्थान-वाहन-बीजाक्षर-मूर्तिमन्त्राः महत्या पट्टिकया सम्यक् स्पष्टं यथा तथा निरूपिताः। तथैव नव-षट्-पञ्चमूर्तीनामर्चनाप्रकारः, मत्स्याद्यवतारस्थापनविधिः, अङ्कुरार्पणपदविभागः, पालिकादिस्थापनम् इत्येवं येषां पट्टिकाद्वारा प्रदर्शने स्पष्टता भवति, तेषां तथा सम्यक् स्पष्टीकरणमनेन विहितम्।

सोऽयं शोधप्रबन्धः शोधपद्धतिमनुल्लङ्घ्य सम्पादितः समेषां विदुषां मोदाय कल्पते इति नातिशयोक्तिः। यतो हि ग्रन्थकर्ता सम्प्रदाये निष्णातैः स्वपितृचरणैः पितामहैः श्रीजगन्नाथाचार्यैश्च आबाल्यात् शिक्षितः। आगमकोशनिर्माणपटुभिः पाञ्चरात्रागम सिन्धुमन्थनकलाकुशलैः अत एव लब्धयशोलक्ष्मिभिः शोधकलाकुशलैः मार्गदर्शनकलाचुञ्चुभिः आचार्यैः लक्ष्मीनरसिंहभट्टैः मार्गदर्शनेन अनुगृहीतः।

विशिष्य सन्दर्भेऽस्मिन् एतादृशशोधकार्यार्थं ग्रन्थकर्तारममुं प्रेरयन् प्रातःस्मरणीयाः परमपदवासिनः तदानीन्तनराष्ट्रियसंस्कृतविद्यापीठकुलपतयः पाञ्चरात्रागमविद्वन्मणयः बहुग्रन्थकर्तारः श्रीमन्तः आचार्याः एस्. बि. रघुनाथाचार्याः अवश्यं संस्मरणीयाः समर्चनीयाश्च नमस्सुमाञ्जलिभिः। येषां महतां प्रेरणा एतादृशानां ग्रन्थरत्नानामाविर्भावे निदानम् आसीत्।

अन्ते चेदमेवाशास्यं यदयं ग्रन्थकर्ता एतादृशैः ग्रन्थरत्नैः वैखानसागममलंकरोतु, तदर्थम् भगवान् श्रीनिवासः आयुरारोग्य-पुत्र-पौत्र-धन-कनक-वाहनादि सम्पत्तिभिः अमुमनुगृह्णातु इति।

इत्थं
बुधजनविधेयः
रामकृष्णमाचार्यः

6-5-2004
तिरुपतिः

प्रस्तावना

विदितमेवेदं विदुषां यन्निगमः आगमश्च भारतीयां संस्कृतिम् अभिव्यञ्जयन् मानवानाम् अभ्युन्नतये प्रवर्तत इति। निगमागमौ श्रेयः प्राप्त्युपाय भेदौ इत्यभ्युपगच्छन्ति विपश्चिदः।

निगमस्य विमर्शनं यथा पण्डितैः कृतं तथा न आगमस्य इति अतिरोहितं विदुषाम्। उपेक्षितप्रायस्य आगमसंज्ञकस्य वाङ्मयस्य परिचयम् उपकल्पयितुं संप्रति केचन विद्वांसः प्रवृत्ताः। तदनुरोधेन विरलप्रचारस्य वैखानसागमस्य परिचयमुपकल्प्य तदध्ययनादिषु जनान्प्रेरयितुं ममायं समुद्यमः।

वैखानसागमे यद्यपि नाम्ना अष्टपञ्चाशत् वैखानसग्रन्थाः उपलभ्यन्ते, तथापि इदानीम् अत्रिप्रोक्तं समूर्तार्चनाधिकरणं काश्यपप्रोक्तो ज्ञानकाण्डः भृगुप्रोक्ताः क्रियाधिकार- खिलाधिकार-वासाधिकार-यज्ञाधिकार - प्रकीर्णाधिकाराः मरीचि प्रोक्तो विमानार्चनाकल्पः इत्येवं अष्टसंख्याका एव मुद्रिताः। मुद्रितानां वैखानसागमग्रन्थानाम् अत्रि प्रोक्तंसमूर्तार्चनाधिकरणं काश्यप प्रोक्तो ज्ञानकाण्डः भृगु प्रोक्तौ क्रियाधिकार-खिलाधिकारौ इत्येते चत्वारः देवनागर्यां भृगु प्रोक्ताः प्रकीर्णाधिकार-यज्ञाधिकार-वासाधिकाराः आन्ध्र्यां मरीचिप्रोक्तो विमानार्चनाकल्पः देवनागर्याम् आन्ध्र्यां च लिप्याम् इत्येवं अष्टौ मुद्राप्य प्रकाशिताः। तद्यथा -

1. श्रीमद्भ्यां रघुनाथचक्रवर्तिभट्टाचार्य सेतुमाधवाचार्याभ्यां विमानार्चनाकल्पः क्रि.प. 1926 वर्षे,
2. वैखानसविद्यानिलयेन प्रकीर्णाधिकारः क्रि.प. 1929 वर्षे,
3. श्रीमद्भिः डि. रङ्गाचार्यमहोदयैः यज्ञाधिकारः क्रि.प. 1931 वर्षे,
4. श्रीमद्भ्यां व. रघुनाथचक्रवर्तिभट्टाचार्य मा. रामकृष्णकविभ्यां समूर्तार्चनाधिकरणं, क्रि.प. 1943 वर्षे,

5. श्रीवेङ्कटेश्वरमहापाठशालायां श्रीमद्भिः वैखानसशास्त्राध्यापकैः क्रियाधिकारः 1953 वर्षे,

6. श्रीमद्भिः रों. भ. पार्थसारथिभट्टाचार्यमहाभागैः ज्ञानकाण्ड-खिलाधिकरश्च वैखानसग्रन्थद्वयं यथाक्रमं क्रि.प. 1960, 1961 वर्षयोः,

7. श्रीमद्भिः च. भास्कररामकृष्णमाचार्य महोदयैः विमानार्चनाकल्पः क्रि.प. 1979 वर्षे,

8. श्रीमद्भिः डा. एस्. बि. रघुनाथाचार्यमहाभागैः क्रियाधिकारः क्रि.प. 1982 वर्षे,

9. श्रीमता तिरुमलतिरुपतिदेवस्थानेन क्री.प. 1999 वर्षे वासाधिकारः मुद्रापितः।

एतदतिरिक्ततया वैखानसागमे T. Goudrain संज्ञकेन पाश्चात्यविदुषा ज्ञानकाण्डस्य आंग्लभाषायामनुवादः क्रि.प. 1965 वर्षे कृतो उपलभ्यते।

वैखानसागममधिकृत्य कैश्चन भारतीयैः शोधलेखाः विरचिताः। ते च यथा-

1. श्रीमद्भिः आर्. पार्थसारथिअय्यङ्गार् महोदयैः "विखानस शब्द विमर्शः" इति Sri Venkateswara University Oriental Journal, Tirupati. मध्ये 1958 वर्षे,

2.3. श्रीमद्भिः डा. Vishwambhar Sharma Pathak महाभागैः The Vaikhanasa School in inscriptions of Northern India, इति, श्रीमद्भिः रो. पार्थसारथिभट्टाचार्य महोदयैश्च "श्रीवैखानसाराधनं वैदिकम्" इति च Sri Venkateswara University Oriental Journal, Tirupati. मध्ये 1959 वर्षे,

4. श्रीमद्भिः ना. श्रीदेवनाथाचार्यमहाभागैः "श्री वैखानसम्" इति पार्थसारथिभट्टाचार्याभिनन्दनसञ्चिका मध्ये 1967 वर्षे,

5. श्रीमद्भिः डा. राघवप्रसादचौधरी महाभागैः "वैखानस सम्प्रदायस्य प्राचीनत्वम्" इति विश्वसंस्कृते,

6. 7. श्रीमद्भिः डा. लक्ष्मीनरसिंहभट्टमहाभागैः "अर्चनाविवेकः" इति, श्रीमद्भिः डा. राघवप्रसादचौधरी महोदयैः "वैखानसागमसाहित्यस्य सूचीक्रमः" इति च विमर्शः मध्ये 1972 वर्षे,

8. श्रीमद्भिः डा. राघवप्रसादचौधरी महोदयैः "वैखानसागमपरिचयः" इति विश्वसंस्कृतं मध्ये 1972, 73 वर्षयोः,

9.10. श्रीमद्भिः डा. एस्. बि. रघुनांथाचार्यमहाभागैः "विष्वक्सेन विषये श्रीपाञ्चरात्र वैखानसयोर्मतभेदः" इति, श्रीमद्भिः डा. उ. शङ्करभट्टमहोदयैः "आगमीय बेरविवेकः" इति च Journal of the Ganganath Jha, Kendriya Sanskrit Vidyapeetham मध्ये 1973 वर्षे,

11. श्रीमद्भिः डा. एम्. डि. बालसुब्रह्मण्यं महाभागैः "Agamic Hinduism" इति Kawisekar felicitation volume मध्ये 1974 वर्षे,

12. श्रीमद्भिः डा. लक्ष्मीनरसिंहभट्ट महाभागैः "वैखानसागमः" इति संस्कृतविमर्शः मध्ये 1983 वर्षे,

13. श्रीमद्भिः डा.एन्. एस्. रामानुजताताचार्य महोदयैः "मूर्तिपूजावैखानसागमश्च" इति The Sanskrit Academy Diamond Jubilee Commemoration Volume मध्ये 1990 वर्षे इत्येते शोधलेखाः विमर्श पद्धत्यनुसृत्य विलिखिताः।

एतदतिरिक्ततया श्रीमद्भिः उत्तमूरू वीरराघवाचार्य महाभागैः विरचितः "वैखानसविजयः" तिरुमल तिरुपति देवस्थानं तिरुपतिः द्वारा 1963 वर्षे प्रकाशितः।

आगमवाङ्मये शोधकर्मणि व्यापृताः विद्वांसः

1. डा. एन्. एस्. रामानुजताताचार्य महोदयाः
2. डा. एम्. डि. बालसुब्रह्मण्यं महाभागाः

3. डा. प्रभाकर आप्टे महोदयाः

4. डा. उ. शङ्करभट्टमहाभागाः

5. डा. एम्. नरसिंहाचार्य महोदयाः

6. डा. राघवप्रसादचौधरी महाभागाः

7. डा. एस्.बि. रघुनाथाचार्यमहाभागाः

8. डा. एन्. आर्. भट्ट महोदयाः

9. श्री. ना. देवनाथाचार्यमहाभागाः

10. डा. बलदेव उपाध्याय महोदयाः

11. डा. एस्. आर्. भट्टमहाभागः

12. डा. अशोक कुमार कालिया महाभागाश्च

त्रिषु संपुटेषु संकलनीयत्वेन संकल्पितस्य वैखानसागमकोशस्य प्रथमं संपुटं राष्ट्रियसंस्कृतविद्यापीठेन प्रकाशितं तत् वैखानसागमतत्त्वजिज्ञासूनाम् उपकाराय कल्पते इति प्रमोदोऽयं विषयः।

वैखानसक्षेत्रे ग्रन्थान्तरैः विमानार्चनाकल्पः बहुष्वंशेषु यद्यपि संवदति तथापि केषुचिद्विचारविशेषेषु विवादः संलक्ष्यते। विमाननिर्माण-बिम्बकल्पन नवषट्पञ्चमूर्तीनां कल्पनादिषु ग्रन्थस्यास्य वैलक्षण्यं दरीदृश्यते। तदेवं ग्रन्थान्तर संवादिनां विसंवादिनां च विचाराणां परिशीलनं शोधग्रन्थेऽस्मिन् मया कृतम्।

भूयसा विदुषाम् अपरिचितस्य वैखानसागमस्य परिचायने "**विमानार्चनाकल्पस्य समालोचनात्मकमध्ययनम्**" इत्येतद्विषय-मधिकृत्य संशोधनं कर्तुमुपदिश्य तिरुपति राष्ट्रियसंस्कृतविद्यापीठस्य तदान्तीनकुलपतयः आचार्याः डा.एस्.बि. रघुनाथाचार्यमहाभागाः मां प्रैरयन्। तदनुरोधेन विद्यावारिध्युपाध्यर्थं "विमानार्चनाकल्पस्य समलोचनात्मकमध्ययनम्" इत्येतं विषयमधिकृत्य तिरुपतिस्थ राष्ट्रियसंस्कृतविद्यापीठे शोधप्रबन्धमुपस्थापयितुं पञ्जीकरणं कारितम्।

तदनुगुणतया चतुर्भिः अध्यायैः उपेतः ''विमानार्चनाकल्पस्य समालोचनात्मकमध्ययनम्'' इत्येतत् शीर्षिकोपेतः शोधप्रबन्धोऽयं श्रीमतां डा. लक्ष्मीनरसिंहभट्टमहोदयानां मार्गदर्शने सज्जीकृतः समर्पितश्च।

तत्र **प्रथमाध्याये** आगमानां परिचयः, **द्वितीयाध्याये** विमानार्चनाकल्पस्य स्वरूपम्, **तृतीयाध्याये** आलयनिर्माण-बिम्बप्रतिष्ठा-अर्चना- स्नपन- उत्सव- प्रायश्चित्तविषयाणां वैखानसग्रन्थान्तरैः समालोचनं, **चतुर्थाध्याये** उपसंहारः इत्येते प्रधानांशाः शोधग्रन्थेऽस्मिन् निरूप्यन्ते।

शोधकार्येऽस्मिन् वैखानसागमे दुरूहान् विचारान् प्रबोध्य उपकृतवद्भ्यः तिरुपति राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिचरेभ्यः महामहिमशालिभ्यः चतुश्शास्त्रनिष्णातेभ्यः आचार्येभ्यः डा. एन्. एस्. रामानुजताताचार्य महोदयेभ्यः भक्तिपूर्वक प्रणामान् निवेदयामि।

अनुसन्धानकार्येऽस्मिन् उचितसूचनादिकं प्रदाय साहाय्यमाचरितवद्भ्यः अस्मत्पितृपादेभ्यः तिरुमलतिरुपति देवस्थान-आस्थानविद्वद्भ्यः ग्रन्थस्यास्य सम्पादकेभ्यः पण्डित वेदान्तं देशिकाचार्येभ्यः प्रणामाः समर्प्यन्ते।

शोधप्रबन्धशीर्षिकामुपदिश्य उपकृतवद्भ्यः तिरुपतिस्थ राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिचरेभ्यः न्यायसाहित्यादि शास्त्रेषु निष्णातेभ्यः यशस्सम्पन्नेभ्यः विष्णुपदे विराजमानेभ्यः आचार्येभ्यः श्रीमद्भ्यः डा. एस्. बि. रघुनाथाचार्य महोदयेभ्यः हार्दान् साञ्जलिबद्धान् प्रणामशतान् व्याहरामि।

सर्वशक्तस्य भगवतो श्रीश्रीनिवासस्य कृपया शोधप्रबन्धोऽयं विद्वदादरपात्रं भवत्वित्याशासे।

''समत्वमाराधनमच्युतस्य''

तिरुपतिः
तारण-युगादिः

– श्रीविष्णुभट्टाचार्यः

विषयानुक्रमणिका

अध्यायः	विषयः	पृष्ठम्
	सम्पादकीयम्	iii
	शुभाशंसनम्	v
	आमुखम्	vii
	प्रस्तावना	ix
प्रथमोऽध्यायः	उपोद्घातः	1
	आगमपदार्थः	1
	शैवागमः	2
	पाञ्चरात्रागमः	2
	वैखानसागमः	3
	वैखानसागमस्य कर्ता	5
	वैखानसग्रन्थाः	6
द्वितीयोऽध्यायः	विमानार्चनाकल्पस्य स्वरूपम्	7
तृतीयोऽध्यायः		
	विमानार्चनाकल्पस्य प्रतिपाद्यम्	10
	विमानार्चनाकल्पस्य ग्रन्थावतरणम्	10
	विमानार्चना शब्दार्थः	11
	समूर्तार्चनस्य श्रैष्ठ्यम्	11
	ग्रामादीनां निर्माणम्	13
	ग्रामादीनां वास्तुभेदः	13
	ग्रामादीनां स्वरूपम्	13
	ग्रामादिवास्तुपदकल्पनम्	13
	ग्रामादीनां विन्यासे मानविवेकः	15
	अर्चकादीनां स्थानानि	15
	ग्रामे शङ्करादीनां देवानां स्थानानि	15
	आलयनिर्माणम्	16
	आचार्यः	16
	तक्षकः (शिल्पी)	17
	भूपरीक्षा	17

ग्राह्या भूमिः	17
अग्राह्या भूमिः	18
कर्षणविधिः	18
कर्षणकालः	18
युगलाङ्गलादीनां लक्षणम्	18
वृषभौ	19
रज्जुः	19
कर्षणम्	19
पददेवताकल्पनम्	19
तरुणालयप्रकारः	20
तरुणालयस्य स्थानम्	24
तरुणालय निर्माणम्	24
बालबिम्ब निर्माणम्	24
बालबिम्ब प्रतिष्ठा	25
आद्येष्टका न्यासः	25
आद्येष्टकाकालनिर्णयः	25
आद्येष्टकास्थापनस्य स्थानम्	26
आद्येष्टका लक्षणम्	26
आद्येष्टकान्यासप्रकारः	26
गर्भन्यासः	26
गर्भन्यासस्य कालः	27
गर्भभाजने निक्षेप्तुं आहरणानि द्रव्याणि	27
फेला कल्पनम्	28
फेलायां द्रव्यनिक्षेपण प्रकारः	29
गर्भन्यासस्थानम्	29
गर्भन्यासप्रकारः	29
गर्भनिक्षेपणफलम्	29
विमाननिर्माणविधिः	32
एकतलविमानं शान्तिकम्	33
एकतलविमानं पौष्टिकम्	34
एकतलविमानं जयदम्	34
एकतलविमानमद्भुतम्	34

एकतलविमानं सार्वकामिकम् 34
एकतलविमाननिर्माणप्रकारः 34
अधिष्ठानम् 34
पादबन्धमधिष्ठानम् 35
पद्मबन्धमधिष्ठानम् 35
पुष्पबन्धमधिष्ठानम् 35
श्रीप्रियाम्बुजमधिष्ठानम् 36
प्रतिबन्धमधिष्ठानम् 36
प्रतिक्रममधिष्ठानम् 36
कपोतबन्धमधिष्ठानम् 36
श्रीबन्धमधिष्ठानम् 36
पादः 37
प्रस्तरम् 37
ग्रीवा 37
शिखरम् 37
नासिका 38
स्थूपिका 38
द्वितलादिविमाननिर्माणप्रकारः 39
द्वितलविमानं - शान्तिकम् 39
द्वितलविमानानि पौष्टिकजयद-
अद्भुत सार्वकामिकानि 39
त्रितलविमानं शान्तिकम् 39
त्रितलविमानानि पौष्टिक जयद-
अद्भुत सार्वकामिकानि 39
चतुस्तल विमानं शान्तिकम् 39
चतुस्तल विमानानि पौष्टिकजयद-
अद्भुत सार्वकामिकानि 40
पञ्चतल विमानं शान्तिकम् 40
पञ्चतल विमानानि पौष्टिकजयद-
अद्भुत सार्वकामिकानि 40
षट्तलादि द्वादशतलान्तानि विमानानि 40
वलभ्यादिषु विमानभागेषु प्रकल्पनीयाः देवाः 40

मुखमण्डपादिनिर्माणम् 41
प्राकारकल्पनम् 42
समाप्तेष्टकान्यासः 42
समाप्तेष्टकान्यासकालः 42
समाप्तेष्टकान्यासस्य स्थानम् 43
समाप्तेष्टकान्यासप्रकारः 43
बिम्बकल्पनम् 43
शिला ग्राह्याग्राह्यविवेकः 43
वर्णानुरोधेन शिलाभेदाः 44
लिङ्गभेदेन शिलाभेदाः 44
शिलासङ्ग्रहणप्रकारः 44
शिलागर्भदोषाः 45
गर्भदोषफलम् 45
दारुग्राह्याग्राह्यविवेकः 45
दारुभेदाः 46
दारुसङ्ग्रहणप्रकारः 46
शूलस्थापनम् 46
शूलस्थापनस्य कालः 46
शूलानां संख्या 46
शूलस्थापनप्रकारः 47
शर्करालेपनम् 47
वर्णसंस्कारः 47
ध्रुवबेरम् 50
ध्रुवबेरम् उत्तमयोगस्थानकम् 51
ध्रुवबेरं मध्यमयोगस्थानकम् 51
ध्रुवबेरम् अधमयोगस्थानकम् 51
ध्रवबेरम् उत्तमभोगस्थानकम् 51
ध्रुवबेरं मध्यमभोगस्थानकम् 52
ध्रुवबेरम् अधमभोगस्थानम् 52
ध्रुवबेरम् उत्तमवीरस्थानकम् 52
ध्रुवबेरं मध्यमवीरस्थानकम् 52
ध्रुवबेरम् अधमवीरस्थानकम् 52

ध्रुवबेरम् आभिचारिकस्थानकम्	52
ध्रुवबेरम् उत्तमयोगासानम्	53
ध्रुवबेरं मध्यमयोगासनम्	53
ध्रुवबेरम् अधमयोगासनम्	53
ध्रुवबेरम् उत्तमभोगासनम्	53
ध्रुवबेरं मध्यमभोगासनम्	53
ध्रुवबेरम् अधमभोगासनम्	54
ध्रुवबेरम् उत्तमवीरासनम्	54
ध्रुवबेरं मध्यमवीरासनम्	54
ध्रुवबेरम् अधम वीरासनम्	54
ध्रुवबेरम् आभिचारिकासनम्	54
ध्रुवबेरम् उत्तमयोगशयनम्	54
ध्रुवबेरं मध्यमयोगशयनम्	55
ध्रुवबेरम् अधमयोगशयनम्	55
ध्रुवबेरम् उत्तमभोगशयनम्	55
ध्रुवबेरं मध्यमभोगशयनम्	55
ध्रुवबेरम् अधमभोगशयनम्	55
ध्रुवबेरम् उत्तमवीरशयनम्	55
ध्रुवबेरं मध्यमवीरशयनम्	56
ध्रुवबेरम् अधमवीरशयनम्	56
ध्रुवबेरम् आभिचारिकशयनम् - उत्तमम्	56
ध्रुवबेरम् मध्यमाभिचारिकशयनम्	56
ध्रुवबेरम् अधमाभिचारिकशयनम्	56
अङ्गलुसंज्ञा	57
मानाङ्गुलम्	57
मात्राङ्गुलम्	57
देहलब्धाङ्गुलम्	58
तालमानेन बेराणां निर्माणम्	58
वैखानसग्रन्थेषुनिर्दिष्टाः परिवारदेवाः	59
बिम्बप्रतिष्ठाविधिः	61
ध्रुवबिम्बप्रतिष्ठा	61
बिम्बप्रतिष्ठाकालः	61

आचार्यः	62
ऋत्विजः	62
अङ्कुरार्पणम्	62
अङ्कुरार्पणकालः	[illegible]
अङ्कुरार्पणपात्राणि	[illegible]
पालिका	[illegible]
कुम्भः	[illegible]
शरावः	[illegible]
अङ्कुरार्पणपदविभागः	[illegible]
अङ्कुरार्पणधान्यानि	[illegible]
अङ्कुरार्पणप्रकारः	65
सद्योङ्कुरार्पणम्	65
अक्ष्युन्मोचनम्	66
अक्ष्युन्मोचनस्य कालः	66
अक्ष्युन्मोचनं शिल्पिकर्तृकम्	66
ध्रुवबिम्बस्य अक्ष्युन्मोचनम्	66
कौतुकादिबिम्बानाम् अक्ष्युन्मोचनम्	66
देव्यादीनां अक्ष्युन्मोचनम्	67
अधिवासः	67
अधिवासप्रकारः	67
कुम्भपूजा- ध्यानम्	68
शयनाधिवासः	68
होमः	68
अरणी	69
स्रुवम्	69
अग्निहोत्रहवणिः	69
जुहूः	69
उपजुहूः	69
दर्वी	70
आहवनीयाग्निकुण्डः	70
अन्वाहार्याग्निकुण्डः	70
गार्हपत्याग्निकुण्डः	70

आवसथ्याग्निकुण्डः	70
सभ्याग्निकुण्डः	71
पौण्डरीकाग्निकुण्डः	71
होमत्रैविध्यम्	71
प्रधानहोमः	71
पारमात्मिकहोमः	79
रत्नादिन्यासः	79
बिमबसंस्थापनं - आवाहनम्	81
कुम्भनयनम्	81
आवाहनम्	81
प्रतिष्ठाफलम्	81
परिवारप्रतिष्ठा	81
श्रीभूदेव्योः पृथक्प्रतिष्ठा	81
श्री भूदेव्योरावाहनप्रकारः	82
नव षट्पञ्चमूर्तिप्रतिष्ठा	82
नवमूर्तयः	82
षण्मूर्तयः	83
पञ्चमूर्तयः	83
नवषट्पञ्चमूर्तीनामालयनिर्माणस्थानम्	83
नवषट्पञ्चमूर्तीनां तरुणालयविधिः	83
नवषट्पञ्चमूर्तीनां बालबिम्बप्रतिष्ठाप्रकारः	84
नवसंख्याकानां मूर्तीनां विमाने स्थानानि	84
विष्ण्वादिबिम्बकल्पनम्	84
नवषट्पञ्चमूर्तीनां प्रतिष्ठा	86
मत्स्यादीनां प्रतिष्ठा	86
मत्स्यमूर्तिः	87
कूर्ममूर्तिः	87
वराहमूर्तेः त्रैविध्यम्	87
आदिवराहः	87
प्रलयवराहः	87
यज्ञवराहः	87
नृसिंहमूर्तिभेदाः	88
गिरिजनृसिंहः	88

स्थूणजनृसिंहः	89
सुदर्शननृसिंहः	89
लक्ष्मीनृसिंहः	89
पातालनृसिंहः	89
पुच्छनृसिंहः	89
वामनमूर्तेर्भेदः	90
वामनमूर्तिः	90
त्रिविक्रमः	90
अष्टभुजत्रिविक्रमः	90
चतुर्भुजत्रिविक्रमः	90
परशुरामः	90
राघवरामः	91
सीता	91
लक्ष्मणः	91
हनुमान्	91
बलरामः	91
रेवती	92
श्रीकृष्णस्य रूपभेदाः	92
बृन्दावनकृष्णः	92
कालीयमर्दनः	92
नवनीतनटः	92
सन्तानकृष्णः	93
जगन्मोहनः	93
वेणुनादनटः	93
लीलामानुषविग्रहः	93
राजगोपालः	93
ज्ञानगोपालः	93
गोपालविग्रहः	94३
गोवर्धनधरः	94
पार्थसारथिः	94
बालगोपालः	94
वटपत्रशायी	94

सर्वमोहनः	94
कल्की	95
आदिमूर्तिः	95
अनन्तशयनः	95
मानुषवासुदेवः	95
दैविकवासुदेवः	95
लक्ष्मीकल्पः	96
गजेन्द्रमोक्षणः	96
सूर्यमण्डलान्तस्थमूर्तिः	96
क्षीरार्णवस्थमूर्तिः	96
श्रीधरः	97
विश्वरूपधरः	97
विमानार्चनाकल्पे...वैदिकमन्त्राः – आकरसहिताश्च	98
अर्चनाविधिः	104
नित्यार्चना	104
मन्त्रासनम्	104
स्नानासनम्	104
अलङ्कारासनम्	104
पुष्पविधिः	105
पुष्पभेदाः	105
ग्राह्यपुष्पाणि	105
अग्राह्यपुष्पाणि	105
भोज्यासनम्	105
हविर्विधिः	106
ग्राह्याग्राह्यधान्यानि	106
हविषः मानप्रकारः	106
हविर्भेदाः	107
यात्रासनम्	107
पञ्चप्रणामाः	108
उपचाराः	108
द्वात्रिंशदुपचाराः	109

नवविंशत्युपचाराः 110

अष्टाविंशत्युपचाराः 110

त्रयोदशोपाचराः 110

एकादशोपचाराः 110

अष्टोपचाराः 110

षडुपचाराः 110

द्वौ उपचारौ 110

एकोपचारः 110

अर्चनाविधौ विष्णवादीनां स्थान-
वाहन-बीजाक्षर मूर्तिमन्त्राः 111

नवषट्पञ्चमूर्तिनामर्चना 141

नैमित्तिकार्चनम् 145

नैमित्तिककथनम् 145

अर्चनपात्रादीनां लक्षणम् 146

स्नपनविधिः 152

स्वपनमण्टपस्य स्थानम् 152

नवविधस्नपनम् 152

अशक्तस्य नवविधस्नपनम् 153

संभारसंभरणम् 153

स्नपनप्रकारः 153

विमानार्चनाकल्पे प्रयुक्ता स्नपनविधौ -
. . . . . विनियोगादीनां पट्टिका 154

स्नपनपात्राणि 156

उत्सवविधिः 158

उत्सवः 158

उत्सवत्रैविध्यम् 158

उत्सवदिनसंख्या 158

उत्सवसामग्री 159

आचार्यनियमाः 159

मृत्सङ्ग्रहणम् 159

मृत्सङ्ग्रहणप्रदेशः 159

मृत्सङ्ग्रहणप्रकारः 159

अङ्कुरार्पणम्	160
ध्वजदण्डस्थापनम्	160
ध्वजदण्डदारवः	160
ध्वजदण्डदारु ग्राह्याग्राह्यः	161
ध्वजदण्डमानम्	161
ध्वजदण्डस्य स्थापनस्थानम्	161
ध्वजदण्डस्थापनम्	162
ध्वजारोणप्रकारः	162
ध्वजपटलक्षणम्	163
ध्वजपटलेख्यगरुडमानम्	163
ध्वजपटलेख्यगरुडलक्षणम्	163
ध्वजपटप्रतिष्ठा	164
ध्वजारोहणकालः	164
भेरीपूजा - भरीताडनम्	164
बलिप्रदानम्	164
ध्वजारोहण प्रकारः	164
कुम्भार्चनम्	165
प्रतिसरबन्धः	165
होमः	165
उत्सवदिनपुष्पाणि	166
उत्सववाहनानि	166
वाहनानि	167
चूर्णोत्सवः	168
अवभृथः	168
अवभृथस्य कालः प्रदेशश्च	168
अवभृथप्रकारः	168
ध्वजावरोहणम्	168
उत्सवसामग्री लक्षणम्	169
प्रायश्चित्तम्	173
शान्तिपञ्चकम्	185
अद्भुतशान्तिः	185
प्रभूतशान्तिः	185

	महाशान्तिः	186
	शान्तिः	186
	शुद्धिः	186
	पवित्रोत्सवः	186
	पवित्रोत्सवकालः	186
	पवित्रोत्सवप्रकारः	187
	अनुष्ठानप्रशंसा	187
	ज्ञानभागाः	188
	भगवतः स्वरूपम्	188
	श्रीः	188
	वैकुण्ठस्वरूपवर्णनम्	188
	जगत्सृष्टिः	189
	शरीरस्वरूपम्	189
	मोक्षः	189
	योगभागः	190
	योगाङ्गानि	190
	योगाधिकारिणः लक्षणम्	190
	आसनभेदाः	190
	प्राणायामप्रकारः	190
	प्रत्याहारस्वरूपम्	191
	धारणाविधिः	191
	ध्यानप्रकारः	191
	समाधिः	191
॰यः	उपसंहारः	192
	अनुबन्धः	193
	उपयुक्तग्रन्थाः	204

सङ्केताक्षरसूची

अ.	अध्यायः
अ.को.	अमरकोशः
उपो.	उपोद्घातः
ऋ.	ऋग्वेदः
क्र.सं.	क्रमसंख्या
क्रि.	क्रियाधिकारः
खि.	खिलाधिकारः
ज्ञा.	ज्ञानकाण्डः
तै.आ.	तैत्तिरीयारण्यकम्
पा.उ.	पारमात्मिकोपनिषत्
प्र.	प्रकीर्णाधिकारः
पृ.	पृष्ठम्
य.	यज्ञाधिकारः
यजु.	यजुर्वेदः
वा.	वासाधिकारः
वाच.	वाचस्पत्यम्
वि.	विमानार्चनाकल्पः
वै.मं.	वैखानसमन्त्रप्रश्नः
श.क.	शब्दकल्पद्रुमः
श्लो.	श्लोकः
स.	समूर्तार्चनाधिकरणम्
सं.	सम्पादकः
साम.	सामवेदः

प्रथमोऽध्यायः

उपोद्घातः

आगमपदार्थः

भारतीयायाः संस्कृतेः भारतीयस्य वाङ्मयस्य च निगमागमा एव मूलम्। निगमशब्दः वेदवाची। नितरां गम्यते सप्रमाणं निश्चीयते आत्मतत्त्वं येनाऽसौ निगम इति निगमशब्दस्य व्युत्पत्तिः। शब्दप्रमाणमात्रे प्रयुज्यमानम् आगमपदं सृष्टिप्रलयादि सप्तभिर्लक्षणैर्युक्तं वाङ्मयं बोधयति।[1]

आङ्पूर्वकात् गत्यर्थकत्वात् गम्लृ धातोः ग्रहवृदृनिश्चिगमश्च इति अप्प्रत्यये निष्पन्नोऽयमागमशब्दः तन्त्रशब्देनापि व्यवह्रियत इति डा.उ. शङ्करभट्ट महाभागाः स्वकीये- विश्वामित्रसंहितायाः तुलनात्मकमध्ययनमिति शोधप्रबन्धे लिखन्ति।

तन्त्रलक्षणं विष्णुसंहितायां[2] **सर्वे अर्थाः येन तन्यन्ते त्रायन्ते च भयाज्जनाः, इति तन्त्रस्य तन्त्रत्वं तन्त्रज्ञाः परिचक्षते** इति श्रूयते। यत्र चातुरात्म्योपासनं स्व संज्ञाभिः नामशब्दाद्युपेतैः तत्तत् व्यूहनामभिः क्रमागतैः कर्तव्यत्वेनप्रतिपाद्यते स आगम इति पौष्करसंहितायाम्[3] आगम शब्दस्य निर्वचनं कृतं दृश्यते। यथा-

कर्तव्यत्वेन वै यत्र चातुरात्म्य उपास्यते।
क्रमागतैः स्वसंज्ञाभिः ब्राह्मणैरागमं तु तत्॥

---

1. श.क.पृ.165
2. 2,10-1
3. 38, 293-4

शिवात् गिरिजायै उपदिष्टं ग्रन्थजातम् आगम इति शब्दकल्पद्रुमे[1] दृश्यते। तन्त्रापराऽभिधानोऽयम् आगमः प्राधान्येन-शैव - वैष्णवात्मना द्विधा भिद्यते। शिवपारम्यं शैवशास्त्रं शैव-पाशुपत- सोम-लाकुल भेदेन चतुर्विधं भवति। विष्णुपारम्यप्रतिपादकः वैष्णवागमः वैखानस-पाञ्चरात्रात्मना द्वैविध्यमावहति।

शैवागमः

पञ्चमुखात् परमशिवात् सर्वज्ञात् निसृताः निखिलाः कामिकाद्याः आगमाः अष्टाविंशतिसंख्याकाः क्रमेण परमशिवस्य सद्योजातादि मुखेभ्यः सर्गादौ समुत्पन्नाः।

सद्योजातमुखात् पञ्च कामिक-योग-चिन्त्य-कारण-अजित, **वामदेवमुखात् पञ्च** दीप्त-सूक्ष्म-सहस्र-अंशुमान्-सुप्रभेदक, **अघोरमुखात् पञ्च** विजय-निश्वास-स्वायम्भुव-अनिल-वीर, **तत्पुरुषमुखात् पञ्च** रौरव-मकुट-विमल-चन्द्रज्ञान-बिम्ब, **ईशानमुखात् अष्टौ** प्रोद्गीथ-सर्वोक्त-ललित-पारमेश्वर-सिद्ध-किरण-सन्तान-वातुला इति।

अयं च शैवागमः ईश्वरप्रोक्तत्वात् स्वतन्त्र प्रमाणभूतः इति शैवागमनिष्ठाः कथयन्ति। शैवदर्शनं परमशिवस्य निमित्तकारणत्वमात्रं वदति।

तत्र च आगमे पतिः पशुः पाशश्चेति त्रिविधं प्रमेयं भवति। सर्वशक्तिसम्पन्नः पुरुषः परमशिवः पतिः, कर्तृत्वभोक्तृत्वादि शक्तियुतः पशुः, मलः कर्म माया महामाया रोधशक्तिरिति पञ्चप्रकारः पाशः इति। आगमेऽस्मिन् षट्त्रिंशत् तत्त्वानि च प्रोच्यन्ते।

पाञ्चरात्रागमः

'पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयम्' इति महाभारत-वचनेन पञ्चरात्रशास्त्रं नारायणप्रणीतमिति श्रूयते।

पञ्चरात्रं भागवत- सात्त्वत-एकायन-भगवच्छास्त्र शब्दैरपि व्यवह्रियते।

---

1. पृ.165

पञ्चरात्रं वेदविरुद्धमिति शङ्कराचार्याः कथयन्ति। शङ्कराचार्याणामधिक्षेपं यामुनाचार्याः आगमप्रामाण्ये ग्रन्थे निराकुर्वन्ति।

पञ्चरात्रशब्दस्य निर्वचनानि पाञ्चरात्रसंहितासु नैकविधानि दृश्यन्ते। इन्द्रियाणि विषयाः भूतानि तद्गुणाः पञ्चशब्देन कीर्त्यन्ते। रा धातुः आदानार्थकः विषयेन्द्रियभूतानाम् आदातारः पञ्च राः मनुष्याः, तेषां त्राणं शास्त्रं पञ्चरात्रमिति विश्वामित्रसंहिता पञ्चरात्रशब्दं व्युत्पादयति।

पञ्चरात्रम् आगमसिद्धान्त-मन्त्रसिद्धान्त-तन्त्रसिद्धान्त-तन्त्रान्तर सिद्धान्तभेदेन चतुर्विधं भवति।

पञ्चरात्रे अष्टचत्वारिंशदधिकद्विशतसंख्याकाः संहिताः नाम्ना उपलभ्यन्ते इति डा.उ.शङ्करभट्टमहाभागः स्वकीये विश्वामित्रसंहितायाः तुलनात्मक-मध्ययनम् इति शोधप्रबन्धे अलिखत्।

यद्यपि पाञ्चरात्रसंहिताः बह्व्यः वर्तन्ते तथापि त्रिंशत् संख्याकाः एव मुद्रिताः सन्ति। मुद्रिताः पञ्चरात्रसंहिताः अतिरिच्य तालकोशादिषु अनेकाः संहिताः उपलभ्यन्ते।

पञ्चरात्रसंहिताः प्रतिपाद्यविषयानुरोधेन ज्ञानपाद - योगपाद-क्रियापाद-चर्यापाद इति चतुर्षु पादेषु विभज्यन्ते[1]।

वैखानसागमः

विष्णुपारम्यप्रतिपादकः वैखानसागमः विखनसमुनिना अनुगृहीतः। तच्छिष्यैः भृग्वत्रिकाश्यपमरीचि महर्षिभिः प्रसारितः वंशपरंपरागतः सन् भारते लब्धप्रतिष्ठो राजते।

"श्रियः पतिः भगवान् विष्णुरेव परमं तत्त्वं, तत्प्राप्तिरेव मोक्षः

1. पाञ्चरात्रसंहितासु ज्ञानपाद समीक्षणं डा.लक्ष्मीनरसिंहभट्टः शोधप्रबन्धः - केन्द्रियसंस्कृतविद्यापीठम्, तिरुपतिः - 1991

अमूर्तसमूर्त भेदेन द्विविधं भगवदर्चनं मोक्षोपायः। द्विविधे चास्मिन् भगवदर्चने द्वितीयं समूर्तार्चनं श्रेयः, समूर्तार्चनं च एतदर्चनम् आलयार्चा गृहार्चा चेति द्विविधम्। तत्र आलयार्चा ज्यायसी इति वैखानसागमग्रन्थेषु प्रतिपाद्यते। मोक्षोपायनस्य विष्णवर्चनस्य विष्णुपारम्य अवगति मूलत्वात् विष्णुपारम्यं सर्वेषु वैखानसागमग्रन्थेषु प्रथमतः प्रस्तूयते।

विष्णुरेव परात्पर इत्यत्र श्रुतिप्रमाणं प्रदर्श्य भगवता मरीचिना स्वविमानार्चनाकल्पे विष्णुरेव भजनीयः स एव भक्तजनेभ्यः मोक्षदाने समर्थ इति प्रतिपाद्यते। चतुर्वेदोद्भवैर्मन्त्रैः भगवदाराधनेन परात्परस्य देवानामपि दुर्लभस्य परमपदस्य प्राप्तिर्भवति। आलयार्चनं मुक्तेः प्रशस्तं साधनमिति वैखानसागमग्रन्थाः उपवर्णयन्ति।[1]"

वैखानसागमेऽस्मिन् परमात्मस्वरूपप्रतिपादकः ज्ञानभागः चित्तनैर्मल्य-निरूपणपरः योगभागः, आलयनिर्माण - बिम्बकल्पन-बिम्बप्रतिष्ठा-अर्चन-स्नपन-उत्सव-प्रायश्चित्तादिविवेचनपरः क्रियाभागश्च समुपलभ्यते।

पाञ्चरात्र शैवागमयोः प्रतिपाद्यमानाः चर्यापादांशाः वैखानसागमे क्रियाभागे एव अन्तर्भूताः भवन्ति।

अयं च वैखानसागमसम्प्रदायः विखनोमुनिमारभ्य अद्य यावत् वैखानसान्वये जातैः सूत्रोक्तसंस्कार शालिभिरेव भगवदालयेषु अर्चनाधिकारः प्रवर्तते।

दक्षिणापथे कर्णाटक-तमिलनाडु-आन्ध्रदेशेषु विराजमानेषु विशिष्टेषु आलयेषु अनेन वैखानसागमसम्प्रदायेन च अद्यापि अर्चनादिकं प्रचलति।

इत्थं विग्रहाराधनादिकं सुविस्तरमुपवर्णयन् वैखानसागमः भारतेऽस्मिन् विशिष्टं च स्थानमलङ्करोति।

---

1. "वैखानसागमः" डा.लक्ष्मीनरसिंहभट्टः संस्कृतविमर्शः दिल्ली 1983

वैखानसागमस्य कर्ता

वैखानसागमसम्प्रदायस्य प्रवर्तकः विखनोमुनिः। वैखानसपदं वेदेषु इतिहासपुराणेषु धर्मशास्त्रेषु च उपलभ्यते।

यजुर्वेदे तैत्तिरीयारण्यके प्रथमप्रश्ने त्रयोविंशानुवाके "ये नखाः ते वैखानसाः ये वालाः ते वालखिल्याः" इति श्रूयते। अत्र श्रीभट्टभास्करभाष्यं - अथ तस्यैव शरीरस्य ये नखा आसन् ते वैखानसा ऋषयः अभवन्। नख विरूढाः वैखानसाः। प्रातिलोम्येन वर्णा वर्तन्ते इति। यजुर्वेदे तैत्तिरीयसंहितायां द्वितीय प्रश्ने चतुर्थानुवाकोपक्रमे "स्फयस्स्वस्तिर्विखनः स्वस्तिः" इति श्रूयते। सामवेदे मन्त्रब्राह्मणे[1] "विखनान् विबृह्वामिवः" इति प्रोच्यते। अथर्वसंहितायां द्वादशकाण्डे प्रथमसूक्ते पञ्चत्रिंशो मन्त्रः -

'यद्भमे विखनामि क्षिप्रं तदपिरोहतु।
माते मर्म विमृग्वरि माते हृदयमर्पिमम्॥' इति। मनुस्मृतौ षष्ठाध्याये

पुष्पमूलफलैर्वापि केवलैर्वर्तयेत्सदा।
कालपक्वैः स्वयं शीर्णैः वैखानसमते स्थितः॥ इति स्मर्यते।

अत्र कुल्लूकभट्टव्याख्यायां-

वैखानसाः वानप्रस्थाः। तद्धर्मप्रतिपादकशास्त्रदर्शने स्थितः। तेन एतदुक्तम् अन्यदपि वैखानस शास्त्रोक्तं धर्ममनुतिष्ठेदिति।

श्रीमद्रामायणे अरण्यकाण्डे षष्ठसर्गोपक्रमे

वैखानसा वालखिल्याः संप्रक्षाला मरीचिपाः।
अश्मकुट्टाश्च बहवः पत्राहाराश्च धार्मिकाः॥ इति दृश्यते। अतः श्रुति स्मृतीतिहासपुराणप्रतिपाद्यम् एतन्नाम विखना इति।

भगवतो महर्षेः विखनसः गृह्य-प्रवर-धर्म-श्रौतसूत्राणि उपलभ्यन्ते। विखनसो महर्षेः वानप्रस्थमार्गो आदरातिशयः।

---

1. 2-5-1

विष्णुसहस्रनाम[1] स्तोत्रे वैखानसशब्दः विष्णुपर्यायतया प्रयुक्तो दृश्यते। 'वि' इत्युपसर्गपूर्वकात् खनु अवधारणे इत्यस्मात् धातोः निष्पन्नोऽयं शब्दः इति विखनसशब्द व्युत्पत्तिं प्रदर्शयन्ति विद्वांसः। वेदेषु निगूढमर्थविशेषं समुधृत्य प्रदर्शयन् अयं भगवान् विखनो महर्षिः तादृशं नाम भेजे इत्युपपादयन्ति च[2]।

वैखानसग्रन्थाः

मरीचि-अत्रि-भृगु-काश्यप संज्ञकैः चतुर्भिः मुनिभिः प्रोक्ताः वैखानसग्रन्थाः मरीचि-अत्रि-भृगुभिः प्रोक्तेषु विमानार्चनाकल्प - आनन्दसंहिता- समूर्तार्चनाधिकरण-वासाधिकार-यज्ञाधिकार संज्ञकेषु ग्रन्थेषु निर्दिश्यन्ते। वैखानसागमग्रन्थानां संज्ञासु संख्यायां च विमानार्चनाकल्पादि ग्रन्थप्रवक्तॄणां मतैक्यं न दृश्यते।

वैखानसग्रन्थानां संख्या निर्णयः न सुशक इति कथयन्तो डा.लक्ष्मीनरसिंह भट्ट महोदयाः सम्प्रत्युपलभ्यमानान् विमानार्चनाकल्प प्रभृतीन् ग्रन्थान् परिशील्य जयसंहिता प्रभृतयः अष्टपञ्चाशत् वैखानसग्रन्थाः नाम्ना उपलभ्यन्ते इति स्वकीये "पाञ्चरात्रसंहितासु ज्ञानपादसमीक्षणम्" इति शोधप्रबन्धे समुल्लिखन्ति।

सम्प्रति मरीचेः विमानार्चनाकल्प - आनन्दसंहिता संज्ञकौ द्वौ, अत्रेः समूर्तार्चनाधिकरण संज्ञकः एकः, भृगोः क्रियाधिकार-खिलाधिकार-प्रकीर्णाधिकार-वासाधिकार-यज्ञाधिकार संज्ञकाः पञ्चग्रन्थाः, काश्यपस्य ज्ञानकाण्ड संज्ञकः एकः इत्यष्टौ एव ग्रन्थाः मुद्रिताः उपलभ्यन्ते। भृगोः अर्चनाधिकार - निरुक्ताधिकार संज्ञकौ द्वौ वैखानसग्रन्थौ मातृकारूपेण उपलभ्येते। अन्ये ग्रन्थाः विनष्टाः स्युः।

काश्यपस्य ज्ञानकाण्डः टि.गौड्रियन् इत्यनेन आङ्ग्लभाषायामनूदितः लभ्यते।

---

1. पृ.612
2. श्रीवैखानसं नावल्पाक्कं देवनाथाचार्यः अभिनन्दन सञ्चिका श्री वैखानस युवजन मण्डलिः तिरुपतिः, 1967.

द्वितीयोऽध्यायः

विमानार्चनाकल्पस्य स्वरूपम्

भगवान् मरीचिः जयसंहिता, आनन्दसंहिता, संज्ञानसंहिता, वीरसंहिता, विजयसंहिता, विजितसंहिता विमलसंहिता, ज्ञानसंहिता इति अष्टौ संहिताः अलिखत्। अष्टसु संहितासु लक्षाधिकचतुरशीति सहस्रग्रन्थाः[1] सन्ति। विमानार्चनाकल्पग्रन्थः आनन्दसंहितान्तर्गतः। विमानार्चनाकल्पे अयुत ग्रन्थाः सन्ति[2]।

विमानार्चनाकल्पग्रन्थे भवसागरोत्तरणोपायस्य प्रष्टारः ऋषयः, वक्ता तु भगवान् मरीचिः। केन मार्गेण, कैः मन्त्रैः कं देवं समर्च्य कान् वा लोकान् प्राप्नुवन्ति भविनः ? इति जिज्ञासन्ते ऋषयः। ऋषिप्रश्नानां समाधानायाऽयं ग्रन्थः मरीचिना अवतारितः। भगवतः विष्णोः श्रुतिमार्गेण चतुर्वेदोद्भवैर्मन्त्रैः समाराधने विष्णुलोकाऽवाप्तिर्भवतीति मरीचेः आशयः। एतदेव विस्तृततया अत्र ग्रन्थे प्रतिपाद्यते।

अयं च विमानार्चनाकल्पग्रन्थः गद्यरूपः। ग्रन्थेऽस्मिन् 101 पटलाः सन्ति। तेषु पटलेषु क्रियाभागः, ज्ञानभागः, योगभाग इति भागत्रयं दृश्यते। प्रथमपटलात् चतुरशीतितमपटलपर्यन्तः क्रियाभाग इति कीर्त्यते। तत्र भूपरीक्षा आलयदेशविधि-पददेवताबलिविधि-बालालयप्रतिष्ठा-नवषट्पञ्चमूर्ति-तरुणालयप्रतिष्ठा-प्रथमशिलेष्टकान्यास-विमानविधान-अधिष्ठानभेद-

---

1. द्वात्रिंशदक्षरात्मकसमूहः ग्रन्थ इत्युच्यते।
2. वि.पृ. 522

एकतलविधि-द्वितलविधि-प्राकारगोपुरादिनिर्णय-गर्भन्यास-मूर्ध्न्येष्टकविधि-नवविधपरिवाराचार्यार्चकविधि-शिलाग्रहण-बेरप्रमाण-पदविभाग-स्थाननिर्णय-बेरस्थापन-दारुसङ्ग्रहण-शूलस्थापन-स्थानकादिध्रुवबेरकल्पन - विष्णवादीनां वर्णवाहनादिनिर्णय- प्रादुर्भावविधि- कौतुकादिलक्षण-दशतालादिनिर्णय-पात्रादीनां लक्षण- अङ्कुरार्पण-अक्ष्युन्मोचन-अधिवास अग्निकुण्डकल्पन-शयनाधिवास-होम-रत्नन्यास-आवाहन-परिवारप्रतिष्ठा-नवषट्पञ्चमूर्तिविधान- नवषट्पञ्चमूर्तीनां कल्पन-नवषट्पञ्चमूर्तीनां प्रतिष्ठा-विमानप्रतिष्ठा-श्रीभूम्योःप्रतिष्ठा-स्नपनादीनां बिम्बानां प्रतिष्ठा-नित्यार्चना-बलिप्रकार-पुष्पहविर्विधान नवषट्पञ्चमूर्तीनामर्चना - नैमितिकार्चना-स्नपन-उत्सव-मत्स्यादीनां प्रतिष्ठा - आलयनिर्माणप्रायश्चित - बिम्बकल्पनप्रायश्चित्त-बिम्बप्रतिष्ठा प्रायश्चित्त - अर्चनाप्रायश्चित्त-स्नपनप्रायश्चित्त - उत्सवप्रायश्चित्त - अस्पृश्यस्पर्शनप्रायश्चित्त - अद्भुतादिशान्तिपञ्चक - पवित्रारोपण - अनुष्ठानकल्पाः प्रतिपाद्यन्ते।

पञ्चाशीतितमपटलात् पञ्चनवतितमपटलपर्यन्तो भागः ज्ञानभाग इति कथ्यते। तत्र परमात्मनः निष्कलस्वरूप-सकलस्वरूप- वैकुण्ठस्वरूप - देहोत्पत्तिप्रकार - देहलक्षण- ध्यान-नाडीवर्णन - जीवोद्भव - भगवत्सायुज्यप्रदान - ज्ञानस्वरूपाः उपपाद्यन्ते।

षण्णवतितमपटलात् शततमपटलपर्यन्तो भागः योगभाग इति वर्ण्यते। तस्मिन् यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारण-ध्यान-समाधयः विव्रियन्ते। एकशततमपटले ग्रन्थगणना विधिः उपवर्ण्यते।

अस्मिन् विमानार्चनाकल्पे विमानकल्पन -अधिष्ठानभेद - स्थानकादीनां बिम्बकल्पन - अरण्यादीनां स्वरूप-नवषट्पञ्चमूर्तीनां प्रतिष्ठा - अनुष्ठान विधान - ज्ञानयोगविषयाः अनितरसाधारणतया अत्र ग्रन्थे प्रतिपाद्यन्ते।

विष्णवादीनां देवानां वर्ण- वाहन-बीजाक्षर-मूर्तिमन्त्राः वैखानसग्रन्थान्तरापेक्षया विमानार्चनाकल्पे विलक्षणस्वरूपतया निरूप्यन्ते। अस्मिन्नेव

विमानार्चनाकल्पे अर्चन स्नपन उत्सवोपयुक्तानां पात्रादीनां स्वरूपं नान्यत्र क्वचित् उपलभ्यते।

भृगु प्रोक्तेषु क्रियाधिकार - खिलाधिकार- यज्ञाधिकार-वासाधिकार-प्रकीर्णाधिकार ग्रन्थेषु अत्रि प्रोक्ते समूर्तार्चनाधिकरणे ग्रन्थे काश्यपप्रोक्ते ज्ञानकाण्डे वैखानसागम संबन्धिनो विषयाः यद्यपि प्रतिपाद्यन्ते तेषामपेक्षया विमानार्चनाकल्पग्रन्थे विशदतया सुस्पष्टं उपपाद्यन्ते। अत एव वैखानसानुसारि देवालयेषु बहुत्र विमानार्चनाकल्पानुरोधेन भगवदर्चनादयः संप्रत्यपि प्रचाल्यन्ते।

विमानार्चनाकल्पः प्रथमतः तिरुमल-तिरुपति देवस्थानेन 1926 तमे वत्सरे देवनागरिलिप्यां पण्डित - व. रघुनाथचक्रवर्तिभट्टाचार्य, महामहोपाध्याय सेतुमाधवाचार्याभ्यां च संपादकत्वे, ततः 1927 तमे वत्सरे ईगावारिपालें (तमिलनाडु चेङ्गल्पट्) वैखानसग्रन्थमालायाम् आन्ध्रलिप्यां, ततः 1935 तमे वत्सरे के. साम्बशिवशास्त्रिणां संपादकत्वे त्रिवेन्ड्रम् सांस्क्रिट् सिरीज् द्वारा देवनागरिलिप्यां, ततः 1979 वत्सरे द्वारकातिरुमल श्रीवेङ्कटेश्वरस्वामिदेवस्थानेन भास्कररामकृष्णमाचार्याणां संपादकत्वे आन्ध्रल्प्यिां च प्रकाशितः।

तिरुमल - तिरुपति देवस्थानेन प्रकाशितः विमानार्चनाकल्पग्रन्थः प्रायः शुद्धः इति समालोचनाय मया स्वीकृतः।

तृतीयोऽध्यायः

विमानार्चनाकल्पस्य प्रतिपाद्यम्

आलयार्चनाप्रतिपादकेषु वैखानसग्रन्थेषु विमानार्चनाकल्पः अन्यतमः प्रधानश्च। अयं च विमानार्चनाकल्पः मरीचिप्रोक्तः। ग्रन्थेऽस्मिन् तत्त्वनिर्णयपरः ज्ञानभागः, ध्यानप्रकारविवेचनपरः योगभागः, भगवदालयनिर्माण - बिम्बनिर्माण-बिम्बप्रतिष्ठादि विवेचनपरः क्रियाभागश्चेति त्रयोभागाः वर्तन्ते[1]।

सम्प्रत्युपलभ्यमानेषु अत्रेः समूर्तार्चनाधिकरणसंज्ञके ग्रन्थे भृगोः क्रियाधिकार - खिलाधिकार- प्रकीर्णाधिकार-वासाधिकार-यज्ञाधिकार-संज्ञकेषु पञ्चसु ग्रन्थेषु काश्यपस्य ज्ञानकाण्डे च क्रियाभागः एक एव उपलभ्यते।

विमानार्चनाकल्पस्य ग्रन्थावतरण्

ग्रन्थस्यास्य अवतरणप्रकारः विनूतनः। स्वशिष्यैः परिवृतेन वैखानसाम्भोधिपारदृश्वना मरीचिना उपसन्नेभ्यः नानालोकनिवासिभ्यः धर्मसंसक्तेभ्यः तत्त्वज्ञानजिज्ञासुभ्यः ऋषिभ्यः बोधिताः वैखानससिद्धान्ताः ग्रन्थेऽस्मिन् निरूप्यन्ते।

---

1. अथातो मरीचिं मुनयः प्रणम्य चरितक्रियाज्ञानयोगेषु चतुर्षु पूजामर्गेषु चरितं (तत्क्रिये) भगवता विखनसा सूत्रे विस्तरेण प्रणीतम्। (ते ?) अन्यत्संक्षेपेणोक्तं तदुपन्यासो बहुप्रयोगक्रमेण क्रियामार्गस्त्वया प्रणीतः। भगवत्तत्त्वज्ञानयोगं च श्रोतुमिच्छामः इत्यायाचन्त। वि.पृ.491.
पाञ्चरात्रसंहितासु प्रधानत्वेन परिगण्यमानायां पाद्मसंहितायां ज्ञानयोग क्रियाचर्या इति चत्वारः पादाः प्रतिपाद्यविषयत्वेन उपलभ्यन्ते। तत्र देवालयस्य बिम्बनिर्माणस्य प्रतिष्ठायाश्च विवरणपरोभागः क्रियापाद इति, नित्य नैमित्तिकार्चन उत्सव स्नपनादि प्रक्रियायाश्च विवरणपरो भागः चर्यापाद इति, क्रिया चर्ययोः पादयोः विभागः दृश्यते।

मरीचिना ऋषिभ्यः विस्तरेण प्रोक्ताः एते वैखानससिद्धान्ताः विखनसा स्वगृह्यसूत्रे समासेन प्रतिपादिता एव इति ग्रन्थेऽस्मिन्[1] निर्दिश्यते।

विमानार्चना शब्दार्थः

देशकालाद्यपरिच्छिन्नत्वात् भगवान् विष्णुः विमानशब्देन निर्दिश्यते। तादृशस्य परब्रह्मणः विष्णोः अर्चनाप्रकारादिकं ग्रन्थेऽस्मिन् प्रतिपाद्यत इति ग्रन्थस्यास्य विमानार्चनाकल्प इति संज्ञा[2]। विमानार्चना शब्दस्यार्थः काश्यपकृतज्ञानकाण्ड ग्रन्थे[3] एवमेव दृश्यते।

समूर्तार्चनस्य श्रैष्ठ्यम्

भगवतः विग्रहाः परव्यूहविभवान्तर्याम्यर्चाभेदेन पञ्चधा वैखानसागमे परिगण्यते[4]। परंज्योतिस्वरूपः सर्वशक्तिमयः शंखचक्रगदापद्मदिव्यायुधयुतः षड्गुणैर्युक्तः श्रियास्सेव्यमानः जगत्पतिः पर इति, विष्णु पुरुष सत्याच्युतानिरुद्धरूपेण पंचधा विभज्य स्वीकृताः मूर्तयः व्यूह इति, इहलोकप्रादुर्भूताः मत्स्यकूर्मादिमूर्तयः विभव इति, उपासकानां हृदये श्रीभूमिभ्यां सहिततया स्थितो मूर्तिः अन्तर्यामीति देवालयेषु समर्च्यमाना प्रतिमा अर्चेति च कथ्यते।

एतेषु विग्रहेषु अर्चाविग्रहस्य श्रेष्ठतां मरीचिप्रभृतयः मुनयः प्रतिपादयन्ति। सकलजनसाक्षात्कारयोग्यं, सद्यः चित्तःप्रसादजनकं देवालयेषु विराजमानं

---

1. तस्मात् "अग्नौ नित्यहोमान्ते विष्णोर्नित्याऽर्चा गृहे देवायतने वा भक्त्या भगवन्तं नारायणमर्चयेत्" इति विखनसा सूत्रे समासेनोक्तं तदव (दहम) शेष- विशेषणं समन्त्रकं सप्रयोगं क्रियामार्गं क्रमेण विस्तरतो वक्ष्यामि। वि.पृ.3
2. तस्मात् परं ब्रह्म परंज्योतिरक्षरं सर्वभूतात्मकं सर्वाधारं सनातनं परं पुरुषमर्चयेत् तत् विमानार्चनम्।
3. विमानमित्यत्र विष्णोः। सा विमानार्चना पुण्या सर्वक्रतुफलप्रदा चिरस्थायिनी इति।
4. भगवतः परव्यूह विभवान्तर्याम्यर्चाभेदेन पंचधाविभागः प्रकीर्णाधिकारे (33अ) कृतौ एव दृश्यते। अन्येषु वैखानसागमग्रन्थेषु एतादृशः विभागः नैव उपलभ्यते।

सर्वदेशसर्वकालवर्ति मानवसाक्षात्कारयोग्यं, सकलपापनिरसनपूर्वकसकलश्रेयः प्रदम्, अर्चारूपमिति ते अभिप्रयन्ति।

वैखानसागमे श्रियः पतिः भगवान् नारायणएव परमं तत्त्वं, तत्प्राप्तिरेव मोक्षः, तस्य समूर्तस्य अमूर्तस्य च पूजनमेव उपाय इति सामान्यतः तत्त्वहित पुरुषार्थनिष्कर्षः क्रियते[1]। तत्र विष्णोरर्चनं अमूर्तसमूर्त भेदेन द्विविधं प्रतिपाद्य समूर्तार्चनं श्रेयः इति च प्रतिपाद्यते। समूर्तार्चने आलयार्चा गृह्यर्चा इति द्विविध मर्चनं, तत्र च आलयार्चा उत्कृष्टा इति कथ्यते[2]।

श्रियः पतेः पूजा मानसपूजा होमपूजा बेरपूजाचेति प्रतिपाद्यते। शंखचक्राद्यायुधस्य नारायणस्य मनसा ध्यानरूपम् अर्चनं मानसपूजा, अग्नीनाधाय अध्वरेषु ऋत्विग्भ्यः यज्ञपुरुषस्य अर्चनं होमपूजा, लक्षणयुक्तां विष्णोः प्रतिमां कृत्वा देवालयेषु स्वगृहे वा प्रतिष्ठाप्य भक्तिपूर्वकं क्रियमाणं नित्याराधनं बेरपूजा इति, तेषु बेरार्चनमेव श्रेष्ठमिति च खिलाधिकारे[3] निर्दिश्यते। ग्रन्था[4]न्तरेष्वपि समूर्तार्चनम् अमूर्तार्चनमिति अर्चनायाः द्वैविध्यमुपवर्ण्यते। तत्र अमूर्तार्चनम् अग्नौ होमः, समूर्तार्चनं बेरपूजा इति निर्दिष्टम्।

समूर्तार्चनम् अग्निहोत्रसदृशमिति प्रतिपाद्यते[5]। अग्न्यागारे अग्नेः प्रतिष्ठा इव देवालयस्य भगवद्बिम्बप्रतिष्ठा भवति। अग्न्यायतने गार्हपत्य- आहवनीय - अन्वाहार्य - आवसथ्य - सभ्यसंज्ञकाः पञ्चाग्नय इव, ध्रुव - कौतुक-स्नपन-उत्सव-बलि संज्ञकानि पञ्चबेराणि देवालये भवन्ति। नित्याग्निहोत्रतुल्यं नित्यार्चनम्। दर्शपूर्णमासज्योतिष्टोमादि सदृशाः स्नपनमहोत्सवादयः। तस्मात् समूर्तार्चनम् अग्निहोत्रसदृशं भवति।

समूर्तार्चनस्य चक्षुर्मनसोः प्रीतिजनकत्वात् पुष्पाद्युपचारपूर्वकं पूजायां सुकरत्वाच्च तदेव श्रेष्ठमिति वैखानसाः अभिप्रयन्ति। यजमानाभावेऽपि अविच्छिन्नं समूर्तार्चनम् अमूर्तार्चनापेक्षया श्रैष्ठ्यम् इति विमानार्चनाकल्पे[6] प्रतिपाद्यते।

---

1. अर्चनाविवेकः लक्ष्मीनरसिंहभट्टः विमर्शः *Vol. Part I - 1972 Kendriya Sanskrit Vidyapeetha, Tirupati p.42.*
2. स. 1,35-7 3. खि 2,30 4. ज्ञा. पृ.3, य, 1,10
5. मूर्तिपूजा वैखानसागमश्च डा.एन्.एस्.रामानुजताताचार्यः *The Sanskrit Academy, Diamond Jubilee commemoration Vol. Madras 1990.* पृ.39
6. तदाराधनं द्विविधम् - अमूर्तं समूर्तमिति। अग्नौ हुतममूर्तम् प्रतिमाराधनं समूर्तं तच्छ्रेष्ठं, यजमानाभावेऽपि अविच्छिन्नं भवति। वि.पृ.5

ग्रामादीनां निर्माणम्

वैखानसग्रन्थेषु आलयनिर्माण विषयको भागः अधिकतया उपलभ्यते। ग्रामनगरादिनिर्माणं विविधाकृतीनां देवालयनिर्माणादिकं च तेषु ग्रन्थेषु विस्तृततया निर्दिश्यते।

ग्रामादीनां वास्तुभेदाः

ग्राम-अग्रहार-नगर-पत्तन-खर्वट-कुटिक-सेनामुख-राजधानी-शिबिरा इति ग्रामादीनि वास्तूनि नवसंख्याकानि भवन्ति।

ग्रामादीनां स्वरूपम्

तत्र विप्राणां भृत्यानां च निवासः ग्रामः।
विप्रमुख्यानां निवासः अग्रहारः।
अनेकजनसंबाधम् अनेकशिल्पिजनक्रयविक्रयाधिष्ठितं
सर्वदेवतासंयुक्तं नगरम्।
द्वीपान्तरगतद्रव्यक्रयविक्रयाधिष्ठितं पत्तनम्।
उभयसम्मिश्रं खर्वटम्।
सपरिवारकैकग्रामणीकं कुटिकम्।
सर्वजातिसमाकीर्णं नृपवेश्मसमायुतं सेनामुखम्।
चतुरङ्गसमाकीर्णा नृपतद्भृत्यजुष्टा राजधानी।
नृपसेनाचमूनाथनिवेशनं शिबिरम्।
इति वास्तुभेदानां ग्रामादीनां स्वरूपं वैखानसग्रन्थेषु[1] उपलभ्यते।

ग्रामादिवास्तुपदकल्पनम्

ग्रामादौ विष्ण्वर्चनार्थं पदकल्पनं विमानार्चनाकल्पे[2] वर्ण्यते। तत्र चतुष्षष्टिपदम् एकाशीतिपदं षट्पञ्चाशदुत्तरद्विशतपदं वा कारयेदिति निर्दिश्यते। तेषु एकाशीतिपदकल्पनं यथा -

1. वि.पृ.9 ज्ञा.पृ.23 2. पृ.7

उ

जवन	नाग	मुख्य	भल्लाट	सोम	अर्गल	अदिति	सूरिदेव	ईशन्
रोग								पर्जन्य
		रुद्र-रुद्राज		धनद		आप-आपवत्स		
शोषण								जयन्त
असुर								महेन्द्र
सरित्पति		पाशभृत्		ब्रह्मन्		अर्यमन्		आदित्य
पुष्पदन्त								सत्यक
सुग्रीव								भृश
		इन्द्र- इन्द्राज		दण्डधर		सवितृ-सावित्र		
दौवारिक								अन्तरिक्ष
निर्ऋति	ऋषि	भृङ्गराज	गन्धर्व	यम	ग्रहक्षत	वितथ	उष्णांशु	अग्नि

प

द

ग्रामादीनां विन्यासे मानविवेकः

अङ्गुष्ठप्रदेशिन्याभ्यां मितं प्रादेशं,
अङ्गुष्ठमध्यमाभ्यां मितं तालं,
अङ्गुष्ठ अनामिकाभ्यां मितं वितस्तिः,
अङ्गुष्ठ कनिष्ठिकाभ्यां मितं गोकर्णं,
मानाङ्गुलेन चतुर्विंशत्यङ्गुलं किष्कुः,
पञ्चविंशत्यङ्गुलं प्राजापत्यं,
षड्विंशत्यङ्गुलं धनुर्ग्रहं,
सप्तविंशत्यङ्गुलं धनु र्मुष्टिः

तस्य चतुर्गुणः दण्डः इति ग्रामादीनां विन्यासे मानविवेकः विमानार्चनाकल्पे[1] यज्ञाधिकारे[2] च एकरूपतया विव्रियते।

अर्चकादीनां स्थानानि

ग्रामनिर्माणे अर्चकादीनां वासाय स्थानानि निर्धिष्टानि भवन्ति। तदेतत्-

आलयस्य पार्श्वे अर्चकानां स्थानं, नाभ्यैशान्यां सभास्थानम्, आग्नेय्यां गोष्ठागारं, नैर्ऋत्याम् आपणं, पैशाचबाह्ये प्राच्यां कुलाल - ऊर्ध्वनापिताम्भष्ठानां स्थानं, याम्ये तन्तुवायचक्रिणां स्थानं, वारुणे वणिजां, सौम्ये द्विजभृत्यानां वादित्रजीविनाञ्च स्थानम्, आग्नेय्यां क्रोशमात्रे तक्षकादीनां स्थानं, नैर्ऋत्ये गव्यूतिमात्रे चण्डालपक्कणं, वायव्ये मृगव्याधशाकुनिकाधोनापितानां स्थानं पैशाचाद्बाह्यतः प्राकारपरिघे ऐशान्यां नदीतीरे दूरे वा ग्रामायामसमं श्मशानस्य स्थानं, वारुण्यां तटाकस्य स्थानं च परिकल्पनीयमिति विमानार्चनाकल्पे[3] ज्ञानकाण्डे[4] च उपवर्ण्यते।

ग्रामे शङ्करादीनां देवानां स्थानानि

ग्रामे ऐशान्यां प्राङ्मुखं शङ्करस्य आलयं, वारुण्यां प्राङ्मुखं विष्णोरालयं

---

1. पृ.158   2. 19-25,7
3. पृ.12   4. पृ.31

स्थितमासीनं ना, आदित्ये प्रात्यङ्मुखं भास्करस्यालयं, याम्ये विन्ध्यवासिन्याः प्राङ्मुखं, भृशे विघ्नेशस्य, सुग्रीवे कुमारस्य, अदितौ मातृकोष्ठस्य, जयन्ते दौवारिके वा कृष्णस्य, पुष्पदन्ते शोषणे वा राघवस्य, महेन्द्रे महामत्स्यस्य, सत्यके कूर्मस्य, नैर्ऋते वराहस्य, जवने अन्तरिक्षे वा नृसिंहस्य, नागे वामनस्य त्रिविक्रमस्य च, गन्धर्वे बलभद्रस्य, मुख्ये परशुपाणेः, सूरिदेवे कल्किनः, सोमे शयानस्य, ग्रहक्षते दैविकवासुदेवस्य, वितथे मानुषवासुदेवस्य, उष्णांशे आदिमूर्तेः, ग्रामाद्बाह्ये पञ्चवीराणां, ग्राममध्ये दिक्षु विदिक्षु सर्वत्र स्थितस्य आसीनस्य शयानस्य यानकस्य वा ध्रुवकौतुकस्य ध्रुवार्चायाःवा स्थानानि परिकल्पनीयानि इति विमानार्चनाकल्पे[1] प्रतिपाद्यते। प्रकीर्णाधिकारे[2] तु पश्चिमे केशवस्य, ईशाने शङ्करस्य स्थानं प्रकल्पयेदिति निर्दिश्यते।

आलयनिर्माणम्

आलयनिर्माणद्वारा बिम्बप्रतिष्ठाकरणेन सुकृतिर्लभ्यत इति आस्तिका मन्यन्ते। देवालय निर्माणं धार्मिककर्तव्यत्वेन परिगणयन्तस्ते। धर्ममार्गमनुसरन्तः प्रमुखान् नियमान् परिपालयन्ति। तेषु देवालयनिर्माणेच्छुकः यजमानः, प्रथमम् आचार्यं वृणुयात्।

आचार्यः

शास्त्राणामर्थज्ञानपूर्वकमुपदेशद्वारा सम्प्रदायस्य स्थापकः आचार्यो भवति। देवालयनिर्माणे गुरोः महिमा वैखानसग्रन्थेषु बहुधा उपवर्णितो दृश्यते। तथाहि-

सर्वकार्योपदेशकः देवालयाराधने निष्णातः ज्ञानोत्कटःजितेन्द्रियः वास्तुशास्त्रज्ञः नित्यध्यानपरः निश्चलः वेदवित् गृहस्थः अदम्भः वैष्णवः वैखानसवंशे जातः आचार्यः स्यात्। एतादृशः आचार्यः देवालयनिर्माणकर्तव्यं वहेत्। दीक्षाबद्धः सः यजमानेन वृतः देवालयनिर्माणे प्रवृत्तः स्यात्[3]। अयं च आचार्यः कर्षणादिप्रतिष्ठान्तानि कर्माणि नित्यार्चन-स्नपन-उत्सव-प्रायश्चित - विशेषार्चनादीनि च कुर्यात्।

एतादृशास्याचार्यस्याभावे तस्य पुत्रं पौत्रं नप्तारं तद्वंशजं शिष्यं प्रशिष्यं

---

1. पृ.8 2. 3,27 3. वि.पृ.5-6

वा यजमानः वृणुयादिति विमानार्चनाकल्पे[1] निर्दिश्यते। तथैव क्रियाधिकारे[2]ऽपि प्रतिपाद्यते।

हीनदीर्घानतिरिक्ताङ्गान् मधुमेहादिव्याधियुतान् पाषण्डान् वेददूषकान् अतिवृद्धातिबालान् अर्थलुब्धान् विरूपान् शास्त्रान्तरपारङ्गतान् देवतान्तरभक्तान् नास्तिकभ्रान्तचित्तशठादीन् आचार्यान् न वृणुयादिति वैखानसग्रन्थेषु[3] एकरूपतया प्रतिपाद्यते।

तक्षकः (शिल्पी)

देवालयनिर्माणे शिल्पशास्त्रज्ञस्य लक्षणसंपन्नस्य हर्म्यागारादि निर्माण कुशलस्य च आवश्यकता वर्तते[4], देवालयनिर्मापकाः प्रतिमानिर्मापकाश्च शिल्पि पदेन अभिधीयन्ते। क्रियाभेदेन कुलाल-पारशव-तक्षक इति व्यपदिश्यमानाः शिल्पिनः त्रिविधाः भवन्ति। त्रैवस्तुकानि बेराणि, चित्रकर्मज्ञः विमानोर्ध्वे सुधाकर्मकर्ता कुलाल इति, पटाद्याभासकरणे निपुणः पारशव इति, लोहाश्मदारुबेराणां निर्माता, अष्टबन्धनक्रिया विशेषज्ञः, ग्रामादिवास्तुविन्यासे कुशलस्य तक्षक इति चाभिधीयते[5]।

नदीतीरे समुद्रतीरे पर्वतसानौ तटाकपार्श्वे आरामसमीपे विविक्तेदेशे देवालयः निर्मातव्य[6] इति प्रतिपाद्यते। वैखानसागमे आल्यनिर्माणयोग्यां भूमिम् आचार्यः यजमानेन साकं प्रथमं निर्धारयति। सा भूमिः ऋषिमुनिसम्पर्केण पवित्रक्षेत्रत्वेन परिगणिता स्यात्।

भूपरीक्षा

शब्दगन्धवर्णादिभिः भूपरीक्षा कार्या।

ग्राह्या भूमिः

चतुरश्रा आयताश्रा प्रागानता उत्तरानता समा सुशब्दध्वनियुता

---

1. पृ. 454 2. 2,10-12
3. वि.पृ.203, स.2,6-8, ज्ञा.पृ.103, खि.2,41-4
4. वि.पृ.6 5. क्रि.2,18-21 6. वि.पृ.8

सुगन्धसंयुक्ता क्षीरवृक्षतुलसी[1]कुशदर्भादिसंयुक्ता पद्मसरसी[2]युता श्वेतरक्तपीतकृष्णवर्णयुक्ता[3] वृषगजधेनुछत्रचामरादि शुभनिमित्त[4]संयुक्ता भूमिः ग्राह्या इति वैखानसागमे उपपाद्यते।

अग्राह्या भूमिः

प्रतिलोमादिवासयुक्ता मूषकपालास्थिपाषाणशर्करादिसंयुक्ता तुषकेशान्विता अन्यैः दुर्निमित्तैः संयुक्ता भूमिः देवालयनिर्माणार्थम् अग्राह्या[5] भवति।

कर्षणविधिः

आलयनिर्माणयोग्यभूमौ कर्षणविधिः प्रतिपाद्यते। तत्र कर्षणकालः युगलाङ्गलादीनां लक्षणं कर्षणप्रकारः बीजावापनं पदकल्पनविधिः इत्येते अंशाः अन्तर्भवन्ति।

कर्षणकालः

आलयनिर्माणार्थभूमेः कर्षणकालः वैखानसग्रन्थेषु एकरूपतया नोपवर्ण्यते। तथा हि -

मार्गशीर्षादिमासेषु यथोद्दिष्टेमासे शुक्लपक्षे यजमानानुकूले नक्षत्रे कर्षणं कार्यमिति कर्षणकालः विमानार्चनाकल्पे[6] कथ्यते चेत् क्रियाधिकारे[7] आषाढादिषट्सु मासेषु यजमानानुकूले दिने कर्षणं समाचरेदिति विशेषो दृश्यते। खिलाधिकारे[8] तु वृश्चिके मासे विशेषतः शुक्लपक्षे कर्षणं कुर्यादिति कर्षणस्यकालः प्रतिपादितः।

युगलाङ्गलादीनां लक्षणम्

कर्षणविधौ अपेक्षितानां युगलाङ्गलादीनां लक्षणमपि वैखानसग्रन्थेषु नैकरूपतया निर्दिश्यते। यथा युगं द्विषट्प्रादेशं क्षिणियं पञ्चतालं, हल

---

1. वि.पृ.6 2. स.2,12 3. प्र.1,24
4. ज्ञा.पृ.21 5. वि.पृ.7, ज्ञा.पृ.22 6. पृ.13
7. 2,25 8. 3,1-2

चतुस्तालम्, ऋषिं पञ्चप्रादेशम्, अङ्गुलि परीणाहं प्रतोदं कुर्यादिति विमानार्चनाकल्पे[1] युगलाङ्गलादीनां लक्षणं प्रतिपाद्यते । ज्ञानकाण्डे[2] तु युगं नवतालायतम् हलं पञ्चतालायामं, क्षिणियं द्वादशतालायतम्, ऋषिं चतुस्तालायामं कुर्यादिति युगलाङ्गलादीनां लक्षणमुच्यते । यद्यपि खिलाधिकारे[3] हलादीनां लक्षणं ज्ञानकाण्डवदुच्यते तथापि युगं द्वादशतालं विंशदङ्गुलमायाममिति युगस्य लक्षणं भिन्नतया उपवर्ण्यते । समूर्तार्चनाधिकरणे[4] तु युगादीनां लक्षणं खिलाधिकार-मनुसरति ।

वृषभौ

ब्राह्मणः यजमानश्चेत् श्वेतवर्णौ वृषौ क्षत्रियस्य रक्तवर्णौ वैश्यस्य पीतवर्णौ शूद्रस्य कृष्णवर्णौ मिश्रवर्णौ वा संगृह्य स्वर्णश्रृङ्गेण रौप्यखुरेण च अलङ्कुर्यात्[5] ।

रज्जुः

मौञ्जीमयः धातकीवल्कः कैतकः मौञ्जीमयाः पाशाः ब्राह्मण-क्षत्रिय-वैश्य-शूद्राणां क्रमेण विधीयते[6] ।

कर्षणम्

आचार्यः यजमानेन साकम् आलयनिर्माणार्थभुवं प्रविश्य प्रपां निर्माय तन्मध्ये विष्वक्सेनं दक्षिणे चक्रम् उत्तरे गरुडञ्च धान्यपीठे समावाह्य गरुडादीनां मुद्गान्नादीनि निवेद्य अभिमुखे वृषौ प्राङ्मुखौ संस्थाप्य आचार्यः भुवं पश्चिमादित्रिरेखां कर्षयेत् । ततः कर्षकः समग्रां भुवं कर्षयेत् । कृष्टायां भूमौ व्रीह्यादीनि वापयेत् । प्ररोहितानि सस्यानि गोगणेभ्यः निवेदयत्[7] ।

त्वरितमालयनिर्माणेच्छुकस्य बीजावापनादिना कालातिक्रमण मसहमानस्य गोगणेभ्यः तृणमात्र निवेदनमेव कथ्यते[8] ।

पददेवताकल्पनम्

आलयनिर्माणार्थभूमौ पदविभागपूर्वकं वास्तुदेवतापूजनं स्पष्टतया

---

1. पृ.13 2. पृ.41 3. 3,15-6
4. 3,6-7 5. खि.3,18-20 6. खि.3,21-2
7. वि.पृ.14 8. वि.पृ.15

विमानार्चनाकल्पे[1] प्रतिपाद्यते। तद्यथा — प्रागन्तैश्चोत्तरान्तैश्च दशभिः सूत्रैः निर्मितेषु एकाशीतिपदेषु मध्ये नवानि पदानि ब्रह्मणः, प्रागादि चतसृषु दिक्षु अर्यमदण्डधरपाशभृतधनदानां पृथक् पृथक् षट्पदानि, आग्नेयादिकोणेषु सवितृसावित्रयोः इन्द्रइन्द्राजयोः रुद्ररुद्राजयोः आपआपवत्सयोश्च द्वयोर्द्वयोश्चत्वारि पदानि, ईश पर्जन्य जयन्त महेन्द्र आदित्यसत्यक भृश अन्तरिक्ष अग्नि उष्णांशु पूष वितथ ग्रहक्षत यम गन्धर्व भृङ्गराज ऋषि निर्ऋति दौवारिक सुग्रीव पुष्पदन्त सरित्पति असुर शोषण योग जवन नाग मुख्य भल्लाट सोमअर्गलादिति सूर्यदेवानां द्वात्रिंशत् पदानि कृत्वा तेषु तत्तत् देवानां बलिपूर्वकमर्चनं प्रतिपाद्यते।

ज्ञानकाण्डे[2] तु एकाशीति पदेषु मध्ये पदे ब्रह्मणः स्थानमेकं विभज्य परितः अष्टसु पदेषु भृग्वङ्गिरसादि ऋषीणां स्थापनं, आग्नेयादि कोणेषु चरकी-देवतारी-पूतना-पापराक्षसीति चतसृणां पिशाचानां पृथक् पृथक् पदद्वयकल्पनमपि विशेषतया दृश्यते।

खिलाधिकार[3] समूर्तार्चनाधिकरण[4] ग्रन्थयोः चतुष्षष्टिपदकल्पनं, तत्र नामनिर्देशपूर्वकदेवताह्वानं बलिप्रदानं च प्रकारान्तरेण उपवर्ण्यते।

तरुणालयप्रकारः

देवालयनिर्माणात्प्रक् तरुणालयं निर्माय तत्र भगवतः पूजनं कर्तव्यमिति वैखानसग्रन्थेषु निर्दिश्यते। बालागारे भगवत्पूजनपूर्वकमालयनिर्माणं सामृतमिति, बालागारं विनां आलयनिर्माणं हारकमिति द्विधा वैखानसग्रन्थेषु[5] आलयनिर्माणं निर्दिश्यते।

---

1. वि.पृ.15 2. पृ.44 3. 3,71-82 4. 5,9
द्वात्रिंशत् पददेवता परिगणनावसरे समूर्तार्चनाधिकरणे पूषन् इति देवता ज्ञानकाण्डे उष्णांशुः इति देवता च नैव निर्दिश्यते। अतः पूषन् उष्णांशुः इति द्वे नामनी एकस्याः देवतायाः संज्ञास्यादिति मया अभ्यूह्यते। विमानार्चनाकल्पे खिलाधिकारे च पूषन् उष्णंशुः इति द्वे नामनी एकस्याः देवतायाः एवं स्यात्। तथा परिगणने एव द्वात्रिंशत् पददेवताः संपद्यन्ते।
5. खि.2,75-110, ज्ञा.पृ.41

विमानार्चनाकल्पानुरोधेन पददेवताकल्पनम्

उ

प

<table>
<tr><td>जवन</td><td>नाग</td><td>मुख्य</td><td>भल्लाट</td><td>सोम</td><td>अर्गल</td><td>अदिति</td><td>सूरिदेव</td><td>ईशन्</td></tr>
<tr><td>रोग</td><td colspan="2" rowspan="2">रुद्र-रुद्राज</td><td colspan="3" rowspan="2">धनद</td><td colspan="2" rowspan="2">आप-आपवत्स</td><td>पर्जन्य</td></tr>
<tr><td>शोषण</td><td>जयन्त</td></tr>
<tr><td>असुर</td><td colspan="2" rowspan="3">पाशभृत्</td><td colspan="3" rowspan="3">ब्रह्मन्</td><td colspan="2" rowspan="3">अर्यमन्</td><td>महेन्द्र</td></tr>
<tr><td>सरित्पति</td><td>आदित्य</td></tr>
<tr><td>पुष्पदन्त</td><td>सत्यक</td></tr>
<tr><td>सुग्रीव</td><td colspan="2" rowspan="2">इन्द्र- इन्द्राज</td><td colspan="3" rowspan="2">दण्डधर</td><td colspan="2" rowspan="2">सवितृ-सावित्र</td><td>भृश</td></tr>
<tr><td>दौवारिक</td><td>अन्तरिक्ष</td></tr>
<tr><td>निर्ऋति</td><td>ऋषि</td><td>भृङ्गराज</td><td>गन्धर्व</td><td>यम</td><td>ग्रहक्षत</td><td>वितथ</td><td>उष्णांशु</td><td>अग्नि</td></tr>
</table>

पू

द

ज्ञानकाण्डानुरोधेन पददेवताकल्पनम्

उ

प पू

<table>
<tr><td>वायु</td><td>नाग</td><td>मुख्य</td><td>भल्लाट</td><td>सोम</td><td>अर्गल</td><td>अदिति</td><td>सूरिदेव</td><td>ईशन्</td></tr>
<tr><td>रोग</td><td colspan="2">पूतना</td><td colspan="3" rowspan="2">धनद</td><td colspan="2">पापराक्षसी</td><td>पर्जन्य</td></tr>
<tr><td>शोषण</td><td colspan="2">रुद्र-रुद्राज</td><td colspan="2">आप-आपवत्स</td><td>जयन्त</td></tr>
<tr><td>असुर</td><td colspan="2" rowspan="3">पाशभृत्</td><td>क्रतु</td><td>मरीचि</td><td>वसिष्ठ</td><td colspan="2" rowspan="3">अर्यमन्</td><td>महेन्द्र</td></tr>
<tr><td>वरुण</td><td>पुलस्त्यः</td><td>ब्रह्मन्</td><td>भृगु</td><td>आदित्य</td></tr>
<tr><td>पुष्पदन्त</td><td>पुलः</td><td>अत्रि</td><td>अङ्गिरस्</td><td>सत्यक</td></tr>
<tr><td>सुग्रीव</td><td colspan="2">इन्द्र- इन्द्राज</td><td colspan="3" rowspan="2">दण्डधर</td><td colspan="2">सवितृ-सावित्र</td><td>अन्तरिक्ष</td></tr>
<tr><td>दौवारिक</td><td colspan="2">देवतारी</td><td colspan="2">चरकी</td><td>भृश</td></tr>
<tr><td>निर्ऋति</td><td>ऋषि</td><td>भृङ्गराज</td><td>गन्धर्व</td><td>यम</td><td>ग्रहक्षत</td><td>वितथ</td><td>पूषन्</td><td>अग्नि</td></tr>
</table>

द

समूर्तार्चनाधिकरणानुरोधेन खिलाधिकारानुसरणेन च पददेवताकल्पनम्

उ

जवन	नाग	मुख्य	भल्लाट	सोम	अर्गल	अदिति	सूरिदेव	ईशन्
रोग	रुद्र-रुद्राज			धनद		आप-आपवत्स		पर्जन्य
शोषण								जयन्त
असुर								महेन्द्र
सरित्पति	पाशभृत्			ब्रह्मन्		अर्यमन्		आदित्य
पुष्पदन्त								सत्यक
सुग्रीव	इन्द्र- इन्द्राज			दण्डधर		सवितृ-सावित्र		भृश
दौवारिक								अन्तरिक्ष
निर्ऋति	ऋषि	भृङ्गराज	गन्धर्व	यम	ग्रहक्षत	उष्णांशु	वितथ	अग्नि

पू

द

तरुणालयनिर्माणविधौ तरूणालयस्य योग्यं स्थानं, बालबेरनिर्माण प्रकारः, तत्प्रतिष्ठाविधिश्चेत्यंशाः अन्तर्भवन्ति।

तरुणालयस्य स्थानम्

आलयनिर्माणयोग्य भूमेः ऐशान्याम्, इन्द्रसूत्रात् उत्तरस्याम्, उत्तरस्यां, वायव्यां वा दिशि द्वितीयावरणे तृतीयावरणे वा तरुणालयस्य स्थानं विमानार्चनाकल्पे[1] निर्दिश्यते। [2]यज्ञाधिकारे तु ऐशान्याम् ऐन्द्र्याम् उत्तरस्यां पश्चिमायां वा तथा प्रथमावरणे द्वितीयावरणे वा बालालयः कल्पनीय इति प्रतिपाद्यते।

तरुणालयनिर्माणम्

तरुणालयं मृदा दारुणा वा निर्मापयेत्। इष्टकाभिः शिलाभिः नैव निर्मापयेदिति ज्ञानकाण्डे[3] बालालयस्य उपादानद्रव्यं कथ्यते। समूर्तार्चनाधिकरणे[4] तु मृदा निर्मापयेदिति उच्यते। यज्ञाधिकारे[5] पुनः शिलायाः एव निषेधः न तु इष्टकायाः। विमानार्चनाकल्पे[6] बालालयस्य लुपोपरि तृणैः लोष्ठैर्वा इत्याच्छादनं कुर्यादिति उच्यते। त्रिहस्तादि त्रित्रिहस्तान्तं तरुणालयं कुर्यादिति बालालयस्य प्रमाणं विमानार्चनाकल्पे[7] दृश्यते। मूलालयस्य द्वारमिव तरुणालयस्याऽपि द्वारं भवति। बाललयनिर्माणे प्रथमेष्टकान्यासः गर्भन्यासश्च न विधीयते[8]।

बालबिम्बनिर्माणम्

सुवर्ण-रजत-ताम्र-दारवः बालबिम्बस्य उपादानद्रव्याणि भवन्ति[9]। समूर्तार्चनाधिकरणे[10] तु अश्वत्थेन ध्रुवबेरोक्तदारुणा वा बालबिम्बं कुर्यादिति निर्दिश्यते। विमानार्चनाकल्पे[11] तु लोहविशेषाः नैव निर्दिश्यन्ते। परं खदिरासनचम्पकार्जुनपनसवकुलमधूकाश्वत्थबिल्वशमीदारुविशेषाः बालबिम्बस्योपादान द्रव्यतया निर्दिश्यन्ते[12]।

---

1. पृ.16
2. 5,1-2
3. पृ.46
4. 4,3
5. 5,6
6. पृ.17
7. पृ.16
8. य.5,7
9. य.5,13
10. 4,9
11. पृ.17
12. *Ibid*

मानाङ्गुलेन सप्ताङ्गुलं नवाङ्गुलम् एकादशाङ्गुलम् त्रयोदशाङ्गुलं वा देवीभ्यां सहितं रहितं वा स्थितमासीनं वा कारयेदिति विमानार्चनाकल्पे[1] कथ्यते।

बालबिम्बप्रतिष्ठा

बालालयप्रतिष्ठा सुमुहूर्ते सुनक्षत्रे कारयेत्। बाललयप्रतिष्ठायाम् आचार्यः मन्त्रकल्प विचक्षणः वैखानसवित् स्यात्। स्थापन दिवसात्पूर्वं नवमे सप्तमे पञ्चमे त्र्यहे वा अङ्कुरानर्पयेत्। वास्तुहोमानन्तरं बालबिम्बस्य नेत्रोन्मीलनं कृत्वा अधिवासयेत्। यागशालां निर्माय शय्यावेदिं स्नानवेदिं च कृत्वा पञ्चाग्नीन् कल्पयेत्। ततः पक्वबिम्बफलाकारं कुम्भमादाय नादेयवारिभिः कुम्भमापूर्य सौवर्णम् अष्टमङ्गलवर्णचिह्नानि रत्नानि च क्षिप्त्वा अलङ्कृत्य कुम्भं पूजयेत्। पञ्चविंशद्भिः कलशैः स्नपनोक्तक्रमेण बिम्बं स्नापयेत्। प्रतिसरं बद्ध्वा शय्यावेद्यां बिम्बम् अधिवासयेत्। प्रभाते आचार्यः देवमुत्थाप्य अष्टोपचारैः अभ्यर्चयेत्। ततः बिम्बं बालालयाभ्यन्तरं प्रवेश्य बिम्बं संस्थाप्य देवमावाहयेत्। इयमेव बालबिम्बप्रतिष्ठा[2]।

आवाहनविसर्गौ विनैव विधिपूर्वकं नित्यार्चनं कुर्यात्[3]।

आद्येष्टका न्यासः

आलयनिर्माणार्थभूमौ आद्येष्टकान्यासः वैखानसागमे विशदतया उपपाद्यते। तत्र आद्येष्टकान्यासस्य कालनिर्णयः आद्येष्टकास्थापनस्य स्थानम्, आद्येष्टकान्यासप्रकारश्च इत्यंशाः अन्तर्भवन्ति।

आद्येष्टकाकालनिर्णयः

मासेषु फाल्गुनचैत्रवैशाखपुष्यज्येष्ठाः उत्तमाः इति, श्रावण आषाढकार्तीक आश्वयुजः मध्यमाः इति अवशिष्टमासत्रयमधमम् इति, नक्षत्रेषु श्रवणं रोहिणी उत्तरफल्गुनी हस्त स्वाती पुनर्वसू शतभिषक् अनूराधा इत्येतेषु नक्षत्रेषु यजमानानुकूलं नक्षत्रं संग्राह्यमिति विमानार्चनाकल्पे[4] आद्येष्टकान्यासस्य कालनिर्णयः प्रतिपाद्यते।

---

1. पृ.17 2. वि.पृ.18,9
3. वि.पृ.20 4. पृ.24

समूर्तार्चनाधिकरण[1] खिलाधिकार[2]ग्रन्थयोः मार्गशीर्षमाघौ द्वौ आद्येष्टकान्यासस्य निन्दितौ इत्युच्यते। उत्तरायणम् आद्येष्टकान्यासस्य श्रेष्ठः कालइति खिलाधिकारः[3] वक्ति।

आद्येष्टकास्थापनस्य स्थानम्

गर्भालयद्वारस्य दक्षिणे भागे आद्येष्टकान्यासः कर्तव्यः[4]।

आद्येष्टकालक्षणम्

आद्येष्टका शिलया इष्टकया वा निर्मातव्या। युग्मायुग्महस्तविमानानां तद्धस्तं प्रति त्र्यङ्गुलं द्व्यङ्गुलं वा वर्धयेत्। अङ्गुलीसंख्यासमायामं तस्यार्धविस्तारम् अर्धबाहुल्यम् अथवा त्र्यङ्गुलादि एकादशान्तम् एकाङ्गुल वृध्या विस्तारं नवधा भवति। तदर्धबाहुल्यविस्तारं द्विगुणायतम्। इत्थम् प्रथमेष्टकायाः लक्षणं विमानार्चनाकल्पे[5] दृश्यते।

आद्येष्टकान्यासप्रकारः

चतस्राः इष्टकाः आद्येष्टकान्यासे संग्राह्याः। आद्येष्टकान्यासकर्मणि आदौ अङ्कुरार्पणं कार्यम्। ततः प्रपां निर्माय तोरणाद्यैः अलङ्कृत्य पूर्वस्यां रात्रौ वास्तुहोमं विधाय चतस्रः इष्टकाः संस्नाप्य शय्यायाम् अधिवासयेत्। प्रभाते आचार्यः स्थपतिना सार्धं विमानं नित्यसूत्रं प्रसार्य द्वारं विदित्वा अभ्यन्तरद्वारदक्षिणे यमद्वयं हित्वा भित्तिमध्ये चतुरश्रमुपलिप्य नवभागं विभज्य प्रथमशिलेष्टकाग्रम् ऊर्ध्वाननम् आग्नेय्यां तत्पादं, याम्ये द्वितीयशिलेष्टकाग्रं नैर्ऋत्यां तत्पादं, वायव्ये तृतीयशिलेष्टकाग्रं वारुण्यां तत्पादम्, ऐशान्यां चतुर्थशिलेष्टकाग्रं सौम्ये तत्पादम् ऐन्द्याम्, इत्येवं प्रकारेण इष्टकाः निक्षिपेयुः इति विमानार्चनाकल्प[6] ग्रन्थे स्पष्टं विशदीक्रियते।

गर्भन्यासः

देवालय निर्माणार्थभूमौ गर्भगृहद्वारस्य दक्षिणे श्वभ्रं कृत्वा तत्र रत्नादिद्रव्ययुतस्य गर्भभाजनस्य निक्षेपणं गर्भन्यास इत्युच्यते।

---

1. 6,2
2. 4,2
3. 4,1
4. वि.पृ.27, क्रि.5,11, ज्ञा.पृ.58, स.6,31
5. पृ.25
6. पृ.26,8

गर्भन्यासस्य कालः

त्रिषूत्तरेषु रोहिण्यां स्वात्याञ्चैव पुनर्वसौ
चित्रायां मृगशीर्षे च अनूराधे तथैव च ।
नक्षत्रेष्वेषु हस्ते च गर्भप्रक्षेपणं चरेत्
तेषां शुभांशके चन्द्रे स्थिरराशौतु कारयेत्।
ग्रामस्य यजमानस्य चानुकूले दिने चरेत्।।

इति खिलाधिकारे[1] गर्भन्यासस्य कालः निर्दिश्यते।

गर्भभाजने निक्षेप्तुम् आहरणानि द्रव्याणि

श्रीवत्स- पूर्णकुम्भ- भेरी - आदर्श - मत्स्ययुग्म -अङ्कुश - शंख - आवर्तानीति अष्टौ मङ्गलानि, शंखचक्रगदाशार्ङ्गासि, एतानि स्वर्णनिर्मितानि पञ्चायुधानि, गजगरुडकच्छपाः हेमनिर्मिताः,

स्रुक् - स्रुव - कमण्डलु - जुहु - उपजुहु - उपभृत् - छत्र - चामर - अङ्कुश ध्वज - तुलातोद - युगलाङ्गलादीनि स्वर्णनिर्मितानि ब्राह्मणादि वर्णचिह्नानि,

हेम - रौप्य - ताम्र - आयसलोहानि,

पद्मोत्पल - कुमुद - कल्हार - कन्दानि, सुवर्ण - रजत - ताम्र - पित्तल- आयस - आरकूट-वृत्तलोह-वैकृत - त्रपु - सीसानि,

शालि - नीवारक - कङ्कमाष - कुलुत्थ - निष्पाव - तिलमुद्ग यवानि धान्यानि

मनश्शिला - हरिताल - अञ्जन - श्याम - सीस - सौराष्ट्र-गोरोचन - गौरिक - पारदानि धातूनि,

वज्र - मौक्तिक - वैदूर्य - स्फटिक - पुष्यक - चन्द्रकान्त-नील - ब्रह्ममणि प्रभृतीनि,

समुद्र - पर्वत - नदीतीर - वल्मीक - कुलीरवास - गजदन्तोद्भेद -

1. 5,18-20

वृषविषणोद्भेदाच्च आहता मृत्तिका[1] यज्ञोपवीतं - मौञ्जी - दण्डं - कुण्डिका - वेदी - कूर्च- स्रुव - आज्यस्थाली अन्यानि च यज्ञपात्राणि एतानि संग्रहेत्। विप्रः यजमानश्चेत् द्रव्याण्येतानि गर्भस्थापनार्थम् आहरणानि भवन्ति।

हार - मकुट - कुण्डल - अङ्गद - वलय- हस्तबन्ध-क्षौम - मेखलायुत- धनुः - चर्म-असि - खड्ग - प्राश - सवलयशङ्ख - चक्र-गदा - पाश - रथ - तुरग - भेरी - अङ्कुश - प्रतोद - योक्त्र-छत्र - पताक - अष्टमङ्गलानि द्रव्याणि क्षत्रियः यजमानश्चेत् आहरणानि स्युः।

वैश्यः यजमानश्चेत् तुला गर्भन्यासार्थम् आहरणद्रव्यविशेषम्।

शूद्रः यजमानश्चेत् स्वर्णविकाराणि हलयुगपशूनि गर्भन्यासार्थम् आहरणानि[2]।

फेला कल्पनम्

गर्भभाजनं फेला शब्देन उच्यते । फेलायाः कल्पनप्रकारः विमानार्चनाकल्पे[3] इत्थं कथ्यते।

"फेलायामविशालं त्रिपञ्चसप्तनवैकादश
त्रयोदश पञ्चदश सप्तदशैकोनविंशति
एकविंशति त्रयोविंशति पञ्चविंशति
अङ्गुलमेतत् यथाक्रमेण एकतलादि
द्वादशतलान्तं विमानानां गर्भभाजनं,
तद्वित्युच्चं तद्विस्तारसमम् अष्टांशोनं
षड्भागोनं पञ्चभागोनं वा तस्य
बाहुल्यं एकद्वित्रि चतुर्यवं नवकोष्ठयुतं
अच्छिद्रां रम्यां फेलां कारयति।
कोष्ठभित्युच्चं विस्तारार्धं त्रिभागैक-

1. वि.पृ.60-1, स.10,1-9
2. खि.5,39-45
3. पृ.61

भागं वा तत्पादानां यथोचितमर्ध
अङ्गुलिभित्युच्चं निर्वृणं वृत्तम्
चतुरश्रं वा शुद्धेन ताम्रेण वा कारयेत्।
अथवा तत्प्रासादविष्कम्भं तदष्टांशोनं
तत्पादहीनं वा फेलायामविशालमिति।"

फेलायां द्रव्यनिक्षेपणप्रकारः

ताम्रनिर्मितां फेलाम् आम्लेन शोधयेत्। समुद्र मृत्तिकां फेलायां परितः प्रक्षिपेत्। ऐन्द्र्यां दिशि पर्वतसम्बन्धिनीं मृत्तिकां, याम्यां दिशि तीर्थजां, पश्चिमायां नादेयाम्, उत्तरस्यां ह्रदजां विन्यसेत्। आग्नेय्यां कौलीश्वासां, नैर्ऋत्यां वाल्मीकीं, वायव्ये खलजाम्, ऐशान्यां हस्तिदन्तजां, ब्रह्मस्थाने वृषदक्षिण श्रृङ्गजां मृत्तिकां निक्षिपेत्। इन्द्रादिदिशि पद्ममूलादीनि वज्रादीनि रत्नानि च निक्षिपेत्। ब्रह्मणः स्थाने हिरण्यम् , ऐन्द्रे रजतं, याम्ये ताम्रं, वारुण्याम् आयसं, सौम्ये त्रपुनिक्षिपेत्। गरुड कूर्म शंख चक्रादीनि च एवमेव न्यसेत्। विदिक्षु मण्यादीनि संन्यसेत्। एतानि द्रव्याणि असाङ्कर्येण निक्षेप्तव्यानि। गर्भभाजनं वस्त्रेण वेष्टयित्वाधिवासयेत्।[1]

गर्भन्यासस्थानम्।

गर्भन्यासस्थानं विमानार्चनाकल्पे[2] यथा - अभ्यन्तरद्वारदक्षिणे स्तम्भ समीपे यजमानः ब्राह्मणश्चेत् पट्टिकोपरि, क्षत्रियश्चेत् कुमुदोपरिवैश्यश्चेत् जगत्युपरि, शूद्रश्चेत् पादुकोपरि गर्भन्यासस्य स्थानानि भवन्ति।

गर्भन्यासप्रकारः

आचार्यः यजमानेन साकं रात्रौ वाद्यघोषैस्सह प्रदक्षिणपूर्वकमालय निर्माणभूमिमासाद्य द्वारदक्षिणे स्तम्भसमीपे श्वभ्रे गर्भं संस्थापयेत्[3]।

गर्भनिक्षेपणफलम्

"यत्रैवस्थापयेद्गर्भं तत्र संपत्करं भवेत्
ग्रामशान्तिकरञ्चैव वेदानामपि बृंहणम्॥

---

1. वि.पृ.62 2. वि.पृ.63 3. Ibid.

एकतल-शान्तिक (चतुर्वर्ग)



Total 6

एकतल-शान्तिक (षड्वर्ग)



Total 8

एकतल-पौष्टिक



Total 9

एकतल-जयद



एकतल-अद्भुत



एकतल-सार्वकामिक



द्वितल-शान्तिक



द्वितल-पौष्टिक



त्रितल-शान्तिक



त्रितल-पौष्टिक



चतुस्तल-शान्तिक



चतुस्तल-पौष्टिक



क्षेत्राभिवृद्धिरधिकाधनधान्याभिवर्धनम् ।
तस्मात् सर्वप्रयत्नेन स्थापयेद्गर्भभाजनम् ॥"

इति खिलाधिकारे[1] गर्भनिक्षेपणफलं निर्दिश्यते ।

विमाननिर्माणविधिः

अधिष्ठानमारभ्य स्थूपिपर्यन्तो भागः विमानशब्देन व्यवह्रियते । तच्च विमानं नागर-द्राविड-वेसर संज्ञया त्रिविधम् । एतेषु त्रिषु नागर विमानं खुरादिस्थूपिकान्तं चतुरश्रतया वर्तते । वेसरविमानं तु समचतुरश्रं तदुपरि ग्रीवाशिखरे वर्तुले भवतः । द्राविडविमाने शिखरग्रीवे अष्टाश्रतया भवतः[2]।

विमानानि षण्णवतिसंख्यया विमानार्चनाकल्पे[3] ज्ञानकाण्डे[4] च निर्दिश्यन्ते। तेषां नामानि समूर्तार्चनाधिकरणे[5] दृश्यन्ते । तानि यथा -

पद्माकार-चित्रशिल्प-पर्वताकृतिक-चतुर्मुख-ब्रह्मवृत्त-प्रनलीन-गरुडाकार-ऊर्जालपत्रक-स्वस्तिक-श्रीप्रतिष्ठितिक- श्रीस्वस्तिक-नन्द्यावृत्त-श्रियावृत्त-महापद्म-गान्धारपञ्चक-उत्पलफुल्ल-नन्दीविशाल-अष्टाङ्ग-वृषभाकार-चतुस्फुट-भद्र-वृत्तमस्तकसन्धिक-अङ्गनाकार-पञ्जरमुख-वृत्तसौभद्रक-सर्वतोभद्रक-वृषभच्छन्द-उरगच्छन्द-कोण्डयावृत्ति-भूतवैहार-शुद्ध-अप्सरोमण्डप-दिव्यपञ्चवसन्तक-माहेन्द्र-स्वस्तिवृत्त-मायाबहुविकार-उत्पल-पङ्कलग्न-श्रीस्वस्तिकनिवेश-वापी-ब्रह्मसभा-उत्पलपत्रक-महापद्म-महाच्छन्द-देववृत्त-सोमच्छन्द-सोमवृत्त-बहुपत्र-सुपौष्टिक-श्रीवत्साकृतिक-घोण-छन्दवृत्त-वेदिका-सिद्धयोग-चतुर्वक्त्र-कूटाकार-विलोकन-कुम्भाकार-गान्धार-तिलक-शशिवृत्त-विशाल-बालेन्दुक-वेदिवृत्त-सोमघोण-चतुर्मुख-आह्निक-कीचक-यान-अग्निच्छन्द-उरग-हस्तिपृष्ठ-नैवृत्त-प्रमदालम्बक-त्रिवृत्-ऋषभ-मयूरवृत्त-त्रिकूट-शिल्पवृत्तक-गोधाङ्ग-मण्डूक-परिभ्रामणमस्तक-पाशिक-पङ्कलग्न-गगनेचर-शाह्निक्क-रसवृत्त-निर्बूंह-

---

1. 5,83-4
2. वि.पृ.29, य.8,55, प्र.5,17
3. पृ.28 विमानानां नामानि लक्षणानि वा विमानार्चनाकल्पे नैव दृश्यन्ते ।
4. पृ.63
5. 7,21-39

परिबृंहित-गान्धर्व-गगन-हरिच्छन्द-अनन्त-वैनतेय-भूताकार-इलावृत् इति। खिलाधिकारे तु विमानानि द्वात्रिंशत् संख्याया प्रतिपाद्यन्ते। तानि यथा-

नलीनक	
प्रलीनक-	तोय-
श्रियःस्थान-	उत्पलपत्र-
दिशाश्र-	सिंहछन्द-
नन्द्यावर्त-	सोमछन्द-
श्रीवृत्त-	मेनाकार-
पर्वताकृति-	शालीकरण-
महापद्म-	कर्णिकाकार-
नन्दीविशाल-	श्रियोऽलंकार -
स्वस्तिक-	कुम्भाकृति -
पूर्वरङ्गविशाल-	गोधामुख -
एकपाद-	पिञ्छावतंसक
गणिकाशाल-	चतुस्फुट
कुबेरछन्द्-	हस्त्याकार
वापी-	नागच्छन्द
प्रकृति-	वृषभच्छन्द-

कूटाकार इति[1] विमानानामेतेषां लक्षणानि च अत्रैव ग्रन्थे दृश्यन्ते।

विमानानि एकतलमारभ्य द्वादशतलं यावत् द्वादशभेदाः भवन्ति। तत्रापि एकैकमधिष्ठानादीनां मानानुरोधेन शान्तिक-पौष्टिक-जयद-अद्भुत सार्वकामिक भेदेन पञ्चधा भिद्यते[2]। तत्र

एकतलविमानं शान्तिकम्

एकतलविमानं एकभूमिविमानमिति च व्यवह्रियते। शान्तिकं विमानमिदमधिष्ठानं -पाद-प्रस्तर-ग्रीवा-शिखर-स्थूपिकेति षड्वर्गयुतम्,

1. खि.6,3-10 2. वि.पृ.33-4

अधिष्ठान-पाद-शिखर-स्थूपिकेति चतुर्वर्गयुतं वा स्यात्। तत्र षड्वर्गशान्तिक विमानम् अष्टांशं कृत्वा एकांशमधिष्ठानं, द्विगुणं स्तम्भायामम्, एकांशं प्रस्तरम् एकांशं कण्ठं, द्व्यंशं शिखरम्, एकांशं स्थूपिकोदयं भवेत्। चतुर्वर्गयुतं शान्तिक विमानं तु षडंशं कृत्वा एकांशम् अधिष्ठानं , द्व्यंशं पादतुङ्गं, द्व्यंशं शिखरम्, एकांशं स्थूपिकोदयं भवति।

एकतलविमानं पौष्टिकम्

उत्सेधं नवभागं कृत्वा एकांशमधिष्ठानं, पादाधिकद्व्यंशं पादायामं, पादार्धोनांशं प्रस्तरं, सपादांशं कण्ठं, पादोनत्र्यंशं शिखरं, स्थूपिका एकांशाचेति षड्वर्गयुतं पौष्टिकविमानं भवति।

एकतलविमानं जयदम्

उत्सेधं तु दशांशं कृत्वा एकांशमधिष्ठानं, द्व्यर्धांशं पादतुङ्गम्, एकंशं प्रस्तरं, सार्धमेकांशं कण्ठं, त्र्यंशं शिखरम्, एकांशं स्थूपितुङ्गं जयदविमानं भवति।

एकतलविमानमद्भुतम्

उत्सेधम् एकादशांशं कृत्वा सपादांशम् अधिष्ठानं, तद्द्विगुणं, स्तम्भायामं, प्रस्तरमेकांशं, सार्धांशं कण्ठं, त्र्यंर्धांशं शिखरं, सपादांशं स्थूपिकोदयं स्यात्। इदम् अद्भुतमेकतलविमानम्।

एकतलविमानं सार्वकामिकम्

उत्सेधं द्वादशांशं कृत्वा सपादांशमधिष्ठानं द्विगुणं स्तम्भायामं, सपादांशं प्रस्तरं, सपादांशं कण्ठम्, एकांशं प्रस्तरम्, एकांशं कण्ठं, पादोन त्र्यंशं शिखरम्, एकांशं स्थूपिकोदयम् एतत्सार्वकामिकमेकतलविमानं भवति।

एकतलविमाननिर्माणप्रकारः

अधिष्ठान - पाद - प्रस्तर - ग्रीव-शिखर-स्थूपिकान्येति षड्वर्गयुतं विमानं भवति। तत्र

अधिष्ठानम्

विमानाङ्गभूतमधिष्ठानम् अष्ठविधं भवति[1]। तानि च यथा -

1. वि.पृ.30

पादबन्धमधिष्ठानम्
पद्मबन्धमधिष्ठनम्
पुष्पबन्धमधिष्ठानम्
श्रीप्रियाम्बुजमधिष्ठानम्
प्रतिबन्धमधिष्ठानम्
प्रतिक्रममधिष्ठानम्
कपोतबन्धमधिष्ठानम्
श्रीबन्धमधिष्ठानम् इति। तेषु

पादबन्धमधिष्टानम्

अधिष्ठानस्य उत्सेधं त्रयोविंशति भागं कृत्वा जन्मतलस्योपरि खुरमेकांशं, जगति अष्टांशा, त्रिपट्टकुमुदं सप्तांशं, कम्पमेकांशं, कण्ठं द्व्यंशं, कम्पमेकांशं, महापट्टी द्व्यंशा ऊर्ध्वपट्टिका एकांशा चेत् पादबन्धम् अधिष्ठानं भवति।

पद्मबन्धमधिष्ठानम्

अधिष्ठानस्य उत्सेधं चतुर्विंशति भागं कृत्वा उपानमेकांशं, पद्मं द्व्यंशं, कम्पमेकांशं, जगती षडंशा, त्रिवर्गकुमुदं पञ्चांशं, कम्पमेकांशं, कण्ठं द्व्यंशं, कम्पमेकांशं, महापट्टिका द्व्यंशा, पद्ममेकांशं, पुनः पद्ममेकांशं, कम्पमेकांशं चेत् पद्मबन्धमधिष्ठानं स्यात्।

पुष्पबन्धमधिष्ठानम्

अधिष्ठानस्य उत्सेधं षड्विंशति (एकोनविंशति?) भागं कृत्वा खुरमेकांशं, पद्ममेकांशं, कम्पमेकांश, जगती पञ्चांशा, पद्ममेकांश, पुनः पद्ममेकांशं, जगती पञ्चांशा, पद्ममेकांशं, रन्ध्रमेकांशं, पद्ममेकांशं, पुनः पद्ममेकांशं, कम्पमेकांशं, कर्णं इत्यर्धांशं कम्पमेकांशं पद्ममेकांशं महापट्टिका इत्यर्धांशा पद्ममेकांशं कम्पमेकांशं चेत् पुष्पबन्धमधिष्ठानं भवेत्।


पादबन्धमधिष्ठानम्


पद्मबन्धमधिष्ठानम्



पुष्पबन्धमधिष्ठानम्



श्रीप्रियाम्बुजमधिष्ठानम्



प्रतिबन्धमधिष्ठानम्



प्रतिक्रममधिष्ठानम्


कपोतबन्धमधिष्ठानम्


श्रीबन्धमधिष्ठानम्

श्रीप्रियाम्बुजमधिष्ठानम्

अधिष्ठानस्य उत्सेधम् एकविंशति भागं कृत्वा पादुकमेकांशं, पद्मं पञ्चांशं, कर्णमेकांशं, दलमेकांशं, वृत्तं त्र्यंशं, कुमुदमेकांशं, पद्ममेकांशं, कुमुदं द्व्यंशं, कर्णमेकांशं कम्पमेकांशं, महापट्टिका द्व्यंशा, पद्ममेकांशं ऊर्ध्वपट्टिका एकांशा चेत् श्रीप्रियाम्बुजमधिष्ठानं भवति।

प्रतिबन्धमधिष्ठानम्

अधिष्ठानस्य उत्सेधम् अष्टादशांशं कृत्वा खुरमेकांशं, पद्ममेकांशं, जगती षडंशा, वृत्तं पञ्चांशं, कुमुदमेकांशं, आलिङ्ग मेकांशम्, अन्तरितं द्व्यंशं, प्रतिमुखमेकांशं चेत् प्रतिबन्धम् अधिष्ठानं भवति।

प्रतिक्रममधिष्ठानम्

अधिष्ठानस्य उत्सेधम् एकोनविंशति भागं कृत्वा, पादुकमेकांशं, जगती सप्तांशा, वृत्तं षडंशं, कुमुदम् एकांशम्, आलिङ्गमेकांशम्, अन्तरितं द्व्यंशं, प्रतिमुखमेकांशं चेत् प्रतिक्रममधिष्ठानं भवति।

कपोतबन्धमधिष्ठानम्

अधिष्ठानस्य उत्सेधं सप्तविंशति भागं कृत्वा पादुकं द्व्यंशं, पद्मं षडंशं, कण्ठमेकांशं, दलमेकांशं वृत्तकुमुदं त्र्यंशं, दलमेकांशं, कम्पमेकांशं, कण्ठं द्व्यंशं, कम्पमेकांशम् उपरिदलमेकांशं, कपोतं त्र्यंशम्, आलिङ्गमेकांशम्, अन्तरितमेकांशं, प्रतिमुखं द्व्यंशं, वाजनमेकांशं चेत् कपोतबन्धमधिष्ठानं भवेत्।

श्रीबन्धमधिष्ठानम्

अधिष्ठानस्य उत्सेधं द्वात्रिंशत् भागं विभज्य, उपानं द्व्यंशं, क्षुद्रोपानमेकांशं, पद्मं सप्तांशं, कर्णमेकांशं, दलमेकांशं, वृत्तं चतुरंशं, कुमुदमेकांशं, दलमेकांशं, कम्पं त्र्यंशं, कर्णमेकांशं, कम्पमेकांशं, पद्मं चतुरंशम्, कपोतमेकांशम्, आलिङ्गम् एकांशम् अन्तरितं द्व्यंशं, प्रतिमुखमेकांशं चेत् श्रीबन्धमधिष्ठानं स्यात्। एतानि अधिष्ठानभेदानि विमानार्चनाकल्पे[1] एव दृश्यन्ते।

---

1. पृ.30-2

पादः

विमानाङ्गभूतस्य पादस्य उत्सेधं सप्ताष्ठनवदश भागं कृत्वा एकांशं पादविस्तारं भवेत्। अथवा अधिष्ठानस्य उत्सेधं त्रिचतुःपञ्चभागं कृत्वा एकांशं स्यात्। ततः भित्तिपाद विशालं, चतुः पञ्च षडंशं कृत्वा एकांशहीनं भवेत्। तस्य अग्रविस्तारं षट्-सप्त-अष्ट-नवभागैर्विभज्य एकांशोनं भवति।

चतुरश्राः अष्टाश्राः षोडशाश्राः वृत्ताः पादाः भवन्ति। ते समयुग्मं श्रेष्ठं, विषमयुग्मं निषिद्धम्। एक-त्रि-पञ्च - सप्त - नव - एकादशवशेन संयोजयेत्।

पादमूले पद्ममर्धदण्डं, तदुपरि कर्णं चतुरश्रम्, शेषम् अष्टाश्रं षोडशाश्रं वृत्तं वा कारयेत्। पादात् पादान्तरं पाददण्डं स्यात्। दारुशिला स्तम्भेषु मूलमध्याग्रेषु चतुरश्रम् अष्टाश्रं, षोडशाश्रं वृत्तं वा कुर्यात्[1]।

प्रस्तरम्

विमानाङ्गभूतं प्रस्तरं लक्षणोक्तदिशा विमानार्चनाकल्पे प्रतिपाद्यते। यथा- प्रस्तरस्य उत्सेधम् एकोनविंशति भागं कृत्वा, उत्तरं त्र्यंशं, वाजिनमेकांशं, वलभिःत्र्यंशं वाजिनमेकांशं, कपोतं सप्तांशम्, आलिङ्गान्तरितौ एकैकांशौ, प्रत्युत्सेधं एकांशं भवेत्। ततः वसन्तकश्च निर्गमम् अर्धं त्रिचतुर्भागं वा कृत्वा तस्य समं पादोनमर्धं वा कपोतं परिकल्प्यसमत्रिपादम् अर्धं वा दण्डं सार्धदण्डं द्विदण्डं वा निर्गमं कुर्यात्, एतत् प्रस्तरं भवति।

ग्रीवा

विमानाङ्गभूतायाः ग्रीवायाः उत्सेधं त्रि - चतुः - पञ्चभागं कृत्वा एकांशं वेदिकायाः उत्सेधं भवति। वेदिका इयं चतुरश्रम् अष्टाश्रं वृत्तं वा भवेत्। शेषांशं द्वादशभागं कृत्वा, ग्रीवातुङ्गम् अष्टांशम् उत्तरं सार्धांशं, वाजनम् अर्धांशं, हंसमर्धांशं, वाजनम् अर्धांशं स्यात्[2]।

शिखरम्

विमानाङ्गभूतस्य शिखरस्य लक्षणं विमानार्चनाकल्पे[3] इत्थं प्रतिपाद्यते। तद्यथा -

---

1. वि.पृ.36   2. वि.पृ.40   3. पृ.41

हंसवाजनाद्बहिः अर्धदण्डं दण्डं सार्धदण्डं, द्विदण्डं वा शिखरस्य ओष्ठ विस्तारं स्यात् । हंसवाजनस्य षोडशांशैकहीनं मध्यविस्तारं, हंसवाजनस्य सदृशम् उदरविस्तारञ्च भवति। बलिकस्य आधारपट्टिका पञ्चभागत्र्यंशा स्यात्। ऊर्ध्वपट्टिका तत्पञ्चांशात् युगांशा, तत्समं पद्माकारं चतुर्भागैकं कर्णिकाकारं तस्य उदरं कर्णिकान्तं शिखरस्य उत्सेधार्धं निर्मापयेत् । ततः क्रमात् संक्षिप्तं बलिकमण्डल विस्तारं त्र्यङ्गुलं चतुरङ्गुलं वा स्यात्। तस्य उत्सेधं तदर्धं पद्मतुङ्गम् अर्धदण्डं त्रिपाददण्डं वा भवेत्। कर्णिकोत्सेधम् अर्धदण्डं स्यात्। एतत् शिखरं भवति।

नासिका

शिखरमध्ये नासिका नानाचित्रितवक्त्रपट्टिसंयुक्ता सिंहवन्मुखयुता भवति। तस्याः लक्षणं विमानार्चनाकल्पे[1] एव दृश्यते। तथा हि - शिखरव्यासात् त्रि-चतुः-पञ्चभागैकं नासिकायाः विस्तारं भवति। तस्याः आयामं तत्समं त्रिपादं त्रिपादाद्विभागं वा स्यात्। नासिकायाः निर्गमं दण्डं सार्धदण्डं द्विदण्डं वा भवति। नासिकोत्सेधं गाढप्रवेशविस्तारस्य त्रिचतुष्पञ्चभागैकहीनं स्यात् । तद्दण्डं त्रिभागैकहीनं, तस्य शिखरोत्सेधं तदर्धं त्रिपादं वा भवति। तत्त्रिभागैकं कर्णं, सिंहवन्मुखं द्व्यंशं कुर्यात्।

स्थूपिका

शिखरस्याग्रे स्थूपिकां निर्मापयेत्। इयं स्वर्णेन रजतेन ताम्रेण वा निर्मिता स्यात् । अशक्तश्चेत् सुधया कृत्वा अग्रे अयसा सूचीं निर्मापयेत् । अस्याः स्थूपिकायाः मानं यथा[2]-

पादस्य त्रिभागैकं कुम्भविशालं, त्रिभागैकं नालं, पाली तत्त्रिगुणा, तत्त्रिभागैकं मुकुलं स्यात्। अथवा स्थूपिकायाः उत्सेधं द्वाविंशत्यंशं कृत्वा पद्मं चतुरंशं, कर्णिकोत्सेधम् एकांशं, कुम्भोत्तुङ्गं पञ्चांशं, नालं सप्तांशं, पाली सार्धांशा मुकुलं त्र्यर्धांशं भवेत्।

---

1. पृ.42　　2. वि.पृ. 42

द्वितलादिविमाननर्माणप्रकारः

द्वितलविमानं-शान्तिकम्

उत्सेधम् एकोनविंशत्यंशं कृत्वा अधिष्ठानं द्व्यंशं, पादं चतुरंशं, प्रस्तरं पादोनद्व्यंशं, पादं त्र्यर्धांशं, मञ्चं सपादांशं (पादसार्धांशं?) वेदिका अर्धांशा, कण्ठमेकांशं, शिखरं सपादाग्न्यंशं स्थूपिका पादोनद्व्यंशा एतत् शान्तिकं द्वितल विमानं भवति।

द्वितलविमानानि - पौष्टिक-जयद -अद्भुत - सार्वकामिकानि

द्वितलविमाने पौष्टिक जयद अद्भुत सार्वकामिकानां विमानानाम् उत्सेधानां पूर्वोक्तांशेषु (द्वितलशान्तिकविमानोक्तेषु अंशेषु) पञ्चांशं संयोज्य तत्र पादे शिरसि च एकैकां स्थूपिं विना अन्येषु अर्धांशं च संयोजयेदिति निर्दिश्यते।

त्रितलविमानं - शान्तिकम्

त्रितलविमाने शान्तिकस्य उत्सेधं चतुर्विंशतिभागं कृत्वा अधिष्ठानं द्व्यंशं पादं चतुरंशं प्रस्तरं पादोनद्व्यंशं, पादं पादोनचतुरंशं, मञ्चं सार्धंशं, पादं त्र्यर्धांशं, प्रस्तरं सपादांशं, वेदी अर्धांशा, कण्ठं सार्धांशं, शिखरं त्र्यंशं, स्थूपिका सपादांशा स्यात्।

त्रितल विमानानि - पौष्टिक - जयद - अद्भुत - सार्वकामिकानि

त्रितलविमाने पौष्टिक जयद अद्भुत सार्वकामिकानां विमानानाम् उत्सेधानां पूर्वोक्तांशेषु (त्रितल शान्तिक विमानोक्तेषु अंशेषु) सप्तांशं संयोज्य तत्र पादेषु शिरसि च एकांशम् अन्येषु अर्धांशं च संयोज्य पौष्टिकादीनि विमानानि कल्पयेदिति प्रतिपाद्यते।

चतुस्तल विमानं - शान्तिकम्

उत्सेधं पञ्चत्रिंशदंशं कृत्वा अधिष्ठानं त्र्यंशं, पादं षडंशं प्रस्तरं द्व्यर्धांशं, पादं पञ्चांशं, मञ्चं द्व्यंशं, शरणं च तुरंशं, कपोतं सार्धांशं, पादं त्र्यंशं, मञ्चं सपादांशं, वेदिका अर्धांशा, ग्रीवा एकांशा, शिखरं त्र्यर्धांशं, स्थूपिका पादोन द्व्यंशा भवेत्। एतत् चतुस्तलविमाने शान्तिकं भवति।

चतुस्तल विमानानि-पौष्टिक-जयद-अद्भुत-सार्वकामिकानि

पौष्टिक-जयद-अद्भुत-सार्वकामिकानां विमानानाम् उत्सेधानां पूर्वोक्तांशेषु (चतुस्तल - शान्तिक विमानोक्तेषु अंशेषु) अष्टांशं संयोज्य तत्र पादेषु शिरसि च एकैकांशं संयोज्य, शेषं समूह्यैव प्रकल्पयेत्।

पञ्चतलविमानं शान्तिकम्

शान्तिकविमाने पूर्वोक्तांशेषु षोडशांशं संयोज्य अधिष्ठानं चतुरंशं स्तम्भम् अष्टांशं, प्रस्तरं चतुरंशं भवेत्।

पञ्चतलविमानानि - पौष्टिक - जयद-अद्भुत - सार्वकामिकानि

पौष्टिक-जयद-अद्भुत-सार्वकामिकानां विमानानाम् उत्सेधानां पूर्वोक्तांशेषु (पञ्चतल शान्तिक विमानोक्तेषु अंशेषु) पादे एकांशम्, अन्ययोः एकांशं च संयोज्य पौष्टिकादीनि विमानानि कल्पयेत्।

षट्तलादि द्वादशतलान्तानि विमानानि

षट्तलादि द्वादशतलन्तानां विमानानां तारे चतुरंशं, तुङ्गे कालांशश्च संयोज्य उत्सेधभेदार्थं दूव्यंशाधिक विभक्तेः विनैव तलं प्रति युक्त्या संयोज्य कुर्यात्। उपरितनानां विमानानां लक्षणानि विमानार्चनाकल्पे[1] एव स्पष्टतया उपलभ्यन्ते।

क्रियाधिकारे[2] तु एकतलादित्रितलान्तानि विमानानि प्रतिपाद्य तेषु एकैकं शान्तिक - पौष्टिक - जयद - अद्भुत - सार्वकामिकभेदेन पञ्चदशविमानानि प्रोच्यन्ते। परमेतानि लक्षणानि अस्पष्टानि वर्तन्ते।

वलभ्यादिषु विमानभागेषु प्रकल्पनीयाः देवाः

वलभौ विद्याधरहंसभूतनागादीनि, द्वारेषु द्वारपालकाः शिखरे महानास्यन्तरे पूर्वे पुरुषः दक्षिणे नृसिंहः पश्चिमे अच्युतः, उत्तरे अनिरुद्धः अथवा पूर्वे चक्रः, दक्षिणे दक्षिणामूर्तिः, पश्चिमे नृसिंहः, उत्तरे पितामहः प्रकल्पनीयाः[3]। पादवर्गे तोरणानामभ्यन्तरे दक्षिणे सत्यः, पश्चिमे अच्युतः, उत्तरे अनिरुद्धः, अथवा प्राग्द्वारदक्षिणे पुरुषः, दक्षिणे नृसिंहः पश्चिमे अच्युतः,

---

1. पृ.44-8 2. 4,9-15 3. वि.पृ.43, क्रि.5,39-48

उत्तरे वराहः निर्मातव्याः। एते देवाः स्थिताः वा आसीनाः वा कल्पनीयाः। मुखमण्डपदक्षिणे बाह्ये विघ्नेशः, उत्तरे विन्ध्यवसिनी, आग्नेयादिषु कोणेषु प्रस्तरोपरि गलस्थाने मृगेशः खगेशो[1]वा स्थापनीयाः।

मुखमण्डपादिनिर्माणम्

मुखमण्डपादीनां निर्माणं वैखानसग्रन्थेषु दृश्यते। तथा हि-

मण्डप-	विमानार्चनाकल्पः(पृ.54-56)	यज्ञाधिकारः (10,7-13)
मुखमण्डप-		प्रथमावरणस्याग्रे
स्नपनमण्डप-	आलयाभिमुखे मण्डपूर्वे सोपानपूर्वे वा	द्वितीयावरणे ईशान्ये उत्तरेवा
पचनमण्डप-	द्वितीयावरणे तृतीयावरणे वा	आग्नेय्यां
यागमण्डप-	प्रथमावरणे द्वितीयावरणे वा आग्नेय्यां दक्षिणे वा	दक्षिणे
नृत्तमण्डप-	महामण्डपस्य प्रमुखे	नैर्ऋत्यां वायव्यां वा
पानीयमण्डप-		यमनैर्ऋतयोर्मध्ये
लौकिक प्रतिमा		नीलवरुणयोर्मध्ये
पुष्पसञ्चयस्थानम्	प्रथमावरणे द्वितीयावरणे वा इन्द्र ईशानयोः अन्तरे	वरुणोदानयोर्मध्ये
अङ्कुरार्पण मण्डप-		कुबेरईशानयोर्मध्ये
वस्त्रादिस्थान-	प्रथमावरणे द्वितीयावरणे वा इन्द्र ईशानयोः अन्तरे	ईशान इन्द्रयोर्मध्ये
महामण्डप-	आलयाभिमुखे	
आस्थान मण्डप-	प्रमुखे दक्षिणे पश्चिमे उत्तरे वा	

1. वि.पृ.44

प्राकारकल्पनम्

आलयस्य मङ्गलार्थं शोभार्थं रक्षार्थं च प्राकाराः प्रकल्पनीयाः। प्राकाराणां संख्यानुरोधेन विमानानि उत्तमादिभेदेन भिद्यन्ते। तत्र

एकप्राकारयुतं विमानम् अधमम्

द्विप्राकारयुतं मध्यमम्

त्रि प्राकारयुतम् उत्तमं - मध्यमाधमञ्च

चतुष्प्राकारयुतं मध्यमम्

पञ्चप्राकारयुतं मध्यमोत्तमम् उत्तमाधमं च

षट्प्राकारयुतम् उत्तममध्यमम्

सप्तप्राकारयुतम् उत्तमोत्तमम् इति च प्राकारसंख्यानुरोधेन नवधा विमानानि विमानार्चनाकल्पे[1] परिगण्यन्ते।

समाप्तेष्टकान्यसः

विमाननिर्माणं समाप्तेष्टकान्यासेन संपूर्णं याति। तत्र समाप्तेष्टकान्यासस्य कालः, समाप्तेष्टकान्यासस्य स्थानम्। समाप्तेष्टकान्यासप्रकारश्च इत्यंशाः वर्तन्ते।

समाप्तैष्टकान्यासकालः

शुक्लपक्षः कुर्तः अनुकूलं वा नक्षत्रं समाप्तेष्टकान्यासार्थं संग्राह्यमिति विमानार्चनाकल्पे[2] उच्यते। खिलाधिकारे[3] तु समाप्तेष्टकान्यासस्य उत्तरायणं श्रेष्ठमिति प्रतिपाद्यते। नक्षत्रेषु उत्तरात्रयं - रोहिणी - हस्त -स्वाती - पुनर्वसु - श्रवणं - शतिभषक् -रेवती इत्येतानि नक्षत्राणि प्रशस्तानी इति, वारेषु सोम-बुध-गुरु-शुक्राः श्रेष्ठाः इति, राशिषु चारराशयः विवर्ज्याः इति च उच्यते। समूर्तार्चनाधिकरणे[4] तु शुभे मुहेर्ते पूर्वाह्णे समाप्तेष्टकाकार्या इति प्रतिपाद्यते।

आलय निर्माणं त्वरया निर्मितुम् इच्छुकस्य तु दक्षिणायनमपि समाप्तेष्टकार्थं ग्राह्यमिति खिलाधिकारे उच्यते।

1. वि.पृ.50
2. पृ.63
3. 9,11
4. 10,45

समाप्तेष्टकान्यासस्य स्थानम्

शिखरस्य उत्सेधम् अष्टभागं कृत्वा तस्य चतुः पञ्च षडंशावसाने अन्त्येष्टका निक्षेप्तव्या इति, अथवा नासिकाग्रे कर्णे वा निक्षिपेदिति च समाप्तेष्टकान्यासस्य स्थानं विमानार्चनाकल्पे[1] दृश्यते।

समाप्तेष्टकान्यासप्रकारः

समाप्तेष्टकार्थं पञ्च वा नव वा इष्टकाः संग्राह्याः[2]। तत्र कीले विष्णुमूर्तिं तदाधारे महीदेवीं प्रागादिषु इष्टकासु पुरुषादिमूर्तीनां बाह्यप्रदेशे प्रागाद्युत्तरान्तं न्यक्षविवस्वन्तमित्रक्षतृणां देवानां च आवाह्य अभ्यर्च्य शय्यायाम् अधिवासयेत्।

प्रभाते आचार्यः स्थपतिना सार्धं सकीलम् इष्टकाः विमाने समारोप्य सूत्रं प्रसार्य मध्ये छिद्रे पूर्वे प्रागग्रं, दक्षिणे छिद्रे दक्षिणाग्रं पश्चिमे छिद्रे पश्चिमाग्रम् उत्तरे छिद्रे उत्तराग्रं शिलां वा इष्टाकां वा निक्षिप्य मध्ये सुवर्णं वा रत्नं वा विन्यस्य ऊर्ध्वसुषिरे स्थूपिकीलं च प्रतिष्ठापयेत्। प्रागादि चतसृषु दिक्षु न्यक्षादीन् देवान् आवाहयेत्। ततः सुधावर्णलेपञ्च कारयेदिति समाप्तेष्टकान्यासप्रकारः विमानार्चनाकल्पे[3] विधीयते।

बिम्बकल्पनम्

अथ आलये प्रतिष्ठाप्यमानस्य ध्रुवबिम्बस्य कल्पनप्रकारः प्रतिपाद्यते। ध्रुवबिम्बं शिला-दारु - मृत् - ताम्रेष्वन्यतमेन निर्मातव्यम्। दारवात् मृण्मयं श्रेष्ठं, मृण्मयात् शैलमुत्तमम्, शैलात् ताम्रं मुख्यं भवति[4]। तत्र प्रथमतः शिलया ध्रुवबेरनिर्माणं विवेच्यते।

शिला ग्राह्यग्राह्यविवेकः

गिरिजा- भूमिजा - वारिजानाञ्चेति शिलात्रिविधा। तासु त्रिविधासु शिलासु गिरेः उपरिजाता ऊर्ध्वप्रेक्षा, गिरेःपार्श्वजाता पर्वतप्रेक्षा च शिला बिम्बनिर्माणे ग्राह्या। समुद्रजाता शिला ऊर्ध्वप्रेक्षाचेत् ग्राह्या। भूमिजाता

---

1. पृ.41-2 2. खि.9,19
3. 64-5 4. वि.पृ.69

अधोप्रेक्षा नद्यादिजलमार्गजाता जलागमनमुखा च शिला ग्राह्या। तासु भूमिजा मुख्या[1]।

गिरिजा उत्तमा भूमिजा मध्यमा वारिजा अधमा इति बेरनिर्माणार्थशिलाः उत्तमादिभेदेन भिद्यन्ते[2]।

प्राङ्मुखी च शिला जयदा दक्षिणाभिमुखी शिला शान्तिदा पश्चिमाभिमुखी शिला श्रीकरा, उत्तराभिमुखी शिला शुभदा इति अभिमुखानुरोधेन शिलानां फलभेदः[3]।

दुस्थानस्थाः विदिङ्मुखाः[4] नदीतीरे - ह्रदतटे लवणोदाप्लुते, ग्राममध्ये, श्मशाने, अमेध्यभूमौ - वल्मीकसङ्कटौ पतङ्गक्रिमिकीटानाम् आवासस्थलेषु स्थिताः, वायुसूर्याग्निदग्धाः किरातगण[5] दूषिताः शिलाः ध्रुवबिम्बनिर्माणार्थम् अग्राह्याः इति वैखानसग्रन्थेषु निर्दिश्यन्ते।

वर्णानुरोधेन शिलाभेदाः

ब्राह्मणः यजमानश्चेत् शुक्लवर्णा शिला, क्षत्रियः यजमानश्चेत् रक्तवर्णा शिला, वैश्यः यजमानश्चेत् पीतवर्णा शिला, शूद्रः यजमानश्चेत् कृष्णवर्णा शिला ग्राह्या इति वर्णानुरोधेन शिलाभेदाः खिलाधिकारे[6] विशेषतया प्रतिपाद्यन्ते।

लिङ्गभेदेन शिलाभेदाः

एकवर्णा-घना-स्निग्धा - आमूलाग्रमार्जवान्विता-घण्टानादध्वनियुता शिला पुंशिला, स्थूलमूला-क्षीणाग्रा-कांस्यध्वनियुता शिला स्त्री शिला इति, स्थूलाग्रा - कृशमूला- स्वरहीना शिला नपुंसकशिला इति तासु पुरुषबेराणां पुंशिला, स्त्रीबेराणां स्त्रीशिला, प्राकारतल कुड्यादीनां नपुंसकशिला उपयोक्तव्या[7]।

शिलासंग्रहणप्रकारः

शुक्लपक्षे कर्तुः अनुकूले नक्षत्रे स्थपतिना सार्धम् आचार्यः शिलाप्रदेशं

---

1. वि.पृ.68, खि.8,17-20
2. स.12,2
3. ज्ञा.पृ.54, खि.8,21-2
4. वि.पृ.68, खि.8,22
5. खि.8,26-30
6. 8,41-2
7. वि.पृ.68, स 12, 4-6, य 11, 3-4, ज्ञा पृ. 54

गत्वा वास्तुहोमं विधाय शिलां संप्रोक्ष्य शिलां परितः पिशाचादिभ्यः बलिं समर्प्य मन्त्रपूर्वकेन शिलां गृह्णीयात्। ततः शिल्पी शिलां छेदयेत्। प्लवे शकटे वा तामारोप्य देवालयं प्रवेशयेदिति शिलाग्रहणप्रकारः वैखानसग्रन्थेषु[1] निरूप्यते।

शिलागर्भदोषाः

शिलाच्छेदने कृष्णमण्डले दृष्टे कृष्णसर्प इति, कपिल मण्डले दृष्टे मूषिका इति, अरुणमण्डले दृष्टे कृकलास इति, गुडवर्णे दृष्टे पाषाणगर्भ इति, कपोतकबुरे दृष्टे गृहगौली इति, कृष्णवर्णे दृष्टे आप इति, पद्मवर्णे दृष्टे वालुका इति, विचित्रमण्डले दृष्टे वृश्चिक इति, नीलपीतमिश्रवर्णे दृष्टे शलभ इति, मधुवर्ण मण्डले दृष्टे खद्योत इति, गर्भदोषाः भवन्तीति खिलाधिकारः[2]। विमानार्चनाकल्पे[3] तु शिलायां छेदने मण्डूकदर्शने चेत् सा शिला गर्भिणी इति मत्वा तां वर्जयेदिति प्रतिपाद्यते।

गर्भदोषफलम्

प्लवग - गोदा-सर्प-मूषिका-कृकलास पाषाणगर्भेषु क्रमेण रोग-दारिद्रय-भार्यानाशन -अनपत्य - अल्पायु - कुलक्षयाः भवन्तीति गर्भदोषफलानि खिलाधिकारे[4] कथ्यन्ते।

तथैव ध्रुवबिम्बनिर्माणार्थं निर्दिष्टेषु शिलादि उपादानद्रव्येषु दारुणः ग्राह्याग्राह्य विवेकः तद्भेदाश्च वैखानसग्रन्थेषु निर्दिश्यन्ते।

दारु ग्राह्याग्राह्यविवेकः

खदिर-असन-तिमिश-चन्दन-चम्पक मधूक[5] जातिवृक्षाः स्निग्धाः साराः - शुभवृक्षाः सस्यक्षेत्रसमीपोत्पन्नाः पद्मोत्पल कुमुदवत्तटाक समीपजाताः। याज्ञिकध्रुमाः - तुलसी - कुश-पुष्प-समीपस्थाश्चवृक्षाः[6], साल-सुवर्णानिल-अर्जुन-अशोक-मधूक-वाक-सुखार्थी-निम्ब-दलित्थ-वकुल-कन्दलि-वञ्जुलाश्च इत्येते दारवः ध्रुवबिम्बनिर्माणार्थं संग्राह्याः[7]।

---

1. वि.पृ. 68-9, स 13, 1-43, खि 9, 66-107
2. 9,92-8
3. पृ.68
4. 9,99-104
5. स 15, 1-2
6. वि.पृ. 78
7. स 15,1-2, खि 8, 114-9, ज्ञा .पृ.54

पुष्पफलविस्तीर्णाः-कृमिदष्टाः जन्तुयुताः-अग्निदग्धाः-वाताहतजीर्णाः-कोटराः त्वचाहीनाः-अनेकपक्षिनिवासाः वल्मीकसंकटाः-सर्पवासाः देवायतनस्थाः-श्मशानचण्डालावाससमीपस्थाः अनुक्तस्थानस्थाश्च दारवः ध्रुवबिम्बनिर्माणर्थम् अग्राह्यः भवन्ति[1]।

दारूभेदाः

आमूलाग्रम् आर्जवयुताः - शाखानेकयुताः दारवः पुरुषाः इति, स्थूलमूलाः कृशाग्राः दारवः स्त्रिय इति। कृशमूलाः दारवः नपुंसकाः इति, तेषु पुरुषदारुभिः पुरुषबेराणि, स्त्रीदारुभिः स्त्रीबेराणि निर्मातव्यानि[2]।

दारुसङ्ग्रहण प्रकारः

आचार्यः शुभे मुहूर्ते यजमानेन साकं वृक्षप्रदेशं प्रविश्य वास्तुहोमेन तं प्रोक्ष्य वृक्षं परितः भूतादिभ्यः बलिं समर्प्य वृक्षं समन्त्रकं छेदयेत्। तक्षकेन छिन्नं वृक्षं शकटे समारोप्य आलयं प्रवेशयेत्[3]।

शूलस्थापनम्

मृदा ध्रुवबेरस्य निर्माणे आदौ शूलस्थापनं कार्यम्।

शूलस्थापनस्य कालः

अयनेषु उत्तरायाणं श्रेष्ठः कालः, मार्गशीर्षमाघौ[4] विवर्ज्यौ। खिलाधिकारे तु मासेषु फाल्गुणः श्रेष्ठ इति कथ्यते।

शूलानां संख्या

स्थानके ध्रुवबेरे अष्टादशदण्डाः, आसने ध्रुवबेरे विंशतिदण्डाः, शयने ध्रुवबेरः चतुर्भुजश्चेत् एकोनविंशति दण्डाः, द्विभुजश्चेत् सप्तदशदण्डाः ग्राह्या इति शूलानां संख्या विमानार्चनाकल्पे[6] निर्दिश्यते।

---

1. वि.पृ.78, य 12, 3
2. वि.पृ. 78, य 12,4-6
3. वि.पृ.79-80, स 17, 7-13, खि 10, 21-50
4. वि.पृ.82
5. 11,98-100
6. पृ.83

शूलस्थापनप्रकारः

आचार्यः शय्यायां शूलान् शाययेत्। अयमेव शूलानां शयनाधिवासः इत्युच्यते। प्रभाते आचार्यः स्थापकैः सह आलयं प्रविश्य गर्भालये पदविभागं कृत्वा शूलान् प्रदक्षिणपूर्वकं गर्भालयं समानीय ताम्रपट्टैः दृढं बन्धयेत्। अष्टबन्धं शूलानामालिप्य पश्चात् रज्जुबन्धं कारयेत्[1]।

शर्करालेपनम्

पुण्यक्षेत्रसमीपात् नदीतीरात् विशुद्धदेशात् आनीतं शर्कराचूर्णं कारयित्वा कृतशूलस्थापनं मृत् बिम्बानाम् सर्वाङ्गेष्वालेपयेत्[2]।

वर्णसंस्कारः

आचार्यः सर्वान् च वर्णान् पृथक् पृथक् पात्रेषु गृहीत्वा समन्त्रकं देवस्य ललाटे वर्णसंलेपनं कुर्यात्। ततः शिल्पी तत्तदङ्गेषु तत्तद्वर्णाः संलेपयेत्[3]।

श्वेत-स्वर्ण-श्याम-अञ्जनवर्णाः कृतयुगादिभेदेन ध्रुवबिम्बस्य भवन्ति[4]।

श्वेतरक्तौ - सत्वजौ

श्यामकाञ्चनौ - राजसौ

चाषत्पत्रसदृशवर्णकृष्णौ-तामसौ इति [5]खिलाधिकारे वर्णभेदेन सत्त्वादिगुणभेदः दृश्यते।

समूर्तार्चनाधिकरणे[6] तु ध्रुवादीनां वर्णक्रमः विव्रियते। यथा -

बिम्बम्	-	वर्णः
ध्रुव	-	श्याम
श्री	-	प्रवालाभ
मही	-	श्याम

1. वि.पृ.84-5, स. 17,1-38, खि.11,101-169
2. वि.पृ.88, खि.13, 51-7, स.19,1-24
3. वि.पृ. 90
4. ज्ञा.पृ.85, वि.पृ. 90
5. 13,65-9
6. 21,11-37

ब्रह्मन्	-	प्रवालाभ
शङ्कर	-	श्वेत
मार्कण्डेय	-	प्रवालाभ
भृगु	-	रत्न
मणिक	-	जलदप्रभ
सन्ध्या	-	अग्निवर्ण
तापस	-	सित
सिद्धिद	-	पीत
शङ्ख	-	शङ्खनिभ
चक्र	-	रक्ताभ .
विष्वक्सेन	-	रक्ताभ
गरुड	-	रुक्म
इन्द्र	-	सस्याभ
अग्नि	-	किंशुक
यम	-	कृष्ण
निर्ऋति	-	नील
वरुण	-	नील
वायु	-	स्वर्ण
कुबेर	-	इन्द्रनील
ईशान	-	कुसुम
आदित्य	-	अतिरक्ताभ
किष्किन्ध	-	अग्नि
वक्रतुण्ड	-	प्रवाल
तीर्थ	-	अग्नि
नागराज	-	स्वर्ण

जगत्सृष्टिस्थितिलयकारणं परमात्मानं बिम्बे समावाह्य पूज आगमग्रन्थेषु प्रधानतया प्रतिपाद्यते।

विग्रहाणि चल- अचल भेदेन द्विविधानि। लोहनिर्मितानि स्थाना

स्थानान्तरं प्रापयितुं शक्यानि चलविग्रह्याणि। शिलया निर्मितानि एकत्रैव प्रतिष्ठापितानि अचलविग्रहाणि। मूलविग्रहमिति ध्रुवबेरमिति च अचलविग्रहाणि कथ्यन्ते।

वैखानसागमे ध्रुव-कौतुक स्नपन - उत्सव -बलि इति पञ्चबेराणि प्रसिद्धानि[1]। तत्र कौतुकस्य दारु-शिला-ताम्र-रजत -हेम-रत्नानि उपादान द्रव्याणि। तेषु दारवात् शतगुणं शैलं, शैलात् ताम्रं सहस्रगुणं, ताम्रात् रजतम् अयुतगुणं, रजतात् हेमम् अर्बुदगुणं, रुक्मं सर्वसाधनं, रत्नजम् अनन्तफलं भवतीति उपादानद्रव्येषु फलभेदः विमानार्चनाकल्पे[2] निर्दिश्यते। पुत्रार्थी दारवम्, आयुष्कामः शैलम्, समृद्धिकामः ताम्रं, श्रीकामः रजतम् ऐहिकामुष्मिककामः सौवर्णं, सद्यः सायुज्यकामः रत्नजं कौतुकम् कारयेदिति फलविशेषकामनानुरोधेन कौतुकद्रव्यभेदोऽपि विमानार्चनाकल्पे निर्दिश्यते। रत्नजस्य रूपमात्रं भवति।

प्रादुर्भावानां कौतुकं तत्तद्रूपं विष्णुं चतुर्भुजं वा कारयेदिति मत्स्य-कूर्म वामनानां तत्तद्रूपं कौतुकं नैव कुर्यादिति विमानार्चनाकल्पे कौतुकस्य रूपविशेषः निर्दिश्यते।

ध्रुवे स्थिते स्थितम्, आसीने च आसीनं स्थितं वा, शयने आसीनं स्थितं वा कौतुकं कारयेदिति यानके यानकं कौतुकं निर्मापयेदिति च कौतुकबिम्बस्य स्थितिविशेषः अपि कथ्यते।

शिलया दारुणा च उत्सवं बलिबेरञ्च न कारयेत्। कौतुकवदेव उत्सवबेरस्यापि स्थितिविशेषः।

ध्रुवे देवी वियुक्तेऽपि कौतुकं देवीयुक्तं सर्वसमृद्धिदम्। कौतुकं देवी वियुक्तेऽपि औत्सवं देवी सहितमुत्तममिति कौतुकोत्सवयोः देवीयोगे फलविशेषः प्रतिपाद्यते। स्नपनबेरं सर्वत्र स्थितमेव कुर्यात्[3]।

---

1. अगमीयबेरविवेकः उण्डेमने शङ्करभट्टः पृ.51 *Journal of the Ganganath Jha Kendriya Sanskrit Vidyapeetha, Allahabad 1973.*
2. पृ.148
3. वि.पृ.149

वैखानसागमे चित्रं चित्रार्धं चित्राभासमिति ध्रुवबेरं त्रिविधं भवति। सर्वत्र टङ्कितं चित्रमिति, अग्रभागमात्रटङ्कितं चित्रार्धमिति, पटकुड्यादिषु लेखितं चित्राभासमिति च कथ्यते। तेषु उत्तमं चित्रम्, अर्धचित्रं मध्यमम्, आभासमधमम् भवति[1]।

सर्वत्र लोहजं मृण्मयं चित्रमेव कारयेत्। शैलं दारवञ्च चित्रम् अर्धचित्रं वा कारयेत्। बेरे चित्रे अर्चनम् ऐहिक आमुष्मिक फलप्रदम्, अर्धचित्रे अर्चनम् केवलमामुष्मिकफलप्रदम्, आभासे अर्चनम् ऐहिकफलप्रदं भवति[2]।

युगभेदेन मूलबेरस्य वर्णाः भिद्यन्ते। कृतयुगे श्वेतवर्णः, त्रेतायां रुक्माभः, द्वापरे रक्ताभः, कलौ श्यामवर्णः सर्वेषु श्यामवर्णो वा इति सर्वेषां वर्णानां श्यामं मुख्यमिति च विमानार्चनाकल्पे[3] उच्यते। विग्रहाणां लक्षणं वैखानसग्रन्थेषु स्पष्टं प्रतिपाद्यते । प्रत्येकस्य विग्रहस्य उत्सेधः आयुधानि पीठस्याकारादयः वैखानसग्रन्थेषु निर्दिश्यन्ते। इत्थं प्रमाणानुसारं निर्मितं विग्रहमेव शास्त्रोक्तमिति तदेव पूजार्हमिति च आगमज्ञाः कथयन्ति। अवसरेऽस्मिन् शिल्पिनः चातुर्यं कुशलता च अपेक्षिते भवतः। शिल्पिनः कलाकौशलस्य प्रतिभायाः विकासस्य च विग्रहनिर्माणं दोहदं भवति।

ध्रुवबेरम्

मूलविग्रहमेव ध्रुवबेरमिति व्यपदिश्यते। ध्रुवबेरमिदं स्थानक - आसन - शयन - यानक इति चतुर्धा भिद्यते। तेषु यानकं विना एकैकं योग - भोग - वीर आभिचारिक भेदेन, तेष्वपि एकैकम् उत्तममध्यमाधम भेदेन च भिद्यते। योगार्थं योगमार्गम्, भोगार्थं भोगमार्गम्, वीर्यार्थं वीरमार्गम्, शत्रुजयार्थम्

1. चित्रं चित्रार्धकं चैव चित्राभासमिति त्रिधा।
मानोन्मानप्रमाणेन व्यक्तं कुर्याद्विधानतः ॥
सर्वाङ्गमपिसंदृश्यं यत्तच्चित्रं प्रकीर्त्यते।
सर्वाङ्गमर्धदृश्यं यत्तदर्धं चित्रकं मतम् ॥
पटकुड्यादिलेख्यं तच्चित्राभासामिति त्रिधा ॥ स.18,11-3

स.18,13-4, वि.पृ.70-1,

2. वि.पृ.71

3. वि.पृ.90

अभिचारिकमार्गं कारयेदिति विमानार्चनाकल्पः[1] निर्दिशति। ग्रामबाह्ये, विविक्ते देशे, नदीतीरे, तत्सङ्गमे, पर्वते, वने, वनपार्श्वे वा योगस्थानकं, तद्बाह्ये वीरस्थानकं, वनगिरिजलदुर्गे राष्ट्रान्ते शत्रुदिङ्मुखे च आभिचारिकं भवतीति योगादीनां स्थापनप्रदेशः उच्यते।

योग - भोग - वीर-आभिचारिकानां विग्रहभेदानां लक्षणानि वैखानसग्रन्थेषु विमानार्चनाकल्पे एव स्पष्टं परिलक्ष्यते। तथाहि -

ध्रुवबेरम् - उत्तमयोगस्थानकम्

देवेशः श्यामवर्णः चतुर्भुजः शङ्खचक्रधरः अभयदक्षिणहस्तः वरद कट्यवलम्बितवामहस्तः भवेत्। तस्य दक्षिणे भृगुः मार्कण्डेयः स्याताम्। भूमिपुण्यौ वा भवेताम्। दक्षिणे भित्तिपार्श्वे हेमाभः चतुर्भुजः अक्षमालाकमण्डलुधरः अभयहस्तः कट्यवलम्बित हस्तश्च ब्रह्मा उत्तराभिमुखः स्थितो भवेत्। उत्तरे भित्तिपार्श्वे श्वेताभः चतुर्भुजः मृगपरशुधरः अभयहस्तः कट्यवलम्बितहस्तः शङ्करः दक्षिणाभिमुखः स्यात्। एतदुत्तमम् योगस्थानकं भवति।

ध्रुवबेरं - मध्यमयोगस्थानकम्

उत्तमयोगस्थानके स्थिताभ्यां ब्रह्मशङ्कराभ्यां हीने मध्यमयोगस्थानकं भवति।

ध्रुवबेरम् - अधमयोगस्थानकम्

उत्तमयोगस्थानके स्थिताभ्यां भृगुमार्कण्डेयाभ्यां हीने अधमयोगस्थानकं भवेत्।

ध्रुवबेरम् - उत्तमभोगस्थानकम्

देवेशः चतुर्भुजः श्यामाभः शङ्खचक्रधरः अभयदक्षिणहस्तः कट्यवलम्बितवामहस्तः भवेत्। तथा ब्रह्मेशौ स्याताम्। देवेशस्य दक्षिणे श्रीदेवी रुक्माभा सुस्थितदक्षिणपादा आकुञ्चितवामपादा धृतकमलदक्षिणहस्ता

---

1. पृ.91

प्रसारितवामहस्ता देवं समीक्ष्य स्थिता भवेत्। वामभागे हरिणी श्यामाभा प्रसारित दक्षिणहस्ता धृतोत्पलवामहस्ता देवं समीक्ष्य स्थिता स्यात्।

कुड्यकौतकयोर्मध्ये दक्षिणे भृगुः दक्षिणजानुना समासीनः धृतपद्मवाम-हस्तः दक्षिणोरौ निहित दक्षिणहस्तः भवति। वामभागे पुराणः वामजानुना समासीनः दक्षिणेन उत्कटिकासनसंयुक्तः धृतपद्मदक्षिणहस्तः वामोरौ विन्यस्तवामहस्तः स्यात्। भित्तेः ऊर्ध्वभागे मायासंह्लादिन्यौ व्याजिन्यौ तुम्बुरनारदौ किन्नरमिथुनौ न्यक्षविद्याधरौ सनकसनत्कुमारौ सूर्यचन्द्रौ च स्याताम्। एतत् उत्तमभोगस्थानकं भवेत्।

ध्रुवबेरम् - मध्यमभोगस्थानकम्

उत्तमभोगस्थानके स्थिताभ्यां तुम्बुरनारदाभ्यां यक्षविद्याधरीभ्यां च हीने मध्यमभोगस्थानकं स्यात्।

ध्रुवबेरम् - अधमभोगस्थानकम्

उत्तमभोगस्थानके स्थिताभ्यां सनकसनत्कुमाराभ्याम् आदित्यचन्द्राभ्यां पूजकमुनिभ्यां च हीने अधमभोगस्थानकं भवति।

ध्रुवबेरं- उत्तमवीरस्थानकम्

देवेशः श्यामाभः चतुर्भुजः शङ्खचक्रधरः भवति। दक्षिणवामयोः ब्रह्मेशानौ भृगुपुण्यौ किष्किन्धसुन्दरौ व्याजिन्यौ सनकसनत्कुमारौ सूर्यचन्द्रौ च संयुक्तः एतत् उत्तमवीरस्थानकं स्यात्।

ध्रुवबेरम् - मध्यमवीरस्थानकम्

किष्किन्धसुन्दराभ्यां सनकसनत्कुमाराभ्यां च हीने मध्यमवीरस्थानकं भवति।

ध्रुवबेरम् - अधमवीरस्थानकम्

आदित्यचन्द्राभ्यां पूजकक्षितीभ्यां च हीने अधमवीरस्थानकं भवति।

ध्रुवबेरम् - आभिचारिकस्थानकम्

देवः चतुर्भुजः द्विभुजो वा भवेत्। धूम्रवर्णः श्यामाम्बरधरः शुष्काङ्गतनुः

गुणान्वितः ऊर्ध्वनेत्रः ब्रह्मादिदेवैः विवर्जितः पैशाचपदस्थः अयोग्यदिवसे स्थापितः लक्षणहीनविमानस्थः स्यात्। एतदाभिचारिकस्थानकं भवति।

ध्रुवबेरम् – उत्तमयोगासनम्

देवः श्वेताभः चतुर्भुजः पीतवस्त्रधरः जटामौलिः श्वेतपद्मे समासीनः स्यात् । ऊर्ध्वस्थदक्षिणपादः अधस्तात् वामपादः अङ्गविन्यस्य वामकरः शङ्खचक्ररहित अपरभुजः श्वेतवस्त्रोत्तरीयः सोपवीतः आभरणान्वितः निमीलितलोचनः भवेत् । दक्षिणे भित्तिपार्श्वे ब्रह्मा उत्तरे शङ्करः ऊर्ध्वभागे चन्द्रादित्यौ सनकसनत्कुमारौ तथा कौतुकस्य दक्षिणवामयोः भृगुमार्कण्डेयौ महीमार्कण्डेयौ वा स्याताम्। एतत् उत्तमभोगासनं भवति।

ध्रुवबेरं – मध्यमयोगासनम्

उत्तमयोगासने स्थापिताभ्यां चन्द्रादित्याभ्यां सनक सनत्कुमाराभ्यां च हीने मध्यमयोगासनं भवेत्।

ध्रुवबेरम् – अधमयोगासनम्

उत्तमयोगासने स्थापिताभ्यां भृगुमार्कण्डेयाभ्यां हीने अधमयोगासनं स्यात्।

ध्रुवबेरम् – उत्तमभोगासनम्

देवः सिंहासने समासीनः श्यामाङ्गः चतुर्भुजः शङ्खचक्रधरः अभयदक्षिणहस्तः स्वाङ्के विन्यस्तवामहस्तः प्रसारितदक्षिणपादः आकुञ्चितवामपादः भवेत् । दक्षिणभागे श्रीदेवी आकुञ्चितवामपादा प्रसारितदक्षिणपादा सिंहासने समासीना स्यात् । वामभागे महीदेवी आकुञ्चितदक्षिणपादा प्रसारितवामपादा सिंहासने समासीना स्यात् । एतयोर्वामदक्षिणकरौ पद्मोत्पलधरौ अन्यौ सिंहासने निहितौ स्याताम्। देवस्य दक्षिणोत्तरयोः ब्रह्मशङ्करौ आसीनौ भृगुमार्कण्डेयौ पार्श्वे मायासंह्लादिन्यौ व्याजिन्यौ तुम्बुरनारदौ किन्नरमिथुनौ यक्षविद्याधरौ सनकसनत्कुमारौ सूर्यचन्द्रौ च तत्तत्स्थानेषु कल्पनीयौ। एतत् उत्तमभोगासनं भवति।

ध्रुवबेरम् – मध्यमभोगासनम्

उत्तमभोगानसने स्थापिताभ्यां तुम्बुरनारदाभ्यां किन्नरमिथुनाभ्यां यक्षविद्याधराभ्यां च हीने मध्यमभोगासनं स्यात्।

ध्रुवबेरम् - अधमभोगासनम्

उत्तमभोगासने स्थापिताभ्यां सनकसनत्कुमाराभ्याम् आदित्यचन्द्राभ्यां पूजकमुनिभ्यां च हीने अधम भोगासनं भवेत्।

ध्रुवबेरम् - उत्तमवीरासनम्

देवेशः सिंहासनस्थपद्मासने समासीनः समाकुञ्चितवामपादः प्रसारितदक्षिणपादः चतुर्भुजः भवेत्। ऊर्ध्वहस्तौ शङ्खचक्रौ अन्यौ अभयसिंहकर्णौ भवेताम्। पूजकस्थाने दक्षिणभागे श्रीदेवी वामभागे महीः एकजानुक्रमेण आसीने कल्पयेताम्। दक्षिणे ब्रह्ममार्कण्डेयौ वामे भृगुशङ्कौ चामरधारिण्यौ रतीवाण्यौ च कारयेत्। तत्तत्स्थानेषु सनकसनत्कुमाराभ्यां तुम्बुरुनारदाभ्यां च सहितमेतत् उत्तमवीरासनं भवति।

ध्रुवबेरम् - मध्यमवीरासनम्

उत्तमवीरासने स्थापिताभ्यां तुम्बुरुनारदाभ्यां सनकसनत्कुमाराभ्यां व्याजिनीभ्यां च हीने मध्यमवीरासनं भवति।

ध्रुवबेरम् - अधमवीरासनम्

उत्तमवीरासने स्थापिताभ्यां ब्रह्मशङ्कराभ्यां सूर्यचन्द्राभ्यां देवीभ्यां च हीने अधमवीरासनं स्यात्।

ध्रुवबेरम् - आभिचारिकासनम्

देवेशः आसने समासीनः चतुर्भुजः द्विभुजो वा भवेत्। अयं तमोगुणान्वितः ऊर्ध्वनेत्रः अयोग्यकाले चरराशौ स्थापितः पैशाचपदस्थः स्यात्। एतदाभिचारिकासनं भवति।

ध्रुवबेरम् - उत्तमयोगशयनम्

देवः द्विभुजः शयानः भवेत्। उपधाने विन्यस्तदक्षिणहस्तः प्रसारितवामहस्तः सर्वाभरणभूषितः उन्मीलितलोचनः भृगुपुण्याभ्यां भूमिपुण्याभ्यां वा अर्चितः पादपार्श्वे मधुकैटभसंयुक्तः नाभ्यम्बुजे समासीन ब्रह्मापञ्चायुध - गरुड-विष्वक्सेन-सप्तर्षिभिश्च समायुक्तः भित्तिपार्श्वे समासीनाभ्यां ब्रह्मशङ्कराभ्यां च समायुक्तः स्यात्। एतदुत्तमयोगशयनम् भवति

ध्रुवबेरम् – मध्यमयोगशयनम्

उत्तमयोगशयने स्थापितैः सप्तर्षिभिः विष्वक्सेनेन च हीने मध्यमम् योगशयनं स्यात्।

ध्रुवबेरम् – अधम योगशयनम्

उत्तमयोगशयने स्थापिताभ्यां पूजकमुनिभ्यां मधुकैटभाभ्यां च हीने अधमयोगशयनं भवति।

ध्रुवबेरम् – उत्तमभोगशयनम्

देवेशः श्यामलाङ्गः दर्शनीयः चतुर्भुजः द्विभुजो वा भवेत्। अर्धार्धशयानः चापवत्गात्रः उपधाने विन्यस्त दक्षिणहस्तः वामोरौ प्रसारितवामहस्तः शयानः स्यात्। शिरः पार्श्वे देवस्य वामाङ्घ्रिसंस्पृशा महीदेवी धृतोत्पलदक्षिणहस्ता कटिन्यस्त वामहस्ता भवेत्। कौतुकस्य दक्षिणे मार्कण्डेयः वामे भृगुः दक्षिणे भित्तिपार्श्वे आसीनः बह्मा वामे शङ्करः दक्षिणे वक्रतुण्डः वामे विन्ध्यवासिनी पादभागे अनन्तविषज्वालाभिः दह्यमानौ उग्रवेगसमन्वितौ मधुकैटभौ स्थापनीयौ। नाभिदेशे पद्मासने समासीनः ब्रह्मा दक्षिणे निशाकरः तथा बालरूपौ तुम्बुरनारदौ दक्षिणे अश्विन्यौ लोकपालाः अप्सरसश्च एतैस्संयुक्तम् उत्तमभोगशयनं स्यात्।

ध्रुवबेरम् – मध्यमभोगशयनम्

उत्तमभोगशयने स्थापिताभ्यां तुम्बुरनारदाभ्याम् अश्विनीभ्यां लोकपालैश्च हीने मध्यमभोगशयनम् भवति।

ध्रुवबेरम् – अधमभेगशयनम्

उत्तमभोगशयने स्थापिताभ्यां पूजकमुनिभ्याम् अप्सरोभिश्च हीने अधमभोगशयनं भवेत्।

ध्रुवबेरम् – उत्तमवीरशयनम्

देवेशः श्यामवर्णः चतुर्भुजः शङ्खचक्रधरः शिरोपधाने विन्यस्त दक्षिणहस्तः प्रसारितवामहस्तः शयानः भवेत्। पादपार्श्वे पादमर्दिन्यौ श्रीभूम्यौ पादपार्श्वे मधुकैटभौ कौतुकस्य दक्षिणे मार्कण्डेयः वामे भृगुः भित्तिपार्श्वे आसीनः ब्रह्मा-पञ्चायुधः – गरुड – चन्द्र- आदित्य – सप्तर्षि – द्वादशादित्य – एकादशरुद्र –

जयादि अप्सरस - तुम्बुरनारद - सनकसनत्कुमार - ब्रह्मेशाः तत्तत्स्थानेषु संयुक्ताश्चेत् उत्तमवीरशयनं भवेत्।

ध्रुवबेरं - मध्यमवीरशयनम्

उत्तमवीरशयने स्थापितैः एकादशरुद्रैः आदित्यैः अप्सरोभिश्च हीने मध्यमवीरशयनं स्यात्।

ध्रुवबेरम् - अधमवीरशयनम्

उत्तमवीरशयने स्थापिताभ्यां किन्नरमिथुनाभ्यां सनकसनत्कुमाराभ्यां पूजकमुनिभ्यां च हीने अधमवीरशयनं भवेत्।

ध्रुवबेरम् - आभिचारिकशयनम् उत्तमम्

लक्षणहीनः अनन्तः द्विफणः द्विवलयः अनुन्नतशिरः, देवः द्विभुजो चतुर्भुजो वा भवेत्। अयं च समशयनः महानिद्रासमायुक्तः शुष्कवक्त्रः शुष्काङ्गः सर्वदेवैर्विहीनः भवति। एतदुत्तमाभिचारिकशयनं स्यात्।

ध्रुवबेरम् - मध्यमाभिचारिकशयनम्

अनन्तस्य एकफणम् एकवलयं मध्यमाभिचारिकशयनं स्यात्।

ध्रुवबेरम् - अधमाभिचारिकशयनम्

सर्पेण विना समस्तशयनम् अधम आभिचारिकशयनं भवति।

इत्थं ध्रुवबेरस्य स्थानकादीनां स्वरूपं विमानार्चनाकल्पे[1] सुस्पष्टं प्रतिपाद्यते।

ज्ञानकाण्डे[2] तु स्थानकासन शयनेषु स्थानकं योग - भोग-विरह - वीरात्मना, आसनं- योग - सुख-भोग -वीरभेदेन, शयनं योग - भोग - वीरभेदात्मना च निर्दिष्टम्।

क्रियाधिकारे[3] तु स्थानकासनशयनेषु एकैकः योगभोगवीरविरहात्मना विभज्यते।

खिलाधिकारे[4] स्थानकादित्रयं योग-भोग-वीरभेदेन उच्यते।

---

1. पृ.92-101
2. पृ.93-4
3. पृ.5,74-7
4. 12-अ.

यज्ञाधिकारे[1] तु स्थानकासन शयने द्वे योगभोगवीरविरह भेदेन तथैवासीनं, योगभोगवीर इति, तेषु स्थानकादि भेदाः प्रत्येकम् उत्तममध्यमाधमात्मना योगासनं भोगशयनं च श्रेष्ठमध्यमाधमभेदेन भोगासनं योगवीरशयनेच उत्तम मध्यमाधमविधिना च विव्रियन्ते[2]। एतेषां लक्षणानि अस्पष्टानि प्रोच्यन्ते।

विग्रहलक्षणानां मूलाधारभूतं शिप्लशास्त्रम्। आगमग्रन्थेष्वपि शिल्पशास्त्रमिव विग्रहलक्षणानि प्रतिपाद्यन्ते। शास्त्रोक्तप्रकारेण निर्मितान्येव विग्रहाणि पूजार्हाणि भवन्ति। नियमव्यतिरिक्ततया विग्रहाणि नैव निर्मितानीति आगमग्रन्थाः कथयन्ति। विग्रहनिर्माणार्थं प्रमाणानि वैखानसग्रन्थेषु[3] निरूप्यन्ते। तद्यथा -

अङ्गुलसंज्ञा

मानाङ्गुलं मात्राङ्गुलं देहलब्धाङ्गुलमिति प्रथममङ्गुलं त्रिविधं भवति। तत्र मानाङ्गुलमित्थं विभज्यते। जालकान्तः प्रविष्टे सूर्यरश्मौ यद्गोचराः क्षुण्णाः लवाः अणवः अथवा परमाणवः इति कथ्यन्ते।

मानाङ्गुलम्

अष्टौ परमाणवः रथरेणुः।

अष्टौ रथरेणवः रोमाग्रम्

अष्टौ रोमाग्राणि लिख्यः

अष्टौ लिख्याः यूकः

अष्टौ यूकाः मानाङ्गुलम्।

मात्राङ्गुलम्

मध्यमपुरुषदक्षिणहस्तस्य मध्यमाङ्गुलेः मध्यमपर्वणः विस्तारम् आयमं वा मात्राङ्गुलपदेन व्यपदिश्यते।

---

1. अ-15-16
2. आगमीयबेरविवेकः उण्डे मने शङ्करभट्टः *Journal of the Ganganath Jha, Kendriya Sanskrit Vidyapeetha, Allahabad - 1973 p.57*
3. वि.पृ.155, ज्ञा.पृ.87, स.22,1-6, क्रि.3,8-10, खि.14,1-9, य 19,1-5

देहलब्धाङ्गुलम्

ध्रुवबेरस्य उत्सेधं दशधा विभज्य एकांशें तालं तदेव देहलब्धाङ्गुलमिति व्यवह्रियते।

तालमानेन बेराणां निर्माणम्

ध्रुवादिबेराणां निर्माणं तालमानेन कर्तव्यमिति शिल्पशास्त्रोक्तवत् वैखानसग्रन्थेषु निर्दिश्यते। तत्र तालं नाम द्वादशाङ्गुलपरिमितं भवेत्[1]। प्रत्येकस्य विष्णोः प्रतिमा दशतालमानेन निर्मातव्यमिति विशेषतया दृश्यते। यथा -

उत्तममध्यमाधमभेदेन दशतालमानं त्रेधा विभज्यते। तत्र उत्तमदशतालमानं शताधिकचतुर्विंशत्यङ्गुलं भवति।

विष्णुब्रह्मशङ्कराः **उत्तमदशतालमानेन**

श्री-भू-उमा-सरस्वत्यः **मध्यमदशतालमानेन** इन्द्र - द्वादशादित्य- चन्द्र - रुद्र - भृगु - मार्कण्डेय प्रभृतयः **अधमदशतालमानेन** निर्मातव्याः।

यक्षेशनवग्रहादयः नवार्धतालमानेन
दैत्यरक्षोरगेशाः उत्तमनवतालमानेन
देवकल्पादयः त्र्यङ्गुलाधिकनवतालमानेन
निशाचरादयः नवतालमानेन
मर्त्याः अष्टतालमानेन
वेतालाः सप्ततालमानेन
प्रेताः षट्तालमानेन
कुब्जाः पञ्चतालमानेन
वामनाः चतुस्तालमानेन
भूतकिन्नराः त्रितालमानेन
कूष्माण्ड्याः द्वितालमानेन
कबन्धाः एकतालमानेन कल्पनीयाः इति[2]।

---

1. वि.पृ.153, 2. वि. पृ. 157, य 19,17-22

वैखानसग्रन्थेषु निर्दिष्टाः परिवारदेवाः

देवता	स्थानम्	क्रियाधिकारः अ	श्लो	खिलाधिकारः अ.	श्लो.
1. श्री	देवदक्षिण	5	98	15	98
2. भूः	वाम	5	99		
3. भृगुमार्कण्डेयौ	भित्तिमूल दक्षिणवाम	5	101		
4. ब्रह्मशङ्करौ	ध्रुवबेर दक्षिण वाम	5	104		
5. शिव	कौतुकावरण	5	110		
6. धात्रादिद्वारदेवाः	द्वारस्थान	5	115	17	196
7. मणिकादि द्वारपालाः	द्वारपार्श्व	5	123	17	198
8. श्रीभूतः	सोपानमध्य	5	130	17	202
9. न्यक्षादयः	विमानस्थान	5	131	17	210
10. हविष्पालः	हविस्थान	5	138		
11. पुष्पेशः	पुष्पस्थान	5	140		
12. इन्द्रालयः	दिक्स्थान	5	141	15	6
13. विष्वक्सेनः	शान्तसोममध्य	5	155	15	52
14. गरुडः		5	165	15	56
15. वक्रतुण्डः	–	5	170	15	65
16. अनन्तः	गोपुरबाह्य	5	171	15	70
17. भौमः		5	173	15	75
18. शनिः		5	174	15	76
19. बृहस्पतिः		5	176	15	77
20. बुधः		5	177	15	79

21. शुक्रः		5	179	15	81
22. जाह्नवी		5	180	15	82
23. चन्द्रः		5	182	15	85
24. श्रीः		5	184	15	98
25. सप्तरोहिण्यः		5	186	15	100
26. धात्री		5	188	15	104
27. ज्येष्ठा		5	190	15	108
28. भृग्वादयः		5	198	15	130
29. गविष्ठः		5	215	15	147
30. वायुः		5	217	15	149
31. अग्निः		5	219	15	150
32. तोयं		5	221	15	151
33. भूः		5	223	15	152
34. सावित्री		5	225		
35. सर्वेश्वरः		5	228		
36. सप्तमातरः		5	229		
37. स्कन्धः		5	242	15	160
38. चक्रम्	आस्थानमण्डप	5	259	15	180
39. गरुडः	ध्वजस्थान	5	262	15	182
40. ध्वजः		5	267		
41. शङ्खः		5	271	15	188
42. भूतः		5	272		
43. बलिपीठम्		5	276		
44. यूधाधिपपीठम्	द्वितीयावरण	5	291		
45. विष्वक्सेनादयः		5	294	15	221

लक्षणोक्तदिशा निर्दिष्टाः एते परिवारदेवताः विमानार्चनाकल्पे न दृश्यन्ते।

बिम्बप्रतिष्ठाविधिः

ध्रुवादीनां बिम्बानि यथाशास्त्रं विनिर्माय भगवदालये आवाहनपुरस्सरं प्रतिष्ठा करणीया। ध्रुवबिम्बस्य प्रतिष्ठा अचलप्रतिष्ठेति कौतुकादीनां प्रतिष्ठा चलप्रतिष्ठेति च व्यपदिश्यते।

ध्रुवबिम्बप्रतिष्ठा

ध्रुवबिम्बप्रतिष्ठायां बिम्बप्रतिष्ठाकालः अङ्कुरार्पणम् अक्ष्युन्मोचनम् अधिवासः कुम्भपूजा शयनाधिवासः होमः रत्नादिन्यासः दक्षिणादानं बिम्बसंस्थापनम् आवाहनम् प्रतिष्ठाफलं परिवारप्रतिष्ठा इत्येते अंशाः अन्तर्भवन्ति।

बिम्बप्रतिष्ठाकालः

ध्रुवबिम्बस्य प्रतिष्ठा कालः वैखानसग्रन्थेषु सविशेषम् उपवर्ण्यते। यथा - मासेषु उत्तरायणे पुष्य - फाल्गुण - चैत्र - वैशाख - ज्येष्ठाः उत्तमाः। दक्षिणायणे श्रावण-आश्वयुज - कार्तीकमासाः मध्यमाः। आषाढभाद्रपदमासौ द्वौ अधमौ इति, नक्षत्रेषु उत्तरा - रोहिणी -श्रवणम् - पुष्यमी - पुनर्वसू - स्वाती - हस्ता - चित्र - अनूराधा - अश्विनी एतानि प्रशस्तानीति, तिथिषु शुक्लपक्षे पञ्चमी- सप्तमी-दशमी-पूर्णिमा, कृष्णपक्षे प्रथमा - द्वितीया - पञ्चमी इति, वारेषु सोम - गुरु - बुध - शुक्राः इति, करणेषु विशिष्टेषु ध्रुवेषु चरेषु वा, राशिषु स्थिर उभयराशी वा, बिम्बप्रतिष्ठार्थं योग्याः इति विमानार्चनाकल्पे[1] प्रतिपाद्यते।

मासेषु मार्गशीर्षमाघौ, तिथिषु पक्षछिद्राः, करणेषु अष्टविधा विष्ठिः, राशिषु चरराशयः, नक्षत्रेषु आर्द्रा- आश्लेषा - मूलाः, कालेषु कृष्णाष्टमी - उल्कापात- अशनिपात -दिग्दाह - पांसुलोहित - उपलवर्ष - व्यतीपात - भूकम्प-अतिमारूत - राजमरण - चन्द्रसूर्योपरागयुक्तानि नक्षत्राणि, रात्रिश्च बिम्बप्रतिष्ठायां त्याज्यः कालः भवेत्[2]।

---

1. पृ.202   2. *Ibid*

आचार्यः

भगवद्बिम्बप्रतिष्ठायां वरणीयस्य आचार्यस्य लक्षणं विमानार्चनाकल्पे दृश्यते। यथा -

वैखानससूत्रोक्त संस्कारयुतः सुमनस्कः अर्चनादिसर्वप्रयोगज्ञः मन्त्रकल्पवित् श्रोत्रियः श्रुतवृत्तशीलसम्पन्नः शुभदर्शनः आचार्यः बिम्बप्रतिष्ठाकर्मणि वरणीयः[1]।

बिम्बप्रतिष्ठा कर्मणि वरणीयानां ऋत्विजां लक्षणानि यथा -

ऋत्विजः

शुद्धदन्ताः शुभकर्मसंयुक्ताः नियताहाराः दर्भास्तरणशायिनः त्रिषवणस्नाताः जितेन्द्रियाः ऋत्विजः भवेयुः[2]। आचार्यसहायकाः एते षोडश संख्याकाः बिम्बप्रतिष्ठा कर्मणि नियुज्यन्ते[3]।

अङ्कुरार्पणम्

अङ्कुरार्पणं विना कृतं कर्म निष्फलं भवति[4]। अतः बिम्बप्रतिष्ठा कर्मणि अङ्कुरार्पणं सर्वेषु वैखानसग्रन्थेषु उपवर्ण्यते। अस्मिन् कर्मणि अंकुरार्पणकालः अङ्कुरार्पणपात्राणि अङ्कुरार्पणपदविभागः अङ्कुरार्पणधान्यानि अङ्कुरार्पणप्रकारः सद्योङ्कुरार्पणमित्येते अंशाः वर्तन्ते।

अङ्कुरार्पणकालः

ध्रुवबिम्बप्रतिष्ठायाः पूर्वं नव - सप्त-पञ्च-त्र्यहेषु अन्यतमे दिने अङ्कुरार्पणं कुर्यादिति अङ्कुरार्पणकालः वैखानसग्रन्थेषु[5] एकरूपतया प्रतिपाद्यते। दिवसे अङ्कुरार्पणं नैव कार्यम्।

अङ्कुरार्पणपात्राणि

अङ्कुरार्पणे पालिका - कुम्भ - शरावसंज्ञकानि त्रीणि पात्राणि उपयुज्यन्ते। तानि सुवर्ण रजत ताम्र मृण्मयेषु अन्यतमेन निर्मातव्यानि भवन्ति। प्रतिष्ठा कर्मणि

---

1. वि.पृ.203 2. वि.पृ.204 3. वि.पृ.203 अक्ष्युन्मोचनहोमार्थमेकं, वास्तुहोमस्यैकं पञ्चाग्नीनां पञ्च अब्जहोमस्यैकं ब्रह्मसोमावृत्विजौ द्वौ होतारमेकं, स्नपनार्थमेकं सर्वदेवार्चनार्थं द्वौ स्थापनार्थं द्वौ।
4. वि.पृ.202
5. वि.पृ.198, य.22,2, प्र.10,2, क्रि.37,3

ब्राह्मणः यजमानश्चेत् पात्राणां प्रत्येकं षोडश, क्षत्रियः यजमानश्चेत् द्वादश वैश्यः यजमानश्चेत् अष्टौ, शूद्रः यजमानश्चेत् चत्वारि ग्राह्याणीति वर्णानुरोधेन पालिकादिसंख्याभेदः वर्ण्यते। सर्वेषां चत्वारि वा संख्याकानि ग्राह्याणि भवन्ति। तेषां लक्षणानि यथा -

पालिका

पालिका मात्राङ्गुलेन चतुर्विंशत्यङ्गुलं समवृत्तं भवेत्। तस्याः उत्सेधं षोडशांशं कृत्वा पादमेकांशं, नालं त्र्यंशं, द्व्यंशं पालिका भवति। तस्याः पादोदरविष्कम्भं दशाङ्गुलं, भित्तिकमर्धाङ्गुलं, मुखस्य उदरविष्कम्भं षोडशाङ्गुलं, भित्तिकमर्धाङ्गुलं, क्रमात् नालान्तं संक्षिप्तम्। ओष्ठतारादेकाङ्गुलम्। एवं पालिकायाः स्वरूपं भवति।

कुम्भः

कुम्भस्य उदरविष्कम्भं षोडशाङ्गुलं, भित्तिकमर्धाङ्गुलं, मुखस्य उदरविष्कम्भं पञ्चाङ्गुलं, भित्तिकमर्धाङ्गुलं, कण्ठोत्तुङ्गमेकाङ्गुलम्, ओष्ठवलयमेकाङ्गुलं, इदं कुम्भाकारं भवेत्। चतुर्दिक्षु भागविस्तृतं द्वारयुतं शेषं पालिकावत् भवति। इत्थम् कुम्भस्वरूपम्।

शरावः

शरावस्य ओष्ठमेकाङ्गुलम्। अन्यत्सर्वं पालिकावत् स्यात्।

इत्थं पालिकादीनां लक्षणानि विमानार्चनाकल्पे[1] दृश्यन्ते। अन्येषु ज्ञानकाण्ड[2] - क्रियाधिकार[3] - [4]यज्ञाधिकारेषु पालिकादीनां लक्षणमस्पष्टं वर्ण्यते।

अङ्कुरार्पणपदविभागः

अङ्कुरार्पणकर्मणि पालिकादीनां स्थापनार्थं पदविभागः वैखानसग्रन्थेषु प्रतिपाद्यते। तद्यथा -

प्रागन्तैश्चोत्तरान्तैश्च अष्टभिः सूत्रैः निर्मितेषु एकोनपञ्चाशत्पदेषु मध्ये नवानि पदानि ब्रह्मणः, तं परितः प्रागाद्यष्टसु दिक्षु जया विजया विन्दा नन्दा - पुष्टिका - कुमुद्वती-उत्पलका - विशोकानां, तद्बाह्ये इन्द्रादीनाम् अष्टौ पदानि, तद्बाह्येषु ईशानादि चतुर्विंशतिपदेषु ईश-पर्जन्य - जयन्त - महेन्द्र - आदित्य

1. पृ.198
2. पृ.101
3. 37,3-15
4. 22,3-5

सत्यक - अग्नि - वितथ - ग्रहक्षत - यम - गन्धर्व - भृङ्गराज-निर्ऋति-
दौवारिक - सुग्रीव - सरित्पति - असुर - शोषण - जवन-नाग-मुख्य-सोम-
अर्गळ - अदितीनां, एतेषु देवतापदेषु जयन्ते शेषस्य, आदित्ये वक्रतुण्डस्य,
ग्रहक्षते गरुडस्य, गन्धर्वे चक्रस्य, सुग्रीवे पङ्क्तीशस्य, असुरे भूतेशस्य, मुख्ये
शङ्खस्य, सोमे अङ्कुराधिपसोमस्य, अर्गले शान्तस्य च स्थानानि कल्पयेत्। तत्र
ईश - अग्नि - निर्ऋति - जवनेषु पदेषु चतस्रः पालिकाः, पर्जन्य- वितथ-
दौवरिक - नागेषु पदेषु चत्वारः कुम्भाः, सत्यक भृङ्गराज - शोषण - अदिति-
पदेषु चत्वारः शरावाः स्थापनीयाः। सोमस्य स्थाने सोमकुम्भः स्थापनीयः।

निर्दिष्टेषु एतेषु देवतास्थानेषु क्रमेण नामपूर्वकदेवताह्वानम् अर्चनं
बलिप्रदानञ्च विमानार्चनाकल्पे[1] क्रियाधिकारे[2] च वर्ण्यते।

अङ्कुरार्पणपदविभागपट्टिका

उ

जवन	नाग	मुख्य-शङ्ख	सोम- अङ्कुराधिपसोम	अर्गल शान्त	अदिति	ईशन्
शोषण	वायु		कुबेर		ईशन्	पर्जन्य
असुर- भूतेश-		कुमुद्वती	उत्पलका	विशोका		जयन्त- शेष
सरित्पति	वरुण	पुष्टिका	ब्रह्मन्	जया	इन्द्र	महेन्द्र
सुग्रीव पङ्क्तीश		नन्दा	विन्दा	विजया		आदित्य- वक्रतुण्ड
दौवारिक	निर्ऋति		यम		अग्नि	सत्यक
निर्ऋति	भृङ्गराज	गन्धर्व- चक्र	यम	ग्रहक्षत- गरुड	वितथ	अग्नि

प (left of table)

द

1. पृ.200-1
2. 37,22-33

पालिकादीनां स्थापनप्रकारः

उ

पालिका	कुम्भः				शरावः	पालिका
शरावः						कुम्भः
कुम्भः						शरावः
पालिका	शरावः				कुम्भः	पालिका

पू

द

अङ्कुरार्पणधान्यानि

बिम्बप्रतिष्ठाङ्गाङ्कुरार्पणकर्मणि पदकल्पनानन्तरं पालिकादिषु अङ्कुरार्पण पात्रेषु निक्षेप्यमाणानि धान्यानि कथ्यन्ते[1]। तानि यथा -

शालि - व्रीहि - यव -मुद्ग-माष-प्रियङ्गु- गोधूम - सर्षप-चणक - तिल्व - मसूराणि इति।

अङ्कुरार्पणप्रकारः

अलङ्कृते मण्डपे पददेवताः पालिकाकुम्भशरावाणि देवताश्च समर्चनीयाः। ततः सोमकुम्भे सोमस्यार्चनपूर्वकं पालिकादिषु अङ्कुरार्पणपात्रेषु शाल्यादीनां बीजानां न्यासः कार्यः[2]।

सद्योऽङ्कुरार्पणम्

अङ्कुरार्पणं पूर्वोक्तरीत्या कर्तुमशक्तश्चेत् सद्योऽङ्कुरार्पणं कर्तव्यमिति विमानार्चनाकल्पे निर्दिश्यते। अङ्कुरार्पणोक्तानां सर्वासां क्रियाणां समाप्त्यनन्तरं श्वेततण्डुलैः पद्माद्यैः श्वेतपुष्पैश्च पालिकादीन् समन्त्रकं पूरयेदिति ततः प्रतिष्ठाकर्म समारभेदिति च सद्योऽङ्कुरार्पणप्रकारः वर्ण्यते[3]।

---

1. वि.पृ.199, क्रि.37,16-7, स.26,10, ज्ञा.पृ.101, य.22,7
2. वि.पृ.200-1 3. वि.पृ.202

अक्ष्युन्मोचनम्

अङ्कुरार्पणसमनन्तरं ध्रुवादिबिम्बानाम् अक्ष्युन्मोचनं विधीयते। तत्र अक्ष्युन्मोचनं शिल्पिकर्तृकम् आचार्यकर्तृकं चेति द्विविधं भवति।

अक्ष्युन्मोचनस्य कालः

ध्रुवादिबिम्बानाम् अक्ष्युन्मोचनं प्रतिष्ठादिवसात् पूर्वं नवमे सप्तमे पञ्च त्र्यहे द्वितीये वा अह्नि कुर्यादिति तत्रापि विशेषतः अर्कराहुसौराणामुद परिवर्जयेदिति च अक्ष्युन्मोचनस्य कालः विमानार्चनाकल्पे[1] कथ्यते। तथैः यज्ञाधिकारेऽपि। अवशिष्टेषु कतिपयेषु वैखानसग्रन्थेषु[2] प्रतिष्ठोक्तदिनात्पूर्वं पञ्च दिने एव अक्ष्युन्मोचनं कुर्यादिति अक्षिमोचनस्य कालः निर्णीयते।

अक्ष्युन्मोचनं -शिल्पिकर्तुकम्

ध्रुवबिम्बप्रतिष्ठोक्तदिनात्पूर्वं तृतीये दिने शिल्पिकर्तृकम् अक्ष्युन्मोच खिलाधिकारे[3] सुस्पष्टमुच्यते। तथा हि - शिल्पिना शिल्पशास्त्रोक्तमार्गे अक्ष्युन्मोचनम् अमन्त्रकं कर्तव्यमिति ततः यजमानः वस्त्राभरणैः शिल्पि संपूजयेदिति च कथ्यते।

ध्रुवबिम्बस्य अक्ष्युन्मोचनम्

हेमपात्रे वर्णं गृहीत्वा मेदिनीमभ्यर्च्य पद्मादिमण्डलानि संकल्प्य आचा समन्त्रकमक्ष्युन्मोचनं कुर्यात्[4]।

कौतुकादिबिम्बानामक्ष्युन्मोचनम्

कौतुकादिबिम्बानामक्ष्युन्मोचनं चेत् पूर्वेद्युः तद्दिने वा कौतुकादी पीठसंघातं कुर्यात्। पीठे ब्रह्मस्थाने ब्रह्ममणिं, इन्द्रे वज्रमणिं, आग्नेय्यां मौक्तिं याम्ये वैदूर्यं, नैर्ऋत्यां शङ्खजं, वारुण्यां स्फटिकं, वायव्यां पुष्यकं, सौम् चन्द्रकान्तम्, ऐशान्यां नीलं च समन्त्रकं विन्यसेत्। अथवा चतुर्दिक्षु पञ्चरत्ना निक्षिपेदिति, रत्नालाभे सुवर्णं समन्त्रकं वा निक्षिपेत्। ततः पीठे कौतुकादिबेरा संयोजयेदिति विमानार्चनाकल्पे[5] उच्यते।

---

1. पृ.204
2. क्रि.6,63, ज्ञा.पृ.104, स.28,54
3. 16,114-6
4. वि.पृ.207
5. पृ.204-5

ततः आलयाभिमुखे मण्डपे कौतुकादीनां बिम्बनां स्नपनानन्तरं मण्डपस्य मध्ये विष्ठरे संस्थाप्य तदुत्तरे औपसनाग्निकुण्डे वास्तुहोमं विधाय पञ्चगव्यैः बेराणि अभ्युक्षयेत्। ततः दक्षिणे औपासनाग्निकुण्डं कृत्वा जुहुयात्। कौतुकादिबिम्बनाम् अभिमुखे सुवर्णश्रृङ्गं रौप्यखुराम् सवत्सां वस्त्रबन्धां पुष्पादिभिरलङ्कृतां गामेकां संस्थाप्य गोदानसूक्तेन अभिमृश्य घृतदधिमधुक्षीरं च सौवर्णादिपात्रेषु संगृह्य बेराभिमुखे निधाय घृतादीनिसमभ्यर्च्य व्रीहि - यव-माष-मुद्ग-तिल-तिल्व - प्रियङ्गु-सर्षपाणि अष्टौ धान्यानि प्रत्येकं राशीकृत्य तदधिदेवं वायुमभ्यर्च्य देवाभिमुखे निधाय प्रच्छन्नपटं कृत्वा समन्त्रकमाचार्यः कौतुकादिबिम्बनाम् अक्ष्युन्मोचनं कारयेत्। प्रच्छन्नपटमपहाय गो-धान्यादीनि भगवतः संदर्शयेत्। कौतुकादिबेराणाम् अक्ष्युन्मोचनान्ते बेराधिवासादिनि कारयेत्।

देव्यादीनामक्ष्युन्मोचनम्

देव्योः ब्रह्मेशयोः दौवारिकानां च तत्तन्मन्त्रेण अक्ष्युन्मोचनं कुर्यात्। विमानं नवं चेत् तस्यः स्थूप्याद्युपानान्तम् अङ्गनामभिः होमं विधाय विमानदेवानाम् अक्ष्युन्मोचनादीनि कुर्यात्। एते अक्ष्युन्मोचनप्रकारांशाः विमानार्चनाकल्पे एव सविशेषं दृश्यन्ते।

ध्रुवबेरस्याक्ष्युन्मोचनान्ते बेरशुद्ध्यर्थं नवकलशस्नपनं कुर्यात्।

अधिवासः

प्रतिष्ठाकर्मणि बिम्बानाम् अक्ष्युन्मोचनानन्तरं बेरशुद्ध्यर्थं पञ्चगव्ये - क्षीरे-जले च अधिवासः विमानार्चनाकल्पे[1] प्रोच्यते। समूर्तार्चनाधिकरणे[2] तु जले पञ्चगव्ये - कुशोदके च अधिवासः प्रकारान्तरेण प्रतिपाद्यते। अयं चाधिवासः प्रत्येकम् अहोरात्रं केवलं दिवा वा कुर्यादिति निर्दिश्यते।

अधिवासप्रकारः

प्रपां निर्माय तत्र जलद्रोण्यां पञ्चगव्यानि संयोज्य तत्र प्राक्शिरः बिम्बं शाययेत्। ततः प्रभाते अधिवासस्थबिम्बमुद्धृत्यसप्तभिः कलशैः संस्नाप्य क्षीरपूरितायां द्रोण्यां बिम्बं शाययेत्। ततः प्रभाते सप्तभिः कलशैः बिम्बं संस्नाप्य

---

1. पृ.210 2. 28,56-62

नदीं ह्रदं तटाकं वा आश्रित्य तत्र जले बिम्बं प्राक्शिरः शाययेत्। अयमे जलाधिवासः।

कुम्भपूजा - ध्यानम्

सुवर्ण - रजत -ताम्र -मृण्मयादिषु अन्यतमे कुम्भे जलमापूर्य तस्मि कुशकूर्चाक्षतान् पल्लवाः, पद्मराग वज्र वैदूर्य मौक्तिक मरकतादिरत्ना सुवर्णनिर्मितानि श्रीवत्स - पूर्णकुम्भ - भेरी - आदर्श - मत्स्ययुग्म - अङ्कुश शङ्ख-आवर्तानि अष्टमङ्गलानि, स्रुक् - स्रुव - कमण्डलु -जुहू-उपजुहू - छत्र चामरादीनि च निक्षिप्य आचार्यः हृदये विष्णुं सकलं संकल्प्य समावाह्य अर्चयेत्

शयनाधिवासः

ध्रुवबिम्बप्रतिष्ठाकर्मणि जलाधिवाससमनन्तरं यागशालायां मध्ये बिम्बशयनार्थं शय्यावेदिः कल्पनीया। तस्यां वेद्यां शालिधान्यानि यवतण्डुला तिलानि च उपर्युपरि आस्तीर्य चर्मज -रोमज-मुण्डज-अण्डज-वामजा तल्पानि[2] क्रमेण उपर्युपरि विन्यस्य नववस्त्रेण आच्छाद्य शिरोपधानं पादोपधा च विन्यस्य बिम्बं मन्त्रपूर्वकेन शाययेत्, अयमेव शयनाधिवासः[3]।

होमः

ध्रुवबिम्बप्रतिष्ठायां शयनाधिवासानन्तरम् आहवनीयाद्यग्निकुण्डेषु हो विधीयते। आलयस्य पुरतः दक्षिणे वा षोडशस्तम्भसंयुक्तां चतुरश्रां यागशाल निर्माय तां नवभागं प्रकल्प्य मध्ये शय्यावेदिः पूर्वे सभ्याग्निकुण्ड आहवनीयाग्निकुण्डश्च, आग्नेय्यां पौण्डरीकाग्निकुण्डः पश्चि

---

1. वि.पृ. 222
2. सिंहव्याघ्रादि चर्मकृतं चर्मजम्
   अजाविकादि रोमकृतं रोमजम्।
   कार्पासशाल्मल्यादि फलतूलकृतं मुण्डजम्
   पक्षि पिञ्छैः कृतमण्डजम्
   कौशेयक्षौमादिना कृतं वामजम्॥ वि.पृ. 226
3. स.32,22, ज्ञा.पृ.112-3, क्रि.7,71, खि.17,85, वि.पृ.226-

गार्हपत्याग्निकुण्डः उत्तरे आवसथ्याग्निकुण्डः कल्पयेत्[1] । एते याम्ये अन्वाहार्याग्निः कुण्डः अग्निकुण्डाः लक्षणोक्तदिशा निर्माय तेषु होमः कर्तव्यः इति वैखानसागमग्रन्थेषु प्रतिपाद्यते । तत्र होमे उपयुज्यमानान्युपकरणानि यथा-

अरणी

अश्वत्थाद्यज्ञदारुषु अन्यतमेव अरणी निर्मातव्या । तस्याः आयामं द्वितालं, विस्तारं षोडशाङ्गुलम्, उत्सेधं चतुरङ्गुलं स्यात् । ऊर्ध्वफलका तत्समा, आयामं द्वितालं, परीणाहं प्रादेशं, मूलाग्रयोः एकाङ्गुलिमात्रशिखासंयुक्तं मन्थदण्डं कुर्यात् । मथनार्थं मौञ्ज्या त्रिवृतां रज्जुं समाहरेत् ।

स्रुवम्

स्रुवस्यायामं द्विप्रादेशं, तस्य मूले प्रादेशपरीणाहं, तदर्धम् अग्रनाहं, मूलाग्रयोः एकाङ्गुलिमात्रशिखासंयुक्तं बिलादर्वाक् आनुपूर्व्येण संक्षिप्तम् अग्रे प्रादेशपरिमण्डलं गोलकं बिलविस्तारं माषाच्छादनगर्तद्वययुतं स्रुवं भवेत् ।

अग्निहोत्रहवणिः

अग्निहोत्रहवणेः आयामं षड्विंशत्यङ्गुलं, अधः षोडशाङ्गुलं दण्डं, परीणाहं द्वादशाङ्गुलं, तदूर्ध्ववृत्तं पञ्चाङ्गुलायामं, मध्ये निम्नं चतुरङ्गुलं, परितो भित्तिः एकाङ्गुला, अग्रान्तं घृताधारयुतं विस्तारम्, एकाङ्गुलं त्र्यस्रम्, अग्रात्, अधस्तात् पञ्चाङ्गुलं, आनुपूर्व्येण संक्षिप्तं घृताधारपार्श्वयोः एकाङ्गुलं, भित्तिः अर्धाङ्गुला, उपरि छत्राकारं, घनं चतुरङ्गुलं भवति ।

जुहूः

जुहोः प्रमाणं द्वितालायामं, मूलं द्वादशाङ्गुलपरीणाहं, पद्ममुकुलाकारम् अग्रे अष्टाङ्गुलायामा, विस्तारं चतुरङ्गुलम्, उन्नतं द्वादशाङ्गुलं, मध्ये निम्नमर्धाङ्गुलं, भित्तिः एकाङ्गुला, घृताधारयुतम्, ऊर्ध्वप्रदेशे मुकुलाकारम्, अधः प्रदेशे दण्डाकारं जुहूः स्यात् ।

उपजुहूः

उपजुहोः प्रमाणं द्वितालायामं, परीणाहं द्वादशाङ्गुलम्, अग्रे आयामम् अष्टाङ्गुलं समवृत्तं, भित्तिः अर्धाङ्गुला घृताधारयुतं भवेत् ।

---

1. वि.पृ.215-6

दर्वी

दर्वी तालद्वयायामा, अग्रे पञ्चाङ्गुलायामविस्तारा, मूले भागविस्तारायामा अग्रात् मूलादारभ्य मध्ये गोलकं क्षीणं, घनमेकाङ्गुलं भवति।

इत्थम् उपकरणानां लक्षणानि विमानार्चनाकल्पे[1] एव दृश्यन्ते। त अग्निकुण्डादीनां लक्षणानि यथा -

आहवनीयाग्निकुण्डः

आहवनीयाग्निकुण्डः द्विवेदि सहितः चतुरश्रश्च भवेत्। ऊर्ध्ववेदिः चतुः द्वात्रिंशत् अङ्गुलायामा, विस्तारं चतुरङ्गुलं, उत्सेधं द्व्यङ्गुलम्, अधोवे उत्सेधं विस्तारं च चतुरङ्गुलं, निम्नं पञ्चाङ्गुलं षडङ्गुलं वा स्यादि आहवनीयाग्निकुण्डश्च लक्षणं समूर्तार्चनाधिकरणे[2] दृश्यते।

विमानार्चनाकल्पे[3] तु औपासनाग्निकुण्डवत् आहवनीयाग्निकु निर्मातव्य इति उच्यते।

अन्वाहार्याग्निकुण्डः

अन्वाहार्याग्निकुण्डः द्विवेदिसहितः अर्धचन्द्राकृतिश्च स्यात्।

ऊर्ध्ववेद्याः विस्तारं दक्षिणोत्तरं त्रिंशदङ्गुलं, प्राक्पश्चिमं षष्ट्यङ्गुलं एकैकस्याः वेद्याः विस्तारम् उत्सेधञ्च चतुरङ्गुलं, मध्ये निम्नं षडङ्गुलं भवति

गार्हपत्याग्निकुण्डः

गार्हपत्याग्निकुण्डः द्विवेदिसहितः पूर्णचन्द्राकृतिश्च। ऊर्ध्ववेद्याः विस पादाधिकत्रिंशदङ्गुलम्, एकैकस्याः वेद्याः विस्तारम् उत्सेधं च चतुरङ्गुलं, म निम्नं षडङ्गुलं भवेत्।

आवसथ्याग्निकुण्डः

आवसथ्याग्निकुण्डः त्रिकोणःद्विवेदिश्च भवति। ऊर्ध्ववेद्याः विस षड्यवाधिकाष्टचत्वारिंशदङ्गुलम्, एकैकस्याः वेद्याः विस्तारम् उत्सेधं चतुरङ्गुलं, मध्ये निम्नं षडङ्गुलं प्रागग्रं भवेत्।

---

1. पृ. 212-3 2. 29, 22-5 3. पृ. 215

सभ्याग्निकुण्डः

सभ्याग्निकुण्डः त्रिवेदिसहितः चतुरश्रश्च स्यात् । ऊर्ध्ववेद्याः आयामं द्वात्रिंशदङ्गुलम् अधोवेद्याः आयामं पञ्चदशाङ्गुलम्, एकैकस्याः वेद्याः विस्तारम् उत्सेधं च चतुरङ्गुलं, मध्यवेद्याः विस्तारं पञ्चाङ्गुलं, मध्ये निम्नं पञ्चदशाङ्गुलम् अष्टाङ्गुलं द्वादशाङ्गुलं वा भवेत् ।

पौण्डरीकाग्निकुण्डः

पौण्डरीकाग्निकुण्डः त्रिवेदिसहितः पूर्णचन्द्राकृतिश्च स्यात् । एकैकस्याः वेद्याः विस्तारं चतुरङ्गुलम्, ऊर्ध्ववेद्याः आयामं सप्ताधिकत्रिंशदङ्गुलम्, अधो वेद्याः विस्तारं षडङ्गुलं, मध्ये निम्नम् अष्टाङ्गुलं दशाङ्गुलं वा भवेत् ।अयं च कुण्डः प्रागादि षोडशदलैर्युतः भवेत् ।

इत्थम् अन्वाहार्याद्यग्निकुण्डानां लक्षणानि विमानार्चनाकल्पे[1] दृश्यन्ते । ज्ञानकाण्डे[2] समूर्तार्चनाधिकरणे[3] च अन्वाहार्यादीनामेषां लक्षणानि अस्पष्टानि दृश्यन्ते ।

होमत्रैविध्यम्

श्री भूमिभ्यां ब्रह्मेशानभ्यां भृगुमार्कण्डेयाभ्यां वीशशेषाभ्यां च होम एव अधम इति - विमानपालेभ्यः इन्द्रादिलोकपालेभ्यः आदित्यसेनेशाभ्यां च होमः मध्यम इति द्वारपालेभ्यः चक्रध्वजशङ्खमहाभूतपावकार्जुनेभ्यश्च होमः उत्तम इति परिवारदेवतानुरोधेन होमत्रैविध्यं विमानार्चनाकल्पे[4] निर्दिश्यते ।

प्रधानहोमः

हौत्रशंसनपूर्वकं सभ्याग्निगुण्डे प्रधानहोमः प्रतिपाद्यते । वैष्णवविष्णुसूक्त पुरुषसूक्तादिभिः होमः सर्वदैवत्यक्रमेण कार्यः[5] । तद्यथा -

---

1. पृ. 215-6
2. पृ.108
3. 29,22-43
4. पृ.227
5. वि.पृ.230-32, ज्ञा.पृ.116-8, खि.17,227-77

क्र.सं	देवता	मन्त्राः	आकरः
1.	श्री-	श्रियेजात	ऋ 7-4-4
		हिरण्यवर्णा	वै.मं.6-5
2.	मही-	मेदिनी देवी	वै.मं.3-16
		भूमिर्भूम्ना	यजु 1-5-3
3.	ब्रह्मा-	ब्रह्मजज्ञानं	तै.ब्रा.2-8-8
		हिरण्यगर्भ	यजु.4-1-8
4.	रुद्र-	रुद्रमन्य	वै.मं.6-13
		त्र्यम्बकं	यजु.1-8-6
5.	मार्कण्डेय-	चिरायुषाय	वै.मं.6-12
		पुण्यौघनिष्ठाय	वै.मं.6-12
6.	भृगु-	पद्मापित्रे	वै.मं. 6-12
		भृगव	वै.मं.6-12
7.	द्वारदेव-	द्यावापृथिव्यो	वै.मं.6-14
		यस्याश्रियोवा	वै.मं.6-14
		तस्थुषोधृत्या	वै.मं.6-14
		य एषबिभ्रत्युक्त	वै.मं.6-14
		वितत्यविश्वं	वै.मं.6-14
		योनोभिरक्षत्य	वै.मं.6-14
8.	मणिक-	मुनीन्द्रं	वै.मं.6-15
9.	सन्ध्या-	सन्ध्यायै	वै.मं.6-15
10.	तापस-	तापसाय	वै.मं.6-15
11.	विखनस-	वैखानसायाच्युत	वै.मं.6-15
12.	किष्किन्ध-	किष्किन्धाय बहु	वै.मं.6-15

13.	तीर्थ-	तीर्थाय	वै.मं.6-15
14.	इन्द्र-	त्रातारमिन्द्र	यजु. 1-6-12
		महागुं इन्द्रोऽयऔजस	यजु.1-4-20
		महागुँ इन्द्रो नृवदा	यजु. 1-4-21
		भुवस्त्वमिन्द्र	यजु. 3-4-11
		एन्द्रसानसिगुं	यजु. 3-4-11
		प्रससाहिषो	यजु. 3-4-11
		अस्माकमिन्द्र	यजु.4-6-4
		इन्द्रो भूतस्य	वै.मं. 6-17
		इन्द्रो द्यौ	वै.मं. 6-17
		इन्द्रं प्रणवन्तं	वै.मं.6-17
		इन्द्रोवृत्रं	वै.मं. 6-18
		इन्द्रो बभूव	वै.मं. 6-18
		इन्द्रोऽस्मानमवतु	वै.मं. 6-18
15.	अग्नि-	अग्निर्मूर्धा	यजु. 4-4-4
		अयमग्नि	यजु.4-4-4
16.	यम-	यमोदाधार	वै.मं.6-19
		नसम्तेनिर्ॠतये	यजु.4-2-5
17.	निर्ॠति-	वसवःप्रथमो	वै.मं.6-19
		सहस्राक्ष	वै.मं.6-19
18.	वरुण-	येतेशतं	वै.मं.6-19
		उदुत्तमं	यजु. 1-5-11
		अयाश्चाग्ने	वै.मं. 6-20
		आपसृजन्तु	वै.म. 6-7

19.	वायु-	मरुतः परमात्मा	वै.मं.6-20
		मरुतो गणानां	यजु. 3-4-5
20.	कुबेर-	मिश्रवाससः	वै.मं.6-21
		एतान्घतैतान्	वै.मं.6-21
21.	ईशान-	ईशानः	वै.मं.6-20
		ईश ईशते	वै.मं. 6-20
22.	आदित्य-	उदुत्यं	यजु.1-4-43
		चित्रं देवानां	यजु 1-4-43
23.	अङ्गारक-	ममाग्ने	वै.मं.6-21
		अहमग्ने	वै.मं. 6-21
		अग्न आयाहि	साम. 1-1-1
24.	शनि-	प्रभुर्देवो	वै.मं. 6-22
		ग्रहाधिपतिः	वै.मं. 6-22
25.	गुरु-	बृहस्पतिर्देवानां	वै.मं. 6-22
		बृहस्पतिस्सोमं दधातु	वै.मं. 6-22
		बृहस्पते अतियत्	वै.म. 6.22
		उपयाम गृहीत	वै.मं. 6-23
26.	बुध-	श्रविष्टजो यः	वै.मं.6-23
		तद्विष्णोःपरमपदं	यजु. 1-3-6
		तद्विप्रास	ऋ. 1-2-7
27.	शुक्र-	प्रजापते नत्वदेता	यजु. 1-8-14
		सुभूस्स्वयं भूः	वै.मं. 6-23
28.	गङ्गा-	भूभामिनी	वै.मं. 6-23
		इष्टगामिन्यनि	वै.मं. 6-23

29.	चन्द्र-	सोमयास्ते	यजु. 4-1-8
		याते धामानि	यजु . 1-2-10
30.	रुद्र	रुद्रमन्यं	वै.मं. 6-13
		त्र्यम्बकं	यजु 1-8-6
31.	कुमार-	जगद्भुवं	वै.मं. 6-24
		जगद्भुवोऽधिपति	वै.मं. 6-24
		सुब्रह्मण्यो बृहस्पति	वै.मं. 6-24
		सुब्रह्मण्यो रुद्रभरो	वै.मं. 6-24
		जगद्भुवस्सुब्र	वै.मं.6-24
		जगद्भुवोयो यज	वै.मं. 6-25
32.	पुरुष-	अतोदेवा	ऋ.1-2-7
		इदं विष्णुः	यजु. 1-2-13
33.	धात्री-	या ब्रह्मचारिणी	वै.मं. 6-25
		सा चारुजन्म	वै.मं. 6-25
34.	ज्येष्ठा-	एषा मराणां	वै.मं. 6-25
		याम्यानियम्या	वै.मं.6-25
35.	दुर्गा-	जातवेदसे	ऋ. 1-99-1
		तामग्निवर्णां	वै.मं.1-59
		अग्नेत्वं पारय	वै.मं. 1-59
		विश्वानि वो	वै.मं. 1-59
		पृतनाजितं	वै.मं. 1-59
		प्रत्नोषिक	वै.मं. 1-59
36.	नन्दिनी-	नन्दिन्या मूलवत्या	वै.मं. 6-27
		आपोविवेश प्रजया	वै.मं. 6-27
37.	ग्रन्थिनी-	शाखाभूतसुशाखया	वै.मं. 6-27
		देवी प्रवाहिन्यानिशं	वै.मं. 6-27

38.	शाखिनी-	बिसिनीभूता	वै.मं. 6-28
		प्रविद्युताय सुमनो	वै.मं. 6-28
39.	प्रवाहिणी-	गङ्गावाणी सरस्वती	वै.मं. 6-28
		विधान्नो मातु वितनो	वै.मं. 6-28
40.	विकारिणी-	माताद्यमेया नही	वै.मं. 6-28
		आयामहान्त्वाजननी	वै.मं. 6-28
41.	दद्रुणी-	ययासतस्सत्यं	वै.मं. 6-29
		प्रसविन्यङ्गे मनवो	वै.मं. 6-29
42.	गङ्गावाणी-	याभ्योहि तप्तं	वै.मं. 6-29
		यामानसावधि	वै.मं. 6-29
43.	भृगु-	यतस्वमासी	वै.मं. 6-29
		अस्मा अस्मा	वै.मं. 6-30
44.	मरीचि-	कन्याङ्गिरोऽभूत्	वै.मं. 6-30
		विस्मापयत्यत्र	वै.मं. 6-30
45.	पुलह-	व्यावर्ततेयो	वै.मं. 6-30
		सस्मारसोग्रे	वै.मं. 6-30
46.	पुलस्त्य-	य एषो दान उदित	वै.मं. 6-31
		आनन्दरो दैत्य सरः	वै.मं. 6-31
47.	क्रतु-	प्रपायशोपान	वै.मं. 6-31
		येनिष्यन्ता	वै.मं. 6-31
48.	वसिष्ठ-	यो नो वशिष्ठ	वै.मं. 6-31
		सप्तोत्तमाये	वै.मं. 6-31
49.	अत्रि-	य आनसूयेशो	वै.मं. 6-31
		य एषदिग्भ्योव	वै.मं. 6-31
50.	आकाश-	स एकोऽभूद्दिवा	वै.मं. 6-32
		यस्त्रैष्टुभश्चाग्र	वै.मं. 6-32

51.	वायु-	प्रक्रम्याथ ऊर्ध्वं	वै.मं. 6-32
		यो मातरिश्वा	वै.मं. 6-32
52.	अग्नि-	वृषा कपेरिह	वै.मं. 6-32
		ओजोभिमानी	वै.मं. 6-33
53.	तोय-	आपोविश्व	वै.मं. 6-33
		चातुर्यमस्मिन्	वै.मं. 6-33
54.	पृथिवी-	तयादित्य	वै.मं. 6-33
		तत्रीण्यै	वै.मं. 6-33
55.	सरस्वती-	पावकानस्सरस्वती	ऋ.1-3-10
		महो अर्णस्सरस्वती	ऋ 1-1-6
56.	श्री-	शगुंसानि यच्छत्य	वै.मं. 6-34
		भूय आत्मवृत्या	वै.मं. 6-34
57.	न्यक्ष-	यउत्तमो मूर्तिमतो	वै.मं. 6-34
		अग्रेः पथायं	वै.मं. 6-35
58.	विवस्वान्-	यमर्पयन्ति	वै.मं. 6-35
		यस्संहरत्येष	वै.मं. 6-35
59.	मित्र-	रुचामधीषो	वै.मं. 6-35
		नीतां ध्रुतिं	वै.मं. 6-35
60.	महीधर-	येनेष्टरस	वै.मं. 6-35
		समूह्यतेम्बा	वै.मं. 6-35
61.	हविरक्षक-	चरुंपचेद्य	वै.मं. 6-35
		छुल्यागुं	वै.मं. 6-35
62.	ब्रह्मणी-	चतुर्मुखी	वै.मं. 6-36
		यालोकभर्त्री	वै.मं. 6-36
63.	गणेश्वरी-	त्रिनेत्रधारी	वै.मं. 6-36
		चिह्नं च रौद्रं	वै.मं. 6-36

64.	षण्मुखी-	ज्वाला माला	वै.मं. 6-36
		बालान् हरी	वै.मं. 6-37
65.	वैष्णवी-	युगे युगे संपरि	वै.मं. 6-37
		सर्वरमारक्षिणी	वै.मं. 6-37
66.	वाराही-	कल्पेषु कल्पेषु	वै.मं. 6-37
		अन्तेषु घोरेषु	वै.मं. 6-37
67.	द्राणी-	सा सर्व देवेषु	वै.मं. 6-37
		माला धरीया	वै.मं. 6-37
68.	काली-	चण्डीहरी भीषणी	वै.मं. 6-37
		मोही विमोही	वै.मं. 6-37
69.	पुष्परक्षक-	धातास्य विश्वं हि	वै.मं. 6-38
		फुल्लानीह योरक्षति	वै.मं. 6-38
70.	बलिरक्षक-	विश्वान्बलि रक्षित	वै.मं. 6-38
		सौर्यहित ईश	वै.मं. 6-38
71.	विष्वक्सेन-	आग्नेयो यस्मात्	वै.मं. 6-38
		प्रैषामधीशो	वै.मं. 6-39
72.	गरुड-	शतधारगुं हिरण्यय	वै.मं. 6-39
		कदापि सृजते	वै.मं. 6-39
73.	विघ्न-	धर्मौघमाता	वै.मं. 6-39
		योगन्धरंनु	वै.मं. 6-39
74.	अनन्त-	यमर्पयन्ति	वै.मं. 6-40
		शन्नो निधत्तां	वै.मं. 6-40
75.	सुदर्शन-	भूमाननोग्रे	वै.मं. 6-40
		वन्द्यो न एष	वै.मं. 6-40
76.	ध्वज-	आसाग्र अग्रे	वै.मं. 6-40
		ओजो बलाय	वै.मं. 6-41

77.	शङ्ख-	तन्मायशोग्रे	वै.मं. 6-41
		अस्मादुपास्यो	वै.मं. 6-41
78.	महाभूत-	भूतानामग्रण्य	वै.मं. 6-41
		भूतो भूतेषु	वै.मं. 6-41
79.	विष्णुभूत-	अक्षहन्तेनिहिता	वै.मं. 6-41
		ये भूताः प्रचरन्ति	वै.मं. 6-41

पारमात्मिकहोमः

पौण्डरीकाग्निकुण्डे प्रायश्चित्तहोमार्थं पञ्चोत्तरशतमन्त्रप्रयुक्त पारमात्मिक-मन्त्रैर्होमः विमानार्चनाकल्पे[1] ज्ञानकाण्डे[2] च प्रतिपाद्यते।

रत्नादिन्यासः

बिम्बप्रतिष्ठाकर्मणि होमकर्मसमनन्तरं गर्भालये अर्चापीठे रत्नादिन्यासः प्रस्तूयते। तथाहि -

गर्भालये अर्चापीठे पञ्चविंशति भागेषु अवटे गरुडमणिवैडूर्यादीनि अमृताश्मकादीनि गैरिकहरितालादीनि शाल्यादि धान्यानि च तत्तत्स्थानेषु संन्यस्य सुदृढम् अर्चापीठं कारयेदिति वैखानसग्रन्थेषु[3] निर्दिश्यते। अर्चापीठे न्यासनीयानां रत्नादीनां स्थानादयो यथा -

द्रव्य	स्थान	मन्त्र	आकर
ब्रह्ममणि	ब्रह्म-	ब्रह्मादेवानां	यजु 3-4-11
वज्रमणि	इन्द्र-	इन्द्रं प्रणवन्तं	वै.मं. 6-17
मौक्तिक	अग्नि-	अग्नावग्नि	यजु. 1-3-7
वैडूर्य	यम-	यमोदाधार	तै.आ. 6-5-2
शङ्खज	निर्ऋति-	वसवःप्रथमो	वै.मं. 6-19
स्फटिक	वरुण-	एते शतं	वै.मं. 6-19
पुष्यक	वायव्य-	मरुतःपरमात्मा	वै.मं. 6-20

1. पृ.233-4
2. पृ.114-5
3. वि.पृ.235, क्रि.8-अ, ज्ञा.पृ.118-9, स.34,6-36

द्रव्य	स्थान	मन्त्र	आकर
चन्द्रकान्त	उत्तर-	सोमगुं राजानं	यजु 1-7-10
नीलमणि	ईशान-	ईशान	वै.मं. 6-20
अमृताश्मक	इन्द्राग्न्योरन्तर-	शन्नोनिधत्तां	वै.मं. 8-108
लोहिताश्मक	यमाग्न्योरन्तर-	धाता धातृणां	यजु. 4-7-14
उत्पलमणि	यमनीलयोरन्तर-	विश्वेदेव	यजु 4-1-9
प्रवाल	नीलवरुणयोर्मध्य-	अधिब्रह्मयतता	वै.मं. 8-4
मनश्शिला	वरुणवायव्योरन्तर	इमं मूर्धन्या	वै.मं. 8-4
शुक्तिज	वायु सोमयोर्मध्य-	अप्सरस्सु	वै.मं. 8-3
विमलमणि	सोमेशानयोरन्तर-	यंकाद्रवेया	वै.मं. 8-5
कुर्विन्द	ईशानेन्द्रयोर्मध्य-	अर्यम्णःकुम्भी	वै.मं. 8-5

अभ्यन्तरे पदे ऐन्द्रादिदिक्षु गैरिक - हरिताल - मनश्शिला - अञ्जन-सीस-पारद - सौराष्ट्र - गोरोचनानि द्रव्याणि तद्दिगीशैः मन्त्रैः संन्यसेत्। अयमेव रत्नादिन्यासः [1]।

रत्नादिन्यासप्रकारः

पुष्यक	शुक्तिज	चन्द्रकान्त	विमलमणि	नीलमणि
मनश्शिला	पारद	सौराष्ट्र	गोरोचन	कुर्विन्द
स्फटिक	सीस	ब्रह्ममणि	गैरिक	वज्रमणि
प्रवाल	अञ्जन	मनश्शिला	हरिताल	अमृताश्मक
शङ्खज	उत्पलमणि	वैडूर्य	लोहिताश्मक	मौक्तिक

1. वि.पृ. 235-6

बिम्बसंस्थापनम् – आवाहनम्

रत्नादिन्याससमनन्तरम् अर्चपीठे ध्रुवबिम्बं संस्थाप्य कुम्भस्थजलेन ध्रुवबिम्बे विष्णुमावाहयेत्। ब्रह्मस्थाने कौतुकं दक्षिणे स्नपनं उत्तरे औत्सवं बलिं च अथवा दक्षिणे औत्सवम् उत्तरे स्नपनं वा संस्थाप्य ध्रुवबिम्बात् कौतुकादिषु विष्णुमावाहयेदिति कौतुकादीनां बिम्बानां संस्थापनप्रकारः कथ्यते[1]।

कुम्भनयनम्

आचार्यः रत्नादिन्याससमनन्तरं पूर्णाहुतिं कृत्वा नृत्तवाद्यादि समायुक्तं कुम्भं मूर्ध्नि संस्थाप्य प्रदक्षिणपूर्वकम् आलयं प्रविश्य ध्रुवबिम्बस्य दक्षिणे भागे तं संस्थापयेत्।

आवाहनम्

आचार्यः देवं ध्यायन् बिम्बस्य मूर्ध्न्यादि क्रमेण आवाहयेत्। मूर्ध्न्यादीनां च ध्यात्वा कुम्भस्थं जलं कूर्चेन गृहीत्वा मन्त्रपूर्वकेण ध्रुवबिम्बे पीठं च परितः पुरुषाद्यावरणत्रयदेवैस्साकं देवमावाहयेत्। ध्रुवकौतुकयोरन्तरे संबन्धकूर्चं प्रक्षिप्य दीपाद्दीपमिव कौतुक- स्नपन – उत्सव – बलिबेरेषु आवाहयेत् इति आवाहन प्रकारः विमानार्चनाकल्पे[2] स्पष्टं निर्दिश्यते।

प्रतिष्ठाफलम्

ध्रुवादिबिम्बानां प्रतिष्ठाकरणेन पापनाशनपूर्वकमोक्षप्राप्तिः स्यात्[3]।

परिवारप्रतिष्ठा

ध्रुवबिम्बप्रतिष्ठानन्तरं धात्रादि द्वारदेवानां ब्रह्मेशध्रुवमार्कण्डेयानां मणिकादिद्वारपालानां च परिवाराणां प्रतिष्ठा करणीया इति विमानार्चनाकल्पे[4] प्रतिपाद्यते।

श्रीभूदेव्योः पृथक्प्रतिष्ठा

ध्रुवे देवी युक्ते वियुक्ते वा कौतुकबिम्बस्य श्रीभूदेव्योः स्थापनं, कौतुके

---

1. वि.पृ.238
2. पृ. 239-40
3. वि.पृ. 241-2
4. पृ.242-3

देवीसमायुक्ते वियुक्ते वा उत्सवबिम्बस्य श्री भूदेव्योः स्थापनं कुर्यादिति स्नपन बलिबेरयोः देवीभ्यां सहितं रहितं वा प्रतिष्ठां कारयेदिति विमानार्चनाकल्पे[1] श्रीभूदेव्योः पृथक् प्रतिष्ठा प्रोच्यते।

कौतुकं बिम्बं यद्द्रव्येण कृतं तद्द्रव्येणैव श्रीभूदेव्यौ निर्मातव्यौ। कौतुकादि बिम्बानां देव्योः पृथक् स्थापनप्रकारे अङ्कुरार्पण - अधिवास -कुम्भपूजा शयनाधिवास - होमादयः ध्रुवबिम्बप्रतिष्ठोक्तवत्करणीयाः।

श्रीभूदेव्योरावाहनप्रकारः

देवी विरहिते ध्रुवबेरे अक्षरन्यासानन्तरं कौतुके अक्षरन्यासं विधाय ध्रुवबिम्बात् श्री भूदेव्योरावाहनं विधेयम्। ध्रुवे देवी युक्ते देवीबेरे अक्षरन्यासः ततः श्रीभूदेव्योः अक्षरन्यासपूर्वकमावाहनं विधीयते।

नवषट्पञ्चमूर्तिप्रतिष्ठा

आगमान्तरेष्वदृष्टविषया नवषट्पञ्चमूर्तिप्रतिष्ठा वैखानसागमे दृश्यते। नवषट्पञ्चमूर्तीनाम् आलयनिर्माणादिकं विलक्षणतया अस्मिन्नागमे प्रतिपाद्यते। नवानां मूर्तीनाम् आलयस्थानादिकं ग्रन्थान्तरापेक्षया विमानार्चनाकल्पे विस्पष्टम् उपपाद्यते। तत्र -

नवमूर्तयः

विष्णु - पुरुष - सत्य - अच्युत - अनिरुद्ध - अनन्तशयन - नरनारायण नृसिंह - वराह इति नव संख्याकाः मूर्तयः[2]। प्रकीर्णाधिकारे[3] अनन्तशयनः नैव निर्दिष्टः

---

1. वि.पृ.272

2. पृ.20-1

3. अत ऊर्ध्वं प्रवक्ष्यामि नवषट्पञ्चमूर्तिकम्।
विष्णुं च पुरुषसत्यमच्युतं चानिरुद्धकम्॥

नरनारायणाभ्यां तु वाराहन्नारसिंहकम्।
एवं तु नव मूर्तिस्तु स्थापायित्वा यथाविधि॥ 13,1-2

षण्मूर्तयः

विष्णु - पुरुष - सत्य - अच्युत - अनिरुद्ध अनन्तशयन इति षण्मूर्तयः। अनन्तशयनस्य स्थाने आदिमूर्तिः प्रकीर्णाधिकारे[1] निर्दिश्यते।

पञ्चमूर्तयः

विष्णु - परुष-सत्य - अच्युत - अनिरुद्धाः मूर्तयः पञ्चमूर्तयः[2]।

नवषट्पञ्चमूर्तीनामालयनिर्माणस्थानम्

नवषट्पञ्चमूर्तीनामालयः सहस्राधिकविप्रावासे ग्राममध्ये पश्चिमे वा स्यात्[3]।

नवषट्पञ्चमूर्तीनामालयनिर्माणविधौ ध्रुवबिम्बप्रतिष्ठोक्तवत् प्रथमतः तरुणालयं विनिर्माय तत्र आलयनिर्माणं यावत् बालबेराणि संपूज्य विष्ण्वादीनि बिम्बानि कल्पयित्वा ततः प्रतिष्ठा कार्या।

नवषट्पञ्चमूर्तीनां तरुणालयविधिः

नवषट्पञ्चमूर्तीनां तरुणालयस्य प्रदेशः ध्रुवबिम्बप्रतिष्ठा तरुणायल प्रदेशवत् भवति। नवहस्तायतनिर्मिते तरुणालये एकाशीतिविभागं च कृत्वा मध्ये नवभागः गर्भागारः, बहिः षोडशभागः अभ्यन्तरभित्तिः, तद्बहिः चतुर्विंशतिभागः अलिन्द्रः, तद्बहिः द्वात्रिंशद्भागः बहिर्भित्तिः भवेत्। तद्भित्तौ चतुर्द्वारयुतम् एकद्वारयुतं वा समं त्रिपादम् अर्धं वा मुखमण्डपं कल्पयेत्।

गर्भागारं सप्तसप्त विभागं कृत्वा ब्राह्मे पदे विष्णुमूर्तिः, पश्चिमे मानुषभागे तृतीयतले कौतुकमूर्तिः, द्वारदक्षिणे प्राङ्मुखः पुरषमूर्तिः, अलिन्द्रे दक्षिणाभिमुखः सत्यमूर्तिः , पश्चिमे पश्चिमाभिमुखः अच्युतमूर्तिः उत्तरे उत्तराभिमुखः अनिरुद्धमूर्तिः, द्वितीयतले उत्तराभिमुखः वराहमूर्तिः, अच्युतमूर्तेः उत्तरपार्श्वे पश्चिमाभिमुखः नृसिंहश्च कल्पनीयः। सत्यमूर्तेः पश्चिमे

---

1. विष्ण्वादिपञ्चमूर्तिस्तु आदिमूर्तिं तथा क्रमात्।
   स्थापयेत् तत्क्रमेणैव षण्मूर्तिकमिहोच्यते। 13,3
2. वि.पृ.21, ज्ञा.पृ.64, स.4,28, प्र.13,4
3. वि.पृ.244

दक्षिणाभिमुखौ नरनारायणौ भवेताम्। अयं च नवमूर्तीनां तरुणालयनिर्माण प्रकारः।

षण्मूर्तीनां तरुणालयप्रतिष्ठा चेत् विष्णु - पुरुष - सत्य - अच्युत - अनिरुद्ध - कौतुकाः प्रतिष्ठापनीयाः।

पञ्चमूर्तीनां तरुणालयप्रतिष्ठा चेत् विष्णु - पुरुष - सत्य - अच्युत - अनिरुद्धाः प्रतिष्ठापनीयाः।

नवषट्पञ्चमूर्तीनां तरुणालयविधिः इत्थं विमानार्चनाकल्पे प्रतिपाद्यते।

नवषट्पञ्चमूर्तीनां बालबिम्बप्रतिष्ठाप्रकारः

नवषट्पञ्चमूर्तीनां बालबेराणि कल्पयित्वा आचार्यः गर्भालयस्थानं पञ्चगव्येन परिशोध्य स्नपनपूर्वकं तानि शयनेषु शाययेत्। ततः रत्नन्यासपूर्वकं नवषट्पञ्चमूर्तीनां बिम्बानां स्थापनं च कुर्यात्[1]।

नवसंख्याकानां मूर्तीनां विमाने स्थानानि

विमाने स्थापनीयानां नवसंख्याकानां मूर्तीनामवस्थितिः विमानार्चनाकल्पे इत्थं निर्दिश्यते। यथा -

मध्यतले विष्णुमूर्तिः तस्य अलिन्द्रे दक्षिणे नरनारयणौ पश्चिमे नृसिंहमूर्तिः, उत्तरे वराहमूर्तिः अधस्स्थले प्राच्यां पुरूषमूर्तिः दक्षिणे सत्यमूर्तिः पश्चिमे अच्युतमूर्तिः, उत्तरे अनिरुद्धमूर्तिः, तृतीयतले योगशयन इति।

विष्ण्वादिबिम्बकल्पनम्

विष्ण्वादिनवमूर्तीनां ध्रुवबेरकल्पनं विमानार्चनाकल्पे[3] विशदं प्रोच्यते। विष्ण्वादीनां ध्रुवबेराणां साकं देव्यौ मुन्यादिपरिवाराः अपि निर्दिश्यन्ते। तत्र नवमूर्तीनां ध्रुवबेराणां गर्भगृह - द्वार - स्तम्भ - यजमानाङ्गुलमानेषु इष्टमानेन कारयेदिति देव्योः देवस्य बाहुकर्णसीममानेन कारयेदिति नवमूर्त्यादीनां मानं निर्दिश्यते।

1. वि.पृ.20-3
2. पृ.249-51
3. Ibid

तत्र विष्णुः सिंहासने समासीनः श्रीभूमिभ्यां भृगुपुण्याभ्यां ब्रह्मशङ्कराभ्यां च युक्तः स्यात्। उपरि भित्यूर्ध्वभागे दक्षिणवामयोः वन्दमानौ चामरधारिणौ किष्किन्धसुन्दरौ कामिनीव्याजिनीभ्यां युतौ भवेताम्। सूर्यचन्द्रौ तत्रैव कल्पनीयौ। प्रथमद्वारे दक्षिणे तुहिणः , वामे बलिन्दश्च कल्पनीयः। द्वितीय द्वारे तापससिद्धिदौ निर्मातव्यौ।

पुरुषमूर्तिः भोगासने आसीनः पूजकमुनिभ्यां ब्रह्मशङ्कराभ्यां च युक्तः स्यात्। अपर भित्यूर्ध्वभागे दक्षिणवामयोः चामरधारिण्यौ मायासंह्लादिन्यौ कल्पयेताम्। तत्रैव सनकसनत्कुमारौ चन्द्रसूर्यौ च भवेताम्। प्रथमद्वारे तुहिण बलिन्दौ, द्वितीयद्वारे शङ्खपद्मनिधी स्याताम्। द्वारसोपानस्थलभित्तौ वारणाभिषेकयुक्ता श्री च प्रकल्पनीया।

सत्यमूर्तिः दक्षिणाभिमुखः देवीभ्यां पूजकमुनिभ्यां ब्रह्मशङ्कराभ्यां च संयुक्तः भवेत्। अपरभित्यूर्ध्वभागे चामरधारिण्यौ जयाभद्रे सूर्यचन्द्रौ शुकबृहस्पती च निर्मातव्यौ। प्रथमद्वारे नासत्यदस्रौ, द्वितीयद्वारे चक्रचूलि शङ्खचूलिनौ, दक्षिणे सोपानस्थलभित्तौ दक्षिणाभिमुखी वाग्देवी च प्रकल्पनीया।

अच्युतमूर्तिः पश्चिमाभिमुखः देवीभ्यां पूजकमुनिभ्यां ब्रह्मशङ्कराभ्यां च समायुक्तो भवेत्। अपरभित्यूर्ध्वभागे चामरधारिणीभ्यां जयाभद्राभ्यां सूर्यचन्द्राभ्यां च संयुक्तः। प्रथमद्वारे गुहजाम्बवन्तौ, द्वितीयद्वारे शङ्खपद्मनिधी, सोपानस्थलभित्तौ पश्चिमाभिमुखः मन्मथश्च निर्मातव्यः।

अनिरुद्धमूर्तिः उत्तराभिमुखो भवेत्। देवीभ्यां सहितो वा रहितो वा कुर्यात्। पूजकमुनिभ्यां ब्रह्मशङ्कराभ्याम्, अपरभित्यूर्ध्वभागे चामरधारिणीभ्यां जयापुष्टिकाभ्यां सूर्यचन्द्राभ्यां च संयुक्तः भवेत्। प्रथमद्वारे विद्युदप्सरसौ, द्वितीयद्वारे चक्रचूलि शङ्खचूलिनौ सोपानस्थलभित्तौ मुद्गलं मुनिं च निर्मातव्यम्।

शयनमूर्तिः दक्षिणशीर्षः अनन्तस्य सप्तभिः पञ्चभिर्वा फणैः छन्नमौलिः द्विभुजश्च भवेत्। पूजकस्थाने महीमार्कण्डेयौ देवस्य दक्षिणहस्तः मार्कण्डेयस्य शिरसि युक्तो भवेत्। वामहस्तः समद्धृत कटको भवेत्। दक्षिणभागे प्रसारित दक्षिणपादः ईषत्कुञ्चितश्च स्यात्। नाभ्यम्बुज समासीनः ब्रह्मा, उद्देश्यकरतल प्रहारयुक्तः गरुडः, पादपार्श्वे मधुकैटभौ दक्षिणपार्श्वे सनकः वामे भारती

सनत्कुमारश्च ऊर्ध्वे दक्षिणोत्तरयोः वेदाः ब्रह्मशङ्करौ, प्रथमद्वारे गङ्गायमुने स्याताम् द्वितीयद्वारे सुरसुन्दरौ च कल्पनीयौ।

नरनारायणौ दक्षिणाभिमुखौ स्थितौ भवेताम्। प्रजापतिशङ्कराभ्यां अर्चकमुनिभ्याम् अर्कचन्द्राभ्यां च समायुक्तौ स्याताम्। द्वारस्य दक्षिणवामयोः चक्रचूलि शङ्खचूलिनौ च स्याताम्।

नृसिंहमूर्तिः योगासने समासीनः कक्ष्ययोराबद्धः ब्रह्मशङ्कराभ्यां अर्चकमुनिभ्याम् अर्कचन्द्राभ्यां च संयुक्तः भवति। द्वारस्य दक्षिणवामयोः चण्डप्रचण्डौ च कल्पनीयौ।

वराहमूर्तिः उत्तराभिमुखः। दक्षिणभागे चन्द्रः, वामे हलेशश्च स्यात् पूजकमुनी ब्रह्मशङ्करौ च निर्मातव्यौ। अपरभित्यूर्ध्वभागे सनकसनत्कुमा चन्द्रादित्यौ द्वारदक्षिणवामयोः दुर्गा विघ्नेशश्च भवेयुः।

नवषट्पञ्चमूर्तीनां प्रतिष्ठा

नवादिमूर्तिनां प्रतिष्ठा ध्रुवबिम्बप्रतिष्ठोक्तवत् अङ्कुरार्पण - नेत्रोन्मील कुम्भपूजा - अधिवास-होम - रत्नन्यास - बिम्बस्थापन कर्मभिः निष्पद्यते विमानार्चनाकल्पे[1] प्रतिपाद्यते। एवमेव षण्मूर्तिप्रतिष्ठा पञ्चमूर्तिप्रतिष्ठा च पञ्चमूर्तीनां प्रतिष्ठा मात्रं ज्ञानकाण्डे[2] समूर्तार्चनाधिकरणे[3] च निर्दिश्यते।

मत्स्यादीनां प्रतिष्ठा

मत्स्य - कूर्म - वराह- नृसिंह - वामन-त्रिविक्रम - परशुराम - राम बलराम- कृष्ण - कल्कि संज्ञकानां मूर्तीनां कल्पनापूर्वकप्रतिष्ठाप्रक वैखानसागमग्रन्थेषु प्रतिपाद्यते। एषां प्रतिष्ठा ग्रामे - नगरे - पत्तने - खर्वटे नदीतीरे - पर्वते - वने - सेनामुखे - कुटिके - अब्धितीरे वा करणीया कुम्भाकार-त्रिकूट - हस्तिपृष्ठ - नन्द्यावर्तविमानेषु अन्यतमे विमाने मत्स्या मूर्तयः स्थापनीयाः[4]। तत्र

1. पृ.252-58
2. पृ.64
3. 4,28
4. स,58,10-3

मत्स्यमूर्तिः

मत्स्यमूर्तेः कल्पनं यथाशिल्पशास्त्रं कर्तव्यमिति विमानार्चनाकल्पे निर्दिश्यते चेत् खिलाधिकारे[1] पद्मासनस्थः रक्तवर्णः भिन्नाञ्जनचयः सुवर्णपार्श्वः मत्स्यरूपः इति वर्ण्यते ।

कूर्ममूर्तिः

कूर्ममूर्तेः स्वरूपं विमानार्चनाकल्पे न दृश्यते। मत्स्यमूर्तिवत् कूर्ममूर्ति स्वरूपमपि खिलाधिकारे[2] प्रोच्यते।

वराहमूर्तेः त्रैविध्यम्

वराहमूर्तिः आदिवराह - प्रलयवराह- यज्ञवराह भेदेन त्रिधा भवति[3]।

आदिवराहः

आदिवराहः चतुर्भुजः शङ्खचक्रधरः स्यात्। नागेन्द्रफणामणिस्थापित दक्षिणपादः कुञ्चितवामपादः भवेत्। महीदेवीस्थितवामोरुः देवीपादस्पर्शक दक्षिणहस्तः देव्यालिङ्गकवामहस्तः आदिवराहः।

प्रलयवराहः

प्रलयवराहस्तु वामपादमाकुञ्च्य दक्षिणं प्रसार्य सिंहासने समासीनः चतुर्भुजः शङ्खचक्रधरः अभयदक्षिणहस्तः ऊरुप्रतिष्ठितवामहस्तः पीताम्बरधरः सर्वाभरण भूषितः। दक्षिणे वामपादमाकुञ्च्य दक्षिणं पादं प्रसार्य आसीना श्यामाभा सर्वाभरणभूषिता उत्पलधरवामकरा पीठेन्यस्तदक्षिणकरा विस्मयोत्फुल्ललोचना देवी मही भवेत्।

यज्ञवराहः

यज्ञवराहस्तु चतुर्भुजः शङ्खचक्रधरः भवति। वामपादमाकुञ्च्य दक्षिणं प्रसार्य सिंहासने समासीनः पीताम्बरधरः सर्वाभरणभूषितश्च स्यात्। दक्षिणे देवी

1. 19,7-8
2. *Ibid*
3. वि.पृ.366-8

श्री आकुंचितवामपादा प्रसारितदक्षिणपादा आसीना पद्मधरवामहस्ता पीठेन्यस्तदक्षिणहस्ता भवेत्। वामे महीदेवी सस्यश्यामनिभा आकुंचितदक्षिणपादा प्रसारितवामपादा आसीना उत्पलधरदक्षिणहस्ता आसने न्यस्तवामहस्ता विस्मयलोचना च भवेत्।

इत्थं त्रिविधानां वराहमूर्तिभेदानां लक्षणानि विमानार्चनाकल्पातिरिक्त ग्रन्थेषु सुस्पष्टतया नैव उपलभ्यन्ते।

नृसिंहमूर्तिभेदाः

नृसिंहमूर्तिभेदकथनावसरे वैखानसागमग्रन्थाः ऐकमत्यं न वहन्ति। यथा - नृसिंहमूर्तिः गिरिजनृसिंहः - स्थूणजनृसिंहः - सुदर्शननृसिंहः लक्ष्मीनृसिंहः पातालनृसिंहः पुच्छनृसिंहः इति षड्विधो भवतीति प्रकीर्णाधिकारे[1] उपवर्ण्यते

क्रियाधिकारे[2] तु पुच्छनृसिंहं विना पञ्चैव नृसिंहमूर्तयः निर्दिश्यन्ते विमानार्चनाकल्प[3] समूर्तार्चनाधिकारण[4] - ज्ञानकाण्डेषु[5] नृसिंहमूर्तिः गिरिज-स्थूणजभेदेन द्विधैव प्रतिपाद्यते।

गिरिजस्थूणजनृसिंहमूर्त्योः कल्पनप्रकारः ग्रन्थान्तरापेक्षया विमानार्चनाकल्पे सुस्पष्टं निरूप्यते यथा -

गिरिजनृसिंहः

गिरिजनृसिंहः सिंहासने समासीनो भवेत्। प्रसारितदक्षिणपादः आकुंचित वामपादः चतुर्भुजः शङ्खचक्रधरः सर्वाभरणभूषितः अभयदक्षिणहस्तः वरदहस्तं वा कट्यवलम्बित वामहस्तः कल्पनीयः। दक्षिणे आसीना श्रीदेवी आकुञ्चितवामपादा प्रसारितदक्षिणपादा पद्मधरवामहस्ता पीठे न्यस्तदक्षिणहस्ता कल्पनीया। तथैव वामपार्श्वे आसीना महीदेवी आकुञ्चितदक्षिणपादा प्रसारितवामपादा उत्पलधर दक्षिणहस्ता पीठे न्यस्तवामहस्ता कल्पनीया।

---

1. 13,51-2
2. 11,27-8
3. पृ.369-71
4. 59,1-34
5. पृ.154-5

स्थूणजनृसिंहः

स्थूणजनृसिंहः सिंहासने समासीनः स्यात्। आकुञ्चित वामपादः प्रसारित दक्षिणपादः चतुर्भुजः शङ्खचक्रधरः अभयदक्षिणहस्तः ऊरुप्रसारित वामहस्तः तीक्ष्णदंष्ट्रेक्षणः भयानकः सर्वाभरणभूषितः निर्मातव्यः। दक्षिणे वामे च भागे श्री महीदेव्यौ स्याताम्। पुरतः प्रह्लादः दक्षिणे नारदः भित्तिपार्श्वे इन्द्रादि लोकपालाः कल्पनीयाः।

सुदर्शन नृसिंह -लक्ष्मीनृसिंह- पातालनृसिंहाख्यानां नृसिंहमूर्तिभेदानां कल्पनप्रकारः प्रकीर्णाधिकार-क्रियाधिकारयोर्विना अन्येषु वैखानसग्रन्थेषु नैव दृश्यते। यथा[1] -

सुदर्शननृसिंहः

सुदर्शन नृसिंहः चतुर्बाहुः चक्रमध्ये समासीनः अभयप्रदः चक्रायुधः उग्ररूपश्च भवेत्।

लक्ष्मीनृसिंहः

लक्ष्मीनृसिंहः श्रिया सहितः शङ्खचक्रधरः भवति। अयम् आकुंचितवामपादः प्रसारितदक्षिणपादः लक्ष्मीस्थितवामोरुः लक्ष्म्यालिङ्गक-वामहस्तः अभयदक्षिणहस्तः भवेत्।

पातालनृसिंहः

पातालनृसिंहः आसीनो भवेत्। पञ्चफणैस्सहितछत्रमौलिः दक्षिणवरदहस्तः वामकटिहस्तश्च स्यात्।

पुच्छनृसिंहस्य कल्पनप्रकारः प्रकीर्णाधिकारे[2] एव दृश्यते। तद्यथा -

पुच्छनृसिंहः

अभयदक्षिणहस्तः ऊरुप्रतिष्ठितवामहस्तः आकुंचितदक्षिणपादः सर्वाभरणभूषितः पुच्छसंयुक्तः इति पुच्छनृसिंहस्य कल्पनप्रकारः विव्रियते।

---

1. प्र.13,62-8, क्रि.11,29-56
2. 13,69

वामनमूर्तेर्भेदः

वामनमूर्तिः रूपभेदेन त्रिविक्रमश्च स्यात्। तत्र वामनमूर्तेः कल्पनप्रकारः यथा -

वामनमूर्तिः

वामनमूर्तिः द्विभुजः छत्रदण्डधरः कौपीनवासः शिखापुस्त मेखलोपवीत कृष्णाजिनसंयुक्तः पवित्रपाणिः बालरूपः ब्रह्मवर्चस्वी भवति[1]

त्रिविक्रमः

भूलोकाक्रमणार्थं जानुपर्यन्तं उद्धृत ऊर्ध्ववामपादः अन्तरिक्ष लोकाक्रमणार्थम् उधृतवामपादः नाभिमात्रः स्वर्गलोकाक्रमणार्थम् उधृ ऊर्ध्ववामपादः ललाटमात्रः त्रिविक्रमः कल्पनीयः[2]। तत्रापित्रिविक्रमः अष्टबाहु चतुर्बाहुर्वा स्यात्[3]।

अष्टभुजत्रिविक्रमः

त्रिविक्रमे अष्टभुजे सति दक्षिणहस्तैः चक्र- शर - गदा - खड्ग वामहस्तैः शङ्ख - शार्ङ्ग - हल-मुसलाः भवेयुः।

चतुर्भुजत्रिविक्रमः

चतुर्भुजत्रिविक्रमे सति दक्षिणेन चक्रधरं वामेन शङ्ख अभयदक्षिणहस्तः प्रसारित वामहस्तः स्थितदक्षिणं पादं उधृतं च वामपा श्यामाभं भवेदिति।

परशुरामः

परशुरामः द्विभुजः स्थितश्च स्यात्। श्वेतवस्त्रधरः दक्षिणहस्तपरशुध उद्देश्यवामकरः जटामकुटधरः सोपवीतः सर्वाभरणभूषितः कल्पनीयः इ विमानार्चनाकल्पे[4] ज्ञानकाण्डे[5] च विव्रियते। क्रियाधिकारे[6] तु नीलाम्बरध परशुरामः स्थितो वा आसीनो वा निर्मातव्यः तथैव समूर्तार्चनाधिकरणेऽपि[7]।

---

1. वि.पृ.372
2. वि.पृ.374-5
3. वि.पृ.374
4. पृ.375-6
5. पृ.159
6. 11,82-3
7. 60,5-7

राघवरामः

अथ राघवरामस्य कल्पनाप्रकारः निर्दिश्यते। राघवरामः द्विभुजः त्रिभङ्गनतस्थितः शरधरदक्षिणहस्तः चापधरवामहस्तः किरीटाद्याभारणान्वितः[1] इति।

राघवरामः अभङ्गसमभङ्गअतिभङ्गभेदेन त्रिधा भवतीति विमानार्चनाकल्पे[2] निर्दिश्यते।

राघवरामस्य प्रकल्पनेन साकं सीतादीनां निर्माणप्रकारः अपि वैखानसग्रन्थेषु दृश्यते यथा-

सीता

राघवरामस्य दक्षिणे सर्वाभरणभूषिता पद्मधरवामहस्ता प्रसारित दक्षिणहस्ता विस्मयलोचना च सीता कल्पनीया[3]।

लक्ष्मणः

राघवरामस्य वामभागे लक्ष्मणः युवराजभूषणान्वितः द्विभुजः शरचापधरः श्यामाम्बरधारी समभङ्गान्वितश्च स्यात्[4]।

हनुमान्

हनुमान् द्विभुजः दक्षिणहस्तेन पिहितास्यः वामहस्तेन स्पृष्टवस्त्राञ्चलः ऊर्ध्वाननः कल्पनीयः। प्राञ्जलीकृत द्विपाणिर्वा कल्पनीय इति हनुमतः निर्माणप्रकारः निर्दिश्यते[5]।

बलरामः

बलरामं दक्षिणेन हस्तेन मुसलधरं वामहस्तेन हलधरं रक्तवस्त्रधरं द्विभुजं त्रिनतस्थितं कल्पनीयमिति विमानार्चनाकल्पे[6] उच्यते चेत् समूर्तार्चनाधिकरणे[7] ज्ञानकाण्डे[8] च बलरामः सायुधो वा निरायुधो वा वर्ण्यते। तस्य दक्षिणे रेवती निर्मातव्या।

---

1. वि.पृ.376, स.60,16-8, ज्ञा.पृ.159, क्रि.11,82-9
2. वि.पृ.376
3. वि.पृ.377, स.60,19-20, क्रि.11,90
4. वि.पृ.378
5. *Ibid*, ज्ञा.पृ.160., क्रि.11,92-3
6. पृ.380
7. 60,49-54
8. पृ.160-1

रेवती

रेवती पद्मकिञ्जल्कवर्णा पुष्पाम्बरधरा पद्मधरदक्षिणहस्ता प्रसारित वामहस्ता आसीना इति वर्ण्यते[1]।

श्रीकृष्णस्य रूपभेदाः

श्रीकृष्णः बृन्दावनकृष्णः नवनीतनटः कालीयमर्दनः सन्तानकृष्णः जगन्मोहनविग्रहः वेणुनादनटः लीलामानुषविग्रहः राजगोपालः ज्ञानगोपालः गोपालः गोवर्धनधरः पार्थसारथिः बालगोपालः वटपत्रशायी सर्वमोहनः इत्यादि अनेके रूपभेदाः वर्तन्ते इति प्रकीर्णाधिकारे[2] उच्यन्ते।

विमानार्चनाकल्पे तु नवनीतनटः कालीयनटः वेणुनादनटः पार्थसारथिः इत्येते चत्वारः भेदाः एव वर्ण्यते।

बृन्दावनकृष्णः

शङ्खचक्रगदाम्बुजसहितः नानारत्नसमायुक्तकौस्तुभोद्भासितवक्षाः तारहारावलीरम्यः गरुडोपरि संस्थितः देवीभ्यां सहितः बृन्दावनकृष्णः इति अस्य कल्पनप्रकारः प्रतिपाद्यते[3]।

कालीयमर्दनः

कालीयसर्पफणोपरिसंस्थितः धृतनवनीत दक्षिणकरः धृत अहिपुच्छवामकरः कालीयमर्दनः[4]। तस्य पार्श्वे सर्वाभरणभूषिताः कृताञ्जलिपुटाः नागपत्न्यः भवेयुरिति खिलाधिकारे[5] वर्ण्यते।

नवनीतनटः

मुखचन्द्रविराजितः रक्तपाणिद्वयाञ्चितः समाकुञ्चितवामपादः उत्तानदक्षिणपादः अभयदक्षिणहस्तः नवनीतयुतवामहस्तः सर्वाभरणभूषितः स्थितः अम्बरहीनः अम्बरसहितो वा स्यादिति विमानार्चनाकल्पादि वैखानसग्रन्थेषु[6] एकरूपतया कीर्त्यते।

---

1. वि.पृ.380, स.60-55,6क्रि.11,104-5
2. 16,40-82
3. प्र.16,40-1
4. वि.पृ.381, प्र. 16,42-5, ज्ञा.पृ. 161
5. 19,192
6. वि.पृ.381, ज्ञा.पृ.161, स.60,74-6, प्र.16,46-7, खि.19,190-3

सन्तानकृष्णः

सन्तानकृष्णःचतुर्भुजः भवेत्। ऊर्ध्वपाणिद्वये धृतशङ्खचक्रः अन्याभ्यां कराभ्यां वेणुं वादयन् सर्वालङ्कारसंयुक्तः गरुडोपरिसंस्थितः देवीभ्यां सहितः मुनिभिः परिवेष्ठितः सन्तानकृष्णः कल्पनीयः[1]।

जगन्मोहनः

जगन्मोहनः सर्वालङ्कारसंयुक्तः युवतीवेषलावण्यः अधरन्यस्तवेणुः ऊर्ध्वकराभ्यां धृताक्षमाला अधःकरद्वयाभ्यां धृतवेणुः वामपार्श्वस्थ श्रिया सहितः मुनिगणैः देवताबृन्दैश्च उपासितः जगन्मोहनः निर्मातव्यः[2]।

वेणुनादनटः

गोभिः गोपिकाजनैश्च परिवृतः उधृतदक्षिणपादः सुस्थितवामपादः (व्यत्यस्य वामदक्षिणौ) चतुर्भुजः ऊर्ध्वकरयोः धृतशङ्खचक्रः अधः करयोः धृतवेणुकः इति वेणुनादनटः कल्पनीयः[3]।

लीलामानुषविग्रहः

सर्वाभरणसंयुक्तः रक्ताम्बरधरः कमलेक्षणः रुक्मिणी सत्यभामाभ्यां सहितः देवकीवासुदेवयोश्च सहितः निर्मातव्यः। तस्य च वामे यशोदानन्दौ प्रद्युम्नसम्बदामसुमनसाः अन्याः गोपिकाश्च निर्मातव्याः इति लीलामानुष विग्रहस्य कल्पन प्रकारः[4]।

राजगोपालः

अयं राजाभरणैर्युक्तः रुक्मिण्या सहितः भवेत्। यष्टिसहितदक्षिणपाणिः राजदण्डस्योपरि स्थापितवामपाणिः भवेत्[5]।

ज्ञानगोपालः

पीताम्बरधरः ज्ञानमुद्रालसत्करः अन्येन करेण धृतवेणुः सुखासीनः शुचिस्मितः मुनिभिः उपास्यमानः देवीभ्यां सहितः ज्ञानगोपालः भवेत्[6]।

---

1. प्र.16,48-50
2. प्र. 16,51-7
3. प्र. 16,57-60
4. प्र.16,61-9
5. प्र.16,70-1
6. प्र.16,72-3

गोपालविग्रहः

गोपालविग्रहः अष्टबाहुः स्यात्। तेष्वष्टसु बाहुषु इक्षु - चाप - अङ्कुश-वेणु-शङ्ख - अरि - सुम - सायकाः भवेयुः। रमया सहितः सर्वाभरणसंयुक्तः गोपालविग्रहः कल्पनीयः[1]।

गोवर्धनधरः

कटिन्यस्त दक्षिणकरः धृतपर्वतवामहस्तः अन्याभ्यां कराभ्यां धृतशङ्खचक्रः इति गोवर्धनधारी वर्ण्यते[2]।

पार्थसारथिः

पाशधरदक्षिणहस्तः शङ्खधरवामहस्तः रथिकश्च श्रीकृष्णः। रथस्थे पार्थे न्यस्तदृष्टिकः पार्थसारथिः कल्पनीयः[3]।

बालगोपालः

समाकुचितवामपादः प्रसारितदक्षिणपादः भूम्यां स्थापितवामकरः नवनीतधृतदक्षिणकरः बालगोपालः भवेत्[4]।

वटपत्रशायी

बालरूपः वटपत्रे शयानः असिताननः दक्षिणहस्ते धृतदक्षिणोरुः प्रसारितवामपादः चुम्बितदक्षिणपादाङ्गुष्ठः वटपत्रशायी निर्मातव्यः[5]।

सर्वमोहनः

अयम् अष्टबाहुः भवेत्। तेषु षट्सु करेषु शङ्ख -चक्र-गदा-पद्म-पाश-अङ्कुशाः भवेयुः। अवशिष्टाभ्यां द्वाभ्यां कराभ्यां धृतवेणुः शोभितः सर्वमोहनः निर्मातव्यः[6]।

हेमाभा प्रसारितदक्षिणहस्ता रुक्मिणी कृष्णस्य दक्षिणे, उत्पलधर दक्षिणहस्ता प्रसारितवामहस्ता सर्वाभरणसंयुक्ता सत्यभामा च कृष्णस्य वामभागे कल्पनीया। श्रीकृष्णस्य वामे गरुडः अपि निर्मातव्यः[7]।

---

1. प्र.16,74-5
2. प्र.16,76-8
3. प्र.16,79-82, स.60,77-9
4. प्र.16,83-5
5. प्र. 16,86-9
6. प्र.16,90-2
7. वि.पृ.381

कल्की

कल्की अश्वमुखः उग्ररूपः चतुर्भुजः स्यात्। चतुर्षु भुजेषु शङ्ख-चक्र-खड्ग-खेटकाः भवेयुः इति कल्किनः स्वरूपं वैखानसागमे[1] उच्यते।

इत्थं भगवतः मत्स्यादि कल्क्यन्तानां दशावताराणां निर्माणप्रकारः वैखानसागमे उपपाद्यते। मत्स्यादीनाम् अतिरिक्ततया आदिमूर्ति - अनन्तशयन मानुषवासुदेव - दैविकवासुदेवानां कल्पनप्रकारः अपि वैखानसागमे प्रतिपाद्यते यथा -

आदिमूर्तिः

पञ्चभिः सप्तभिर्वा फणैः सहितस्य अनन्तस्य उत्सङ्गे समासीनः आदिमूर्तिः चतुर्बाहुः भवेत्। प्रसारितदक्षिणपादः आकुञ्चितवामपादः देहे (अनन्तस्य) न्यस्त दक्षिणहस्तः जानूर्ध्वे प्रसारितवामहस्तः अन्याभ्यां कराभ्यां धृतशङ्खचक्रः सर्वाभरणभूषितः आदिमूर्तिः भवति। तस्य दक्षिणवामयोः भृगुमार्कण्डेय ब्रह्मशङ्कराः निर्मातव्याः[2]।

अनन्तशयनः

अनन्तशयनस्योपरि शयानः प्रबुद्धश्च अनन्तशयनः भवेत्[3]।

मानुषवासुदेवः

द्विभुजः शङ्खचक्रधरः दक्षिणे रुक्मिण्या सहितः मानुषवासुदेवः। तस्य दक्षिणे धृतहलः बलभद्रः, तस्य दक्षिणे छुरिका असिधरदक्षिणहस्तः कट्यवलम्बितवामहस्तः प्रद्यम्नः, तस्य दक्षिणे चतुर्बाहुः ब्रह्मा, देवस्य वामे द्विभुजः खड्गखेटकधरः अनिरुद्धः, तस्य वामे साम्बः दनरूपदक्षिणहस्तः दण्डधरवामहस्तश्च संयुक्तः भवेत्। तस्य वामे गरुडस्तु स्थापनीयः[4]।

दैविकवासुदेवः

सिंहासने समासीनः चतुर्बाहुः शङ्खचक्रधरः श्रीभूमिभ्यां सहितः

1. वि.पृ.382, प्र.16,102-5
2. वि.पृ.383, स.62,3-6
3. वि.पृ.384
4. ज्ञा.पृ.163, खि.19,203-12 ,वि.पृ.384, स.61,2-10

दैविकवासुदेवः स्यात्। बलभद्रादयः मानुषवासुदेवकल्पनप्रकारवत् निर्मातव्याः। तत्रापि बलभद्रस्य दक्षिणे रेवती, प्रद्युम्नस्य दक्षिणे रोहिणी, अनिरुद्धस्य दक्षिणे उषा साम्बस्य इन्दुकरी इत्येताः निर्मातव्याः[1]।

लक्ष्मीकल्पः

योगलक्ष्मी - श्रीवत्सलक्ष्मी- भोगलक्ष्मी - वीरलक्ष्मी - गोदालक्ष्मी - द्वारलक्ष्मी - विजयलक्ष्मी इति अष्टविधाः लक्ष्म्याः कल्पनं सविशेषं ग्रन्थान्तरापेक्षया प्रकीर्णाधिकारे[2] उच्यते। एतासां स्वरूपाणि अस्पष्टानि भवन्ति। विमानार्चनाकल्पे तु लक्ष्मीकल्पः असौ न दृश्यते।

अथ गजेन्द्रमोक्षणः सूर्यमण्डलान्तस्थमूर्तिः क्षीरार्णवस्थ मूर्तिः श्रीधरः विश्वरूपधरः हरिशङ्करः इत्येतेषां कल्पनं खिलाधिकारे[3] एव विशेषतया विव्रियते। यथा -

गजेन्द्रमोक्षणः

गरुडस्कन्धे समासीनः चतुर्भुजः विष्णुः गजेन्द्रमोक्षणो भवेत्। चतुर्षु भुजेषु ऊर्ध्वयोः द्वयोः शङ्खचक्रौ अन्ययोः वामे शार्ङ्गः उधृतदक्षिणपाणिः स्यात् इति गजेन्द्रमोक्षणकल्पनप्रकारः विव्रियते। तत्र गजेन्द्रस्तु ऊर्ध्वाननः धृतपङ्कजः ध्यानयुक्तः स्यात्।

सूर्यमण्डलान्तस्थमूर्तिः

कमलासने समासीनः सूर्यमण्डलान्तस्थः हिरण्यवर्णः चतुर्भुजः सूर्यमण्डलान्तस्थ मूर्तिः भवेत्। अयं योगासने स्थितः शङ्खचक्रगदाधरः दिव्याभरणैर्युतः भवेत्।

क्षीरार्णवस्थमूर्तिः

क्षीरार्णवे शेषपर्यङ्के योगनिद्रावशंगतः देवीभ्यां सहितः पञ्चायुधैः परिवृतः

---

1. वि.पृ.385, ज्ञा.पृ.163, खि.19,214-20, स.61,12-5
2. 17,56-77
3. 19,244-73

मधुकैटभाभ्यां सेवितः द्विभुजः चतुर्भुजो वा चतुराननसंयुक्तः क्षीरार्णवस्थमूर्तिः स्यात्।

श्रीधरः

सुखासीनः शङ्खचक्रधरः भूषणैस्सहितः श्रीधरः भवेत्।

विश्वरूपधरः

अनेकभुजसंयुक्तः अनेकायुधधारी अनेकाभरणसंयुक्तः सुरादिभिः सेव्यमानः अन्तर्लीनजगत् विश्वरूपः निर्मातव्यः।

विमानार्चनाकल्पे
मत्स्याद्यवताराणां स्थापनविधौ प्रयुक्ताः मूर्तिमन्त्राः वैदिकमन्त्राः आकरसहिताश्च

क्र.सं.	देवता	चतुर्मूर्तिमन्त्राः	वैदिकमन्त्रः	आकरः
1.	मत्स्य	मत्स्य विष्णु भद्र क्रीडात्मक	यत्स्वयंसृष्ट	पा.उ.6,2
2.	कूर्मः	अकूपार कूर्मरूप विष्णु वसुधाधार	रायामीश	पा.उ.1,5
3.	आदिवराह	वराह वरद महीधर वज्रदंष्ट्रिण	क्ष्मामेका	पा.उ.6,4
4.	मही	गा रहस्यगा पृथुला उर्वी	---	---
5.	प्रलयवराहं	प्रलयवराह प्रलयहर भूरिशब्द जगन्नायक	स्वयमादि	पा.उ.6,1
6.	यज्ञवराह	यज्ञवराह वेदमय यज्ञेश यज्ञवर्धन	यंयज्ञै	पा.उ.1,10

7.	गिरिजनारसिंह	नारसिंह तपोनाथ महाविष्णु महाबल	योवानृसिंह	पा.उ. 7,2
8.	स्थूणजनारसिंह	नारसिंह तपोनाथ भक्तवत्सल अनन्त	योवानृसिंह	पा.उ.7,2
9.	प्रह्लाद	प्रह्लाद दैत्यपति विष्णुभक्त महाबल	---	---
10.	वामन	वामन वरद विष्णु काश्यप अदितिप्रिय	योवात्रिमूर्ति	पा.उ. 1,7
11.	त्रिविक्रम	त्रिविक्रम त्रिलोकेश विष्णु सर्वाधार	योवात्रिमूर्ति	पा.उ. 1,7
12.	परशुराम	राम ऋषिसुत विष्णु परशुपाणि	विष्णुर्वरिष्ठ	पा.उ. 9,4

13.	राम	राम दाशरथि वीर काकुत्स्थ	रायामीश	पा.उ.1,5
14.	सीता	सीता अयोनिजा लक्ष्मी वैदेही	---	---
15.	लक्ष्मण	रामानुज सौमित्रि लक्ष्मण लक्ष्मीवर्धन	---	---
16.	हनुमान्	कपिराज हनुमान् शब्दराशि महामति	---	---
17.	बलराम	राम यदुवर विष्णु हलायुध	क्ष्मामेका	पा.उ. 6,4
18.	रेवती	रेवती इन्दिरा लक्ष्मी रामप्रिया	---	---

19.	कृष्ण	कृष्ण पुण्य नारायण त्रिदशाधिप	सत्यस्सत्यस्थ	पा.उ.11,2
20.	रूक्मिणी	रुक्मिणी सुन्दरी देवी रमा	---	[illegible]
21.	सत्यभामा	सत्यभामा सती सन्नती क्षमा	[illegible]	[illegible]
22.	नवनीतनट	नवनीतनट कृष्ण देवकीसूनु बालरूप	[illegible]	[illegible]
23.	कालीयमर्दन	कालीयमर्दन कृष्ण गोपाल वटपत्रशायी	---	---
24.	गोपाल	गोपीजनवल्लभ सुन्दर कृष्ण गायक	---	---

25.	पार्थसारथि	पार्थसारथि अर्जुनसख कृष्ण यदुवर	-	-
26.	अर्जुन	अर्जुन पार्थ धनञ्जय विजय	-	-
27.	कल्किन्	कल्किन् विष्णु कामरूप संहरात्मक	धूर्नोवहन्ता	पा.उ.8,3
28.	आदिमूर्ति	अमित महिमान अत्यन्ताद्भुत सर्वाधार		
29.	अनन्तशयन	अनन्त नागराज सहस्रशीर्ष शेष विष्णुसख		
30.	दैविक मानुष वासुदेव	भद्रेश वासुदेव पुण्यमूर्ति पुण्यात्मक		

31.	बलभद्र	बलिन हलधर नागराज सङ्कर्षण	-	-
32.	प्रद्युम्न	प्रद्युम्न रोहिणीपति वीर बलशाली		
33.	अनिरुद्ध	पुरुष सत्य अच्युत अनिरुद्ध		
34.	साम्ब	साम्ब जाम्बवतीसुत भद्र सुन्दर		

अर्चनाविधिः

नित्यार्चना

समूर्तामूर्तभेदेन द्विविधे अर्चनाविधाने समूर्तार्चनं श्रैष्ठ्यमिति आलयार्च गृहार्चा इति द्विविधे समूर्तार्चने आलयार्चा ज्यायसी इति वैखानसागमे[1] निर्दिश्यते

आलयार्चायां भगवान् मन्त्र-स्नान- अलङ्कार - भोज्य - यात्रासने पञ्चसु द्वात्रिंशदुपचारैः पूज्यते[2]।

ध्रुवबेरात् भगवान् ब्रह्मभागे स्थापिते कौतुकबिम्बे आवाह्य विविधोपचा अर्च्यते। पूजान्ते कौतुकात् ध्रुवबेरे प्रतिनिवर्त्यते च[3] । तत्र

मन्त्रासनम्

नित्यानुष्ठानपरः अर्चकः आलयं प्रविश्य भगवन्तं संप्रार्थ्य न्यासविधि च कृत्वा पूर्वदिने समर्पितानि पुष्पाणि विष्वक्सेनाय समर्प्य भगवन्तं ध्रुवबेरा कौतुकबिम्बे आवाह्य आसन - पाद्य - अर्घ्य - आचमन-मुखवासरूपैः पञ्चभि उपचारैः अर्चयेत्। इदमेव मन्त्रासनं[4] भवति।

स्नानासनम्

भगवन्तं स्नानपीठे संस्थाप्य उपचारैः यदर्च्यते तत्स्नानासनं भवति। स्नानासनेऽस्मिन् पादुका स्थापन - दन्तधावन - तैलपिष्ट - केशवेष्टन - आमलक आम्ललेपन - स्नान - कंकत - प्लोताख्याः अष्टौ उपचाराः वर्तन्ते[5]।

अलङ्कारासनम्

भगवन्तं वस्त्राभरणोपवीताद्यैः पुष्पन्यासैश्च भूषणम् अलङ्कारासनं भवति।

---

1. स.1,35-7
2. वा.4.अ
3. आगमीय बेरविवेकः - उण्डेमने शङ्करभट्टः *Journal of the Ganganath Jha, Kendriya Sanskrit Vidyapeetha, Allahabad - 1973 P.56*
4. आसनं पाद्यमर्घ्यं च आचामो मुखवासकम्।
पञ्चोपचारं देवस्य मन्त्रासनपरिग्रहः ॥ वा. 25अ
5. वा.25.अ.

अस्मिन् वस्त्र - यज्ञोपवीत - आभरण - पुष्प - धाम - अञ्जन - आदर्श - धूप- दीप - अस्त्रसंज्ञकाः दशोपचाराः वर्तन्ते[1]।

पुष्पविधिः

अत्र भगवतः समाराधने पुष्पभेदाः ग्राह्याग्राह्यपुष्पाणि च वैखानसागमे परिगण्यन्ते। तद्यथा -

पुष्पभेदाः

दैविक - पैतृक - मानुष - भौतिक -यक्ष - गन्धर्व - असुर - राक्षस पैशाच[2] - ब्राह्म-मिश्रकाणीति[3] पुष्पभेदाः वैखानसग्रन्थेषु दृश्यन्ते।

ग्राह्यपुष्पाणि

जाती - चम्पक - मल्लिका - तुलसी - मालती - बकपुष्प - द्विवल्ली - पद्म - रक्तोत्पल - कुमुद-करवीर - नन्द्यावर्त - पलाश - कर्णिकार - मन्दार - आतसी-केतकी-वकुल - अर्जुन - पुन्नाग- माधवी - पिण्डीतकानि पुष्पाणि भगवदाराधने ग्राह्याणि स्युः[4]।

अग्राह्यपुष्पाणि

कुसुम्भ - जपा - किंशुक - निर्गुण्ड्य - अर्क - उग्रग्रन्थि पुष्पाणि - श्मशान - चण्डालावास समीपोद्भवानि मुखवायुगतानि च भगवदाराधने अग्राह्याणि भवन्ति[5]।

भोज्यासनम्

भगवतः हविरादिसमर्पणं भोज्यासनमुच्यते। अस्मिन् भोज्यासने मधुपर्क-हविः - पानीय -आचमन - मुखवासाः पञ्चोपचाराः स्युः[6]।

---

1. वा.25अ
2. ज्ञा.पृ.129-30
3. स.44,1-2
4. वि.पृ.292, स.46अ
5. वि.पृ.293
6. मधुपर्कैर्हविस्तत्र पानीयाचमनं तथा।
   मुखवासश्च पञ्चैते विष्णोः भोज्यासन क्रियाः॥ वा. 25अ.

पञ्चप्रणामाः

यात्रासन समनन्तरम् अर्चकः भगवन्तं प्रणमेत्। स च प्रणामः पञ्चविधः[1]। ते च यथा - मस्तिष्के अञ्जलिन्यासः मस्तिष्कप्रणामः।

हृदये अञ्जलिन्यासः सम्पुटप्रणामः।

पाणी व्यत्यस्य हृदये अञ्जलिन्यासः प्रह्वाङ्गः प्रणामः।

पादाङ्गुलिभ्यां जानुभ्यां ललाटेन च अञ्जलिना सह भूमौ न्यासः पञ्चाङ्गप्रणामः।

पादौ हस्तौ च प्रसार्य अधोमुखेन दण्डवत् शयनपूर्वक अञ्जलिन्यासः दण्डाङ्गप्रणामः।

उपचाराः

उपचार-विग्रहौ समानार्थकौ। नित्यार्चने प्रयुज्यमानाः उपचाराः उत्तमोत्तमादि भेदेन नवधा भवन्ति[2]। ते च यथा -

आसन - स्वागत - अनुमान - पाद्य - आचमन - पुष्प - गन्ध-धूप-दीप-अर्घ्य-आचमन-स्नान-प्लोत-वस्त्र-उत्तरीय-भूषण-उपवीत-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-आचमन-हविः- पानीय-आचमन-मुखवास-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-अर्घ्य-आचमन-दर्पण-छत्र-चामर-तालवृन्त-ध्वज-गज-रथ-अश्व-नृत्त-गेय-वाद्य-आयुधसेवा-प्रदक्षिण-वेदपारायण-पुराणस्तुति- मात्रादान - मधुपर्क-हविः-होम-पानीय-आचमन-मुखवास-बलि-प्रणाम-पुष्पाञ्जलि-स्तुति-दक्षिणा-अनुमानसंज्ञकाः चतुष्षष्ट्युपचाराः उत्तमोत्तमाः भवन्ति।

आसन-स्वागत-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-अर्घ्य-आचमन-स्नान-प्लोत-वस्त्र-उत्तरीय-भूषण-उपवीत-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-आचमन-हविः-पानीय-आचमन-मुखवास-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-अर्घ्य-आचमन-दर्पण-छत्र-चामर-तालवृन्त-अश्व-

---

1. वि.पृ.286, ज्ञा.पृ.134, खि.22,7-13
2. क्रि.10,1-25

नृत्त-गेय-वाद्य-वेदपारायण-पुराणस्तुति-मात्रा-मधुपर्क-हविः-होम-पानीय-आचमन-मुखवास-बलि-प्रणाम-पुष्पाञ्जलिनामकाः पञ्चपञ्चाशदुपचाराः उत्तममध्यमाः स्युः।

आसन-स्वागत-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-अर्घ्य-आचमन-स्नान-प्लोत-वस्त्र-उत्तरीय-भूषण-उपवीत-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-आचमन-हविः-पानीय-आचमन-मुखवास-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-अर्घ्य-आचमन-दर्पण-छत्र-चामर-तालवृन्त-अश्व-नृत्त-गेय-वाद्य-वेदपारायण-पुराणस्तुति-मात्रादान-मधुपर्क-हविरन्ताः अष्टचत्वारिंशदुपचाराः उत्तमाधमाः स्युः।

आसन-स्वागत-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-अर्घ्य-आचमन-स्नान-प्लोत-वस्त्र-उत्तरीय-भूषण-उपवीत-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-आचमन-हविः-पानीय-आचमन-मुखवास-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-अर्घ्य-आचमन-दर्पण-छत्र-चामर-तालवृन्त-अश्व-नृत्त-गेयान्ताः द्विचत्वारिंशदुपचाराः मध्यमोत्तमाः स्युः।

मध्यममध्यम-मध्यमाधम - अधमोत्तम-अधममध्यम -अधमाधमान्ताः उपचाराः क्रियाधिकारे अस्पष्टाः वर्ण्यन्ते।

द्वात्रिंशदुपचारादारभ्य एकोपचारपर्यन्तम् उपचाराः नवधा भवन्तीति विमानार्चनाकल्पे[1] निर्दिश्यन्ते। तद्यथा -

द्वात्रिंशदुपचाराः

आसन-स्वागत-अनुमान-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-अर्घ्य-आचमन-स्नान-प्लोत-वस्त्र-उत्तरीय-यज्ञोपवीत-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-आचमन-हविः-पानीय-आचमन-मुखवास-बलि-प्रणाम-दक्षिण-पुष्पाञ्जलि-स्तुति संज्ञकाः द्वात्रिंशदुपचाराः भवन्ति। तथैव - ज्ञानकाण्डे[2] समूर्तार्चनाधिकरणे[3] च।

---

1. वि.पृ.290
2. पृ.132
3. 43,6-10

खिलाधिकारे[1] तु प्रणाम-आवाहन-आसन-स्वागत-अनुमान-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-अर्घ्य-आचमन-स्नान-प्लोत-वस्त्र-उत्तरीय-उपवीत-भूषण-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-हविः-पानीय-ताम्बूल-आचमन-होम-बलि-विसर्गा इति द्वात्रिंशदुपचाराः प्रकारान्तरेण वर्ण्यन्ते।

नवविंशत्युपचाराः

आसन - स्वगत-अनुमान-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-अर्घ्य-आचमन-स्नान-प्लोत - वस्त्र-उत्तरीय-यज्ञोपवीत-पाद्य-आचमन-पुष्प-गन्ध-धूप-दीप-आचमन-हविः-पानीय-आचमन-मुखवास-प्रणामदक्षिणान्ताः एकोनत्रिंशदुपचाराः भवन्ति।

अष्टाविंशत्युपचाराः

आसनस्वागतादारभ्य मुखवासान्ताः दक्षिणा सहिताश्च अष्टाविंशत्युपचाराः स्युः

त्रयोदशोपचाराः

आसनादारभ्य अर्घ्याचमनान्ताः प्रणामदक्षिणायुताश्च उपचाराः त्रयोदश भवन्ति।

एकादशोपचाराः

आसनादारभ्य अर्घ्याचमनान्ताः एकादशोपचाराः स्युः

अष्टोपचाराः

पाद्यादि आचमनान्ताः अष्टोपचाराः भवन्ति।

षडुपचाराः

पुष्पाद्यर्घ्याचमनान्ताः षडुपचाराः भवन्ति।

द्वौ उपचारौ

पुष्पाञ्जलि प्रणामौ द्वौ उपचारौ भवतः।

एकोपचारः

प्रणामः एकोपचारः भवेत्।

---

1. 22,3-6

अर्चनाविधौ विष्णवादीनां स्थान-वाहन-बीजाक्षर-मूर्तिमन्त्राः[५]

क्र.सं	देवता	स्थान	वाहन	बीजाक्षर	चतुर्मूर्तिमन्त्राः
1.	विष्णु	-	ध्वज	अ	विष्णु महाविष्णु सदाविष्णु व्यापिनारायण
2.	पुरुष	प्राक्	-	-	पुरुष पुरुषात्मक परमपुरुष धर्ममय
3.	कपिल	अग्नि	-	-	कपिल मुनिवर शुद्ध वेदरूपिण
4.	सत्य	दक्षिण			सत्य सत्यक ज्ञानमय सर्वसंहार
5.	यज्ञ	निर्ऋति	-	-	यज्ञ सर्वदेवमय पुण्य क्रतु

५ विष्णवादीनां स्थान-वाहन-बीजाक्षर-मूर्तिमन्त्राः विमानार्चनाकल्पे (पृ.103-41) एव दृश्यन्ते। खिलाधिकारे (21.अ) समूर्तार्चनाधिकरणे (36.अ) ज्ञानकाण्डे (74.अ) च विष्णवादीनां चतुर्मूर्तिमन्त्राः एव प्रतिपाद्यन्ते।

6.	अच्युत	पश्चिम			अच्युत अपरीमित ऐश्वर्य श्रीपति
7.	नारायण	वायव्य	-	-	नारायण जगन्नाथ देवदेव त्रयीमय
8.	अनिरुद्ध	उत्तर	-	-	अनिरुद्ध महन्त वैराग्य सर्वदेवमय
9.	पुण्य	ईशान	-	-	पुण्य पुण्यात्मक पुण्यमूर्ति पुण्यदायिन
10.	वराह	प्राक्	-	-	वराह वरद भूमिसंधारण वज्रदंष्ट्रिण
11.	सुभद्र	अग्नि	-	-	सुभद्र सुमुख सुखप्रद सुखदर्शन

12.	नारसिंह	दक्षिण	-	-	नारसिंह तपोनाथ महाविष्णु महाबल
13.	ईशितात्मा	निर्ऋति	-	-	ईशन् वरद सर्वेश ईशितात्मन्
14.	वामन-	पश्चिम	-	-	वामन काश्यप अतिथिप्रिय
15.	सर्वोद्वह	वायव्य			सर्वेश सर्वाधार सर्वज्ञ सर्वोद्वह
16.	त्रिविक्रम	उत्तर	-	-	त्रिविक्रम त्रिलोकेश सर्वाधार वैकुण्ठ
17.	सर्वविद्येश्वर	ईशान	-	सर्वविद्येश्वर	पुण्य शुद्ध ज्ञान
18.	इन्द्र	प्राक्	गज	ज	इन्द्र शचीपति पुरुहूत पुरन्दर

19.	अग्नि	आग्नेय	कपिध्वज	अ	अग्नि जातवेदस पावक हुताशन
20.	यम	दक्षिण	महिष	फ	यम धर्मराज प्रेतेश मध्यस्थ
21.	निर्ऋति	निर्ऋति	इभ	प	आरम्भाधिपति नील निर्ऋति सर्वरक्षोधिपति
22.	वरुण	वरुण	इभ	व	वरुण प्रचेतस रक्ताम्बर यादस्पति
23.	वायु	वायव्य	गज	य	जवन भूतात्मक वायु उदान
24.	कुबेर	उत्तर	पुष्पक	क	कुबेर धन्य पौलस्त्य यक्षराज

25.	ईशन्	ईशन्	वृषभध्वज	श	ईशन् देव ईश्वर भव
26.	श्री	देवदक्षिण		श्रीवत्स	श्री धृती पवित्री प्रमोदायिनी
27.	मही	वाम		ह	हरिणी पौष्णी क्षौणी मही
28.	सुभद्र	प्राक्	-	-	-
29.	सर्व	अग्नि	-	-	सर्व विश्व सर्वाधार सर्वेश्वर
30.	हयात्मक	दक्षिण			हयात्मक देवेश सर्वानन्द सनातन
31.	सुखावह	निर्ऋति			सुखावह सुरेश सुमुख सुरप्रिय

32.	रामदेव	पश्चिम			रामदेव महाबल महाभद्र परशुपाणि
33.	संवह	वायव्य	-	-	संवह सर्वतेजोमय आनन्द सर्वररूपिन्
34.	पुण्य	उत्तर	-	-	-
35.	सुवह	ईशान	-	-	सुवह सुकृत विज्ञान वेदमय
36.	मित्र	प्राक्	गज	आद्यक्षर	मित्र लोकहित विश्वात्मन् कपिवर
37.	अत्रि	दक्षिण	रुरु	आद्यक्षर	अत्रि विधातृ तृतीयात्मक वेदमूर्ति
38.	शिव	पश्चिम	गज	आद्यक्षर	शिव मुनिवर शुद्ध सुयोक्तार

39.	विश्व	उत्तर	हय	आद्यक्षर	विश्व भूतनायक जगद्वीक्षण सर्वमातृक
40.	सनातन	अग्नि	पद्म	आद्यक्षर	सनातन मुनीन्द्र ब्रह्मसंभव निष्ठानक
41.	सनन्दन	निर्ऋति	पद्म	आद्यक्षर	सनन्दन गुरु सर्वपूज्य मन्त्रज्ञ
42.	सनत्कुमार	वायव्य	पद्म	आद्यक्षर	सनत्कुमार ज्योतिरीश निरुद्वेह अक्रोध
43.	सनक	ईशान	पद्म	आद्यक्षर	सनक नियन्तार धर्मज्ञ धर्मचोदित
44.	ब्रह्मन्	भित्ति पार्श्व- दक्षिण	हंस	रु	ब्रह्मन् प्रजापति पितामह हिरण्यगर्भ

45.	मार्कण्डेय	पद्म		म	मार्कण्डेय पुण्य पुराण अमित
46.	शङ्कर	भित्ति पार्श्ववाम	वृषभध्वज	म	गङ्गाधर वृषभवाहन अष्टमूर्ति उमापति
47.	भृगु	-	पद्म	आद्यक्षर	पद्मापितृ धातृनाथ ख्यातीश भृगु
48.	धातृ	कवाट दक्षिण	-	आद्यक्षर	धातृ डम्बिन सनिल गन्धन
49.	विधातृ	वाम	गज	आद्यक्षर	विधातृ कीनाश मुरुण्ड न्यर्ण भृति
50.	भुवङ्ग	द्वार	वृषभ	-	भुवङ्ग उत्सङ्ग पीठ

51.	पतङ्ग	उपरि	तुरग	आद्यक्षर	पतङ्ग उत्कर अपादान कपर्दिन्
52.	पतिर	द्वारदक्षिण	गज	आद्यक्षर	पतिर बल्लिद मध्यग वंखन
53.	वरुण	वाम	रथ	आद्यक्षर	वरुण तेजिन दंशिन तरस्विन
54.	न्यक्ष	प्राग्द्वार मध्य	श्वेतध्वज	आद्यक्षर	न्यक्ष अधीत्यक पीवर अर्यक
55.	विवस्वन्	दक्षिण	हय	आद्यक्षर	विवस्वन् भरत विश्वकर्म मरीचिमन्त
56.	मित्र	पश्चिम	कपोत	आद्यक्षर	मित्र अध्वर राजिष्मन्त रमणक

57.	क्षत्तृ	उत्तर	मृग	-	क्षत्तृ महीधर उर्वरोह शेवधि
58.	मणिक	द्वार दक्षिण	गज	म	मणिक महाबल विमल द्वारपालक
59.	सन्ध्या	वाम	-	स	सन्ध्या प्रभावती ज्योतिरूपा दृढव्रता
60.	विखनाः	मख मण्डप द्वारदक्षिण	रुरु	आद्यक्षर	विखना तपोयुक्त सिद्धिद सर्वदर्शी
61.	तापस	वाम	रुरु	आद्यक्षर	तापस सिद्धिराज सर्वदोष- विवर्जित सहस्राश्व मेदिन् तीर्थ
62.	किष्किन्ध	प्रथमा वरण द्वारदक्षिण	कूर्म	आद्यक्षर	किष्किन्ध बहुमर्दन बहुसेन दृढव्रत

63.	तीर्थ	वाम	कूर्म	आद्यक्षर	
64.	वक्रतुण्ड	द्वितीया वरण द्वारदक्षिण	कङ्कत		वक्रतुण्ड एकदंष्ट्र विकट विनायक
65.	नागराज	उत्तर	सागरध्वज	आद्यक्षर	नागराज सहस्रशीर्ष अनन्त शेष
66.	शङ्खनिधि	तृतीयावरण द्वारदक्षिण	पद्मध्वज	आद्यक्षर बीज	शङ्खनिधि नर धनद मौक्तिकोद्भव
67.	पद्मनिधि	वाम	पद्मध्वज	आद्यक्षर	पद्मनिधि वर रक्ताभ भूतनायक
68.	तुहिण	चतुर्था वरण द्वारदक्षिण	तुरण	तु	तुहिण दैत्यराज विष्णुभक्त गङ्गाधर
69.	बलिन्द	वाम	व्याघ्र	आद्यक्षर	दैतेय महावीर्य बलिन्द शूलपाणि

70.	खड्ग	पञ्चमावरण द्वारदक्षिण	वायु	ख	नन्दक खड्ग पापहर दैत्यनाशन
71.	शार्ङ्ग	वाम	मेध	श	शार्ङ्ग धनुर्वर शत्रुहन्तृ वरायुध
72.	शङ्खचूलि	षष्ठावरण द्वारदक्षिण	हंस	आद्यक्षर	शङ्खचूलि वृक्षदण्ड श्वेताभ घोररूपिण
73.	चक्र-चूलिन्	वाम	प्रवृत्त	च	चक्रचूलिन् महानाद उग्रताप भयानक
74.	चण्ड	सप्तमावरण द्वारदक्षिण	सिंह	आद्यक्षर	चण्ड उग्र भयानक द्वारपालक
75.	प्रचण्ड	वाम	-	-	प्रचण्ड भीम घोररूप द्वाराधिप

76.	विष्वक्सेन	उदक्	पुष्परथ	आद्यक्षर	विष्वक्सेन शान्त हर अमित
77.	श्रीभूत	सोपान मध्य	सिंहध्वज	आद्यक्षर	श्रीभूत श्वेतवर्ण वैष्णव मुखपालिन्
78.	गरुड	द्वितीया वरण	वायु	आद्यक्षर	गरुड पक्षिराज सुवर्णपक्ष खगाधिप
79.	चक्र	पूर्व	प्रवृत्त	च	सुदर्शन चक्र सहस्रविकच अनपायिन्
80.	शङ्ख	पूर्व	हंस	श	पाञ्चजन्य शङ्ख अम्बुज विष्णुप्रिय
81.	ध्वज	पूर्व	वायु	ज	जय अत्युच्छ्रित धन्य ध्वज

82.	यूधाधिप	पूर्व	महाचातक	आद्यक्षर	यूधाधिपति नित्य उग्र महाभूत
83.	पावको- ऽर्जुन	पूर्व	सिंहध्वज	आद्यक्षर	पावकोऽर्जुन हस्त अक्षहन्तृ विष्णुभूत
84.	आदित्य -	प्राक् द्वारादुत्तर	सप्ताश्व	ख	आदित्य भास्कर सूर्य मार्ताण्ड
85.	चन्द्र	दिगीश दक्षिण	अश्व	स	वशिष्ट सोम यज्ञाङ्ग इन्दु चन्द्र
86.	अङ्गारक	दक्षिण	अश्व	आद्यक्षर	अङ्गारक वक्र रक्त धरासुत
87.	बुध	पश्चिम	रथ	आद्यक्षर	बुध श्याम सौम्य श्रविष्ठज

88.	बृहस्पति	पश्चिम	हंस	आद्यक्षर	पीतवर्ण गुरु तिष्य बृहस्पति
89.	शुक्र	उत्तर	मेघ	आद्यक्षर	शुक्र भार्गव काव्य परिसर्पिण
90.	शनि	उत्तर	वराहध्वज	आद्याक्षर	सूर्यपुत्र मन्द रैवत्य शनि
91.	राहु	प्राक्	सर्पध्वज	आद्यक्षर	राहु दैतेय उरगेश ग्राहक
92.	केतु	प्राक्	-	-	केतु कृष्णवर्ण रौद्र प्रकाशिन
93.	गङ्गा	तृतीया वरणप्राक्	कूर्मध्वज	ग	नलिनी जाह्नवी गङ्गा लोकपावनी

94.	यमुना	दक्षिण	मत्स्य	आद्यक्षर	यमुना स्फटिका नदीवरा पावनी
95.	नर्मदा	पश्चिम	कूर्मध्वज	आद्यक्षर	नर्मदा नदीवरा विद्युद्रूपा विशाला
96.	सिन्धू	उत्तर	मकरध्वज	आद्यक्षर	सिन्धू नदीवरा मृद्वङ्गी साधना
97.	दुर्गा	प्राग्द्वारा दुत्तर	सिंहध्वज	आद्यक्षर	दुर्गा कात्यायनी वैष्णवी विन्ध्यवासिनी
98.	सरस्वती	आग्नेय	हंस	आद्यक्षर	सिद्धि विश्वा भृगुपत्नी सरस्वती
99.	श्री	निर्ऋति			
100.	ज्येष्ठा	वायव्य	खरयुक्तरथ	आद्यक्षर	भूर्ज्येष्ठायिनी भुवर्ज्येष्ठयिनी सुवर्ज्यष्ठायिनी भूर्भुवस्सुवर्ज्येष्ठायि- कलिराजायिनी कलिपत्नी

101.	धात्री	ईशान	पिशाचध्वज	आद्यक्षर	धात्री महोदरी रौद्री महाकाली
102.	सुरा	अन्तराले प्राक्	कपोतध्वज	आद्यक्षर	सुरा सुमुखी विद्युद्रूपा सुभगा
103.	सुन्दरी	दक्षिण	हंसध्वज	आद्यक्षर	सुन्दरी विशाला पद्माक्षी पद्मवर्णिनी
104.	स्वाहा	दक्षिण		आद्यक्षर	स्वाहा शुभाङ्गी मृदङ्गी साधना
105.	स्वधा	पश्चिम	शुकध्वज	आद्यक्षर	स्वधा समृद्धिनी कुलवर्धिनी सन्नती
106.	संह्लादिनी	पश्चिम	हंसध्वज	आद्यक्षर	संह्लादिनी वरारोहा मायाङ्गी मुदवर्धिनी

107.	राका	उत्तर	हंसध्वज	आद्यक्षर	राका मुख्याङ्गा रक्ताङ्गी वरानना
108.	सिनीवाली	दक्षिण	हंसध्वज	आद्यक्षर	सिनीवाली गभस्तिनी हितदा पुण्यगा
109.	हविरक्षक	हविः	अश्व	आद्यक्षर	हविरक्षक आग्नेय शैलूष पचन
110.	पुष्परक्षक	पुष्प	गज	आद्यक्षर	पुष्परक्षक हरित अधिवास फुल्ल
111.	पुरुष				
112.	त्वष्ट्र	प्लोतादि	हंस	आद्यक्षर	त्वष्ट्र रूपजात निधिज प्लोताधिप
113.	गदा	शयन	सिंहध्वज	ग	गदा कौमोदकी पुण्या प्रबला

114.	चामुण्ड	हविरादि	भूत	आद्यक्षर	सर्वेश्वर जगन्नाथ चामुण्ड सर्वतश्चर
115.	बलिरक्षक	होम	रथ	आद्यक्षर	बलिरक्षक दण्डज सर्वज्ञ सम
116.	गविष्ठ	प्राग्द्वा- रादुत्तर	रथ	आद्यक्षर	गविष्ठ त्रैष्टुभ गुह्य आकाश
117.	हरिणी				
118.	तोय	पश्चिम	गज	प	पवित्र अमृत तोय गह्वर
119.	अग्नि	दक्षिण	गज	आद्यक्षर	वीतिहोत्र आभुरव्य शुद्ध अग्नि
120.	वायु	उत्तर	गज	य	असुर समीकरण वायु पृषदश्व

121.	ऋग्वेद	अग्नि	ऋतुध्वज	आद्यक्षर	ऋक् मधु सोम क्रतु
122.	यजुर्वेद	निर्ऋति	खर	आद्यक्षर	यजुर्वेद दधि मिश्र इष्ट
123.	सामवेद	वायव्य	सप्तस्वरध्वज	आद्यक्षर	साम घृत वज्र यज्ञ
124.	अथर्ववेद	ऐशान्य	हंस	जपाद्यक्षर	अथर्वण पवित्र क्षीर पुण्य
125.	शिव	अन्तराल	प्राक्		
126.	विष्णु	दक्षिण	खगध्वज	आद्यक्षर	विष्णु व्यापी रत्न पुरुष
127.	काश्यप	दक्षिण	त्रिपद	विश्वाद्यक्षर	काश्यप विश्वमू[illegible] अक्षत तक्षक

128.	गुह	पश्चिम	मयूरध्वज	आद्यक्षर	जगद्भुव यजद्भुव विश्वभुव रुद्रभुव ब्रह्मभुव भुवद्भुव
129.	पङ्क्तीश	पश्चिम	भूतध्वज	पराद्यक्षर	पङ्क्तीश मित्र वरद भूतनायक
130.	पवित्र	उत्तर	वृषभ	आद्यक्षर	पवित्र मन्त्र जप्य शुद्ध
131.	पावन	उत्तर	वृषभ	आद्यक्षर	सर्वतीर्थजल पुण्य पावन पुण्यपूजित
132.	तक्षक	पूर्व	अजगरध्वज	आद्यक्षर	तक्षक सर्पराज क्षितिज धराधर
133.	कुहू	पूर्व द्वारोत्तर	खड्गध्वज	आद्यक्षर	मेदिनी कुहू सदंष्ट्रा क्षमा

134.	अनुमति	दक्षिण	खङ्गध्वज	आद्यक्षर	अनुमति स्वरूपा तन्वङ्गी
135.	जया- द्यप्सरसः	पश्चिम	शुकध्वंज	आद्यक्षर	-
	जया				जया सुखप्रदा समृद्धिनी भद्रा
	विजया				विजया विशोका पुण्या कामानन्दा
	विन्दा				विदांलाभा अप्रमत्ता अजेया
	पुष्टिका				पुष्टिका अमोघवती पुण्या प्रमत्ता
	नन्दका				नन्दका मधुजननी सुमुक्ता सुभगा
	कुमुद्वती				कुमुद्वती सुवहा सुसंभरा निर्वृति

136.	सप्तमातरः	दक्षिण	पिशाचध्वज	आद्यक्षर	
	ब्रह्मणी				ब्रह्मणी
					पिङ्गला
					गौरी
					सर्वतोमुखी
	सरित्प्रिया				सरित्प्रिया
					विश्वरूपा
					उग्रांगणेश्वरी
	वैशाखिनी				वैशाखिनी
					शिखण्डिनी
					गायत्री
					षण्मुखी
	वैष्णवी				विश्वगर्भा
					विशोर्मिणी
					कृष्णा
					रोहिणी
	वाराही				वाराही
					वरदा
					उर्वी
					वज्रदंष्ट्रा
	इन्द्राणी				जयन्ता
					कौशिकी
					इन्द्राणी
					घनाघना
					काली
	काली				नालिकादंष्ट्रा
					विशहा
					वेदधारिणी

उत्पलका				उत्पलका
				सर्वामोदा
				सुगन्धीनी
				सर्वात्मिका
विशोका				विशोका
				धनराशि
				कामानन्दा
				अक्षता
				अमिता
37. सप्तरोहिण्यः	उत्तर	मयूरध्वज	आद्यक्षर	कुण्ठिनी
				मन्दिनी
				धरित्री
				रजतप्रिया
ग्रन्थिनी				ग्रन्थिनी
				वेगिनी
				प्रजया
				प्रवाहिनी
कृच्छ्रुणी				कृच्छ्रुणी
				शाखिनी
				वाहिनी
				योक्त्रिनी
कुष्ठुनी				कुष्ठुनी
				जारिणी
				छर्दिनी
				प्रवाहिणी
विकारिणी				विकारिणी
				दामिनी
				बैसिनी
				विद्युता

	दद्रुणी				दद्रुणी इन्दुकरा सौमनसी प्रविद्युता
	इन्द्रिय- विकारिणी				इन्द्रिय- विकारिणी अर्वन्ती गङ्गावाणी स्रुजन्ती
138.	वत्सरा	अग्नि	शशध्वज	आद्यक्षर	वत्सरा वसुमती निधी धर्मसूनुका
139.	पञ्चप्राणाः	निर्ऋति	प्लवङ्गध्वज	य	प्राण अपान व्यान उदान समान
140.	मरुत्	वायव्य	प्लवङ्ग	य	मरुतः लोकधर सप्रसप्रमाण मरुद्वतीसुत
141.	शतरुद्राः	ईशान		श	शतरुद्र ओषधीश त्र्यम्बक कपालपाणि

142. एका-दशरुद्रा	दक्षिण अन्तराल				अजैकपात् अहिर्बुध्नि पिनाकिन् पराजित मृगव्याध शर्व निर्ऋति ईश्वर कपालिन् भव स्थाणु
143. द्वादश आदित्याः		दक्षिण			धातृ अर्यमन् अंशु मित्र वरुण भग इन्द्र विवस्वन् पूषन् पर्जन्य त्वष्टृ विष्णु
144. गन्धर्व	दक्षिण	ाज		आद्यक्षर	गन्धर्व रम्य सुरज सोमज

145.	मुनि	पश्चिम		तप आद्यक्षर	मुनि तपोधन कुश पापविनाशन
146.	अप्सरस्	पश्चिम	हंसध्वज	आद्यक्षर	अप्सरस् अमृतज भोगवह सरोज
147.	अश्विनौ	उत्तर	मयूर	आद्यक्षर	अश्विन यमज युग्म त्वाष्ट्रीपुत्र
148.	वसव	उत्तर	शशध्वज	व	धर ध्रुव सोम अपोनल अनिल प्रत्यूष प्रभास
149.	विद्याधर	पूर्व	महिषध्वज	म	विद्याधर मन्त्रकाल पुष्पज भोगज
150.	तुम्बुर	पूर्व द्वारोत्तर	वायु	तु	तुम्बुर मुनिवर सर्वेश वेदरूपी

151.	नारद	दक्षिण	वायु	आद्यक्षर	नारद मुनिवर गानरूप ब्रह्मसंभव
152.	ऋतवः	दक्षिण	पुष्परथ	ग	षड्ऋतु भद्राशि गन्धर्व तीर्थ
153.	प्रजापति	पश्चिम			प्रजापति स्रष्टु वेदमय ब्रह्मरूपी
154.	मुद्गल	उत्तर	कूर्म	आद्यक्षर	मुद्गल मुनिवर शुद्ध सर्वज्ञ
155.	हलेश	अग्नि	पद्म	आद्यक्षर	हलेश महाबल मायाङ्ग वरदायिन्
156.	जाम्बव	निर्ऋति	मृगध्वज	ज	जाम्बव बालरूप दर्शनीय सुन्दर

157.	असुर	ईशान	खरध्वज	आद्यक्षर	असुर दैतेय घोररूप भयानक
158.	किन्नरमिथुन	अन्तराल प्राक्	वायु	आद्यक्षर	किन्नरमिथुन सङ्गीत तीर्थ पक्षिरूप
159.	प्रह्लाद	दक्षिण	अश्वध्वज	आद्यक्षर	प्रह्लाद प्रजानन विष्णुभक्त गङ्गाधर
160.	मदन	दक्षिण	मकरध्वज	म	मदन काम सुन्दर दिव्यरूप
161.	वीपा	पश्चिम	हंसध्वज	आद्यक्षर	वीपा विद्युद्रूपा विशालाङ्गी मेधा
162.	व्याजिनी	पश्चिम	शुकध्वज	आद्यक्षर	व्याजिनी सुभगा सुन्दरी विशुद्धा

163.	कामिनी	उत्तर	-	-	कामिनी कान्ता शुभाङ्गी विमला
164.	चन्द्राभा	उत्तर	खगध्वज	आद्यक्षर	चन्द्राभा तन्वङ्गी श्वेतरूपा दृढव्रता
165.	सुन्दर	पूर्व	गज	आद्यक्षर	सुन्दर सुरप्रिय शुभानन्द सौम्य
166.	माया	अन्तराल	मयूरध्वज	आद्यक्षर	माया मातङ्गी वाराही वरानना

नवषट्पञ्चमूर्तीनामर्चना

नवषट्पञ्चमूर्तीनामर्चनं ध्रुवाद्यर्चनोक्तवत् करणीयम्। तत्र नवानां मूर्तीनां चतुर्मूर्तिमन्त्राः विशेषतया विमानार्चनाकल्पे एव दृश्यन्ते । यथा[1] -

क्र.सं	देवता	स्थान	चतुर्मूर्तिमन्त्राः
1.	विष्णु	-	-
2.	पुरुष	-	-
3.	श्री	देवस्यदक्षिण	श्री कमला आनन्दा पुरुषप्रिया
4.	भू	देवस्य वाम	मेदिनी धरणी उर्वी सर्वाधारा
5.	भृगु		भृगु मुनिवर शुद्ध अग्निवर्ण
6.	पुराण		पुराण भक्तिमन्त भार्गव चिरञ्जीविन्
7.	सत्य	दक्षिण	---

1. वि.पृ.298-300

8.	धृति	तस्यदक्षिण	धृति दक्षसुता सत्यपत्नी रमा
9.	पौष्णी	वाम	पौष्णी वरदा उर्वी पृथिवी
10.	धातृनाथ		धातृनाथ पूतकाय ब्रह्मसंभव वाग्देवीपति
11.	पुण्य		पुण्य विशुद्ध विश्व वरिष्ठ
12.	नासत्य	द्वितीयद्वारदक्षिण	नासत्य दिव्य विवस्वत्पुत्र अश्विन्
13.	दस्र	वाम	पुत्र सर्वज्ञ देव
14.	अच्युत	पश्चिम	सुन्दर
15.	पवित्री	दक्षिण	पवित्री इन्दिरा लक्ष्मी अच्युतप्रिया

16.	क्षौणी	वाम	क्षौणी वराङ्गा वरदा मही
17.	भृगु		भृगु तपोनिधि वेदरूप महाव्रत
18.	मार्कण्डेय		मार्कण्डेय गुरु दीप्त पुण्यभागिन्
19.	अनिरुद्ध	उत्तर	-
20.	विद्युत	द्वितीयद्वारदक्षिण	विद्युत विद्युन्निभ अरुणानुज घोररूपिण
21.	अप्सरोधिप	वाम	अप्सरोधिप शुद्ध श्वेताभ भयानक
22.	नरनारायणौ	द्वितीयतले दक्षिण	नर नारायण पार्थ कृष्ण गुडाकेश शौरि श्वेतवाहन भक्तवत्सल

23.	प्रजापति		प्रजापति पितामह हेमवर्ण अजानन
24.	नृसिंह	पश्चिम	-
25.	वराह	उत्तर	-
26.	मही	-	मही गा पृथ्वी उर्वी
27.	शयन	तृतीयतल	अनादिनिधन अनन्त महिमान अत्यन्ताद्भुत

नैमित्तिकार्चनम्

मार्गशीर्षादि मासेषु भगवतः विशेषार्चना कर्तव्या। इयं च विशेषार्चना वैखानसग्रन्थेषु नैमित्तिकार्चनमिति व्यपदिश्यते[1]।

नैमित्तिककथनम्

मार्गशीर्षादिमासेषु मासनक्षत्रेषु विष्णुपञ्चदिने विषुवे अयने सङ्क्रमणेषु पुण्यनक्षत्रे राज्ञः यजमानस्य वा जन्मनक्षत्रे भगवतः विशेषपूजा कर्तव्या इति विशेषपूजायाः नैमित्तिककथनं विमानार्चनाकल्पे दृश्यते। तत्रैव नैमित्तिककाल - देवता- हविरादि द्रव्यसमर्पण फलादिकमपि उच्यते। ते च यथा -

नैमित्तिककाल	देवता	हविरादिसमर्पण	फल
मार्गशीर्षशुक्लद्वादशी	-	गौल्यान्ननिवेदन	संवत्सरार्चनफलं
पुष्यमासे पुष्यनक्षत्र	-	क्षीरनिवेदन	संवत्सरार्चनफलं
माघमास	-	अगरुकोष्ठधूप	धूपदानफलं
माघमास पुनर्वसू	राम	उत्सवस्नपनहविर्निवेदनादिक	-
फाल्गुणमास	-	चन्दनादिगन्धलेपन	सर्वैश्वर्यसिद्धिः
उत्तरफल्गुणी	लक्ष्मी	उत्सवस्नपन हवि निवेदनादिक	-
चैत्रमास	-	पुष्पालङ्कार	-
वैशाखमास	-	पानीयसमर्पण	पानीयदान
वैशाखे रेवती	मही	अर्चनोत्सव-स्नपन निवेदनादिक	-
वैशाखे विशाखा	-	आम्रफलनिवेदन	-

1. वि.पृ.311

ज्येष्ठमास	-	वस्त्रदान	वस्त्रदानफलं
आषाढमास	-	अर्घ्यद्रव्यसमर्पण	अर्घ्यदानफलं
श्रावणमास	कृष्ण	घृतदधिनिवेदन	संवत्सरनिवेदन
श्रावणमास अष्टमी	-	क्षीरनिवेदन	विष्णुलोकप्रा
भाद्रपदमास		अपूपनिवेदन	संवत्सरनिवेदन
आश्वयुजमास		मुखवासदान	मुखवासदानप
कार्तीकमास		दीपसमर्पण	दीपदानफलं
कार्तीकमासे कृतिकानक्षत्र		दीपसमर्पण	विष्णुलोकप्रा

अर्चनपात्रादीनां लक्षणम्

अर्चनोपयुक्तानाम् आवाहनपात्रादीनां लक्षणं विमानार्चनाकल्पे[1] सविशदं निर्दिश्यते। यथा -

आवाहनपात्रम्

आवाहनपात्रं सुवर्ण-रजत-कांस्येषु अन्यतमेन निर्मातव्यम्। त विस्तारं चतुरङ्गुलम्, उत्सेधं तदर्धं, सुवृत्तं भवेत्। आस्यतारं षडङ्गुलं, पृष्ठ त्र्यङ्गुलं, मध्ये नासिकायुक्तं वियुक्तं वा भवेत्।

पुष्पपात्रम्

पुष्पपात्रस्य विस्तारं चतुर्विंशत्यङ्गुलं, भित्युत्सेधं द्व्यङ्गुल ओष्ठमर्धाङ्गुलं, पादं षण्मात्रं स्यात्।

गन्धपात्रम्

विस्तारं चतुरङ्गुलम्, उदरविशालं पञ्चाङ्गुलम्, आस्यतारं चतुर यथोचितं पिधानं स्यात्।

धूपपात्रम्

धूपपात्रं ताम्रेण पित्तलेन वा निर्मातव्यम्। विस्तारं षडङ्गुलम्, उत षडङ्गुलम्, ओष्ठमर्धाङ्गुलं, बाह्ये अष्टदलान्वितम्, अधः प्रदेशे द्विपादं, त

1. पृ.178-92

उत्सेधं द्व्यङ्गुलं, दण्डमष्टाङ्गुलायतम्, द्विवक्त्रं, परीणाहं द्व्यङ्गुलं, तद्दण्डपुच्छे द्व्यङ्गुलेन इभपादवत् एकपादं वा भवति। अथवा पादस्योत्सेधं त्र्यङ्गुलं, विस्तारं पञ्चाङ्गुलं पद्माकारं भवेत्। तदूर्ध्वे आयामं सप्ताङ्गुलं, परीणाहं षडङ्गुलं, तदूर्ध्वे पात्रं, तस्य पिधानं यथार्हं, उत्सेधं त्र्यङ्गुलं, मुकुलाकारम् अनेकसुषिरसंयुक्तं भवेत्।

दीपपात्रम्

दीपपात्रस्य विस्तारं पञ्चाङ्गुलम्, ओष्ठमर्धाङ्गुलम्, अश्वत्थपत्राकारं भवेत्। अष्टदिक्षु चतुर्दिक्षु एकस्यां दिशि वा वर्त्याधारयुतं दण्डं पादं वा भवेत्।

घण्टा

घण्टायाः आस्य विस्तारं षडङ्गुलम्, उत्सेधं षडङ्गुलं, तन्मूलविस्तारं चतुरङ्गुलं, शिखरमेकाङ्गुलं, गलोत्सेधं चतुर्यवं, जिह्वा वेदाङ्गुलायता, षडङ्गुलं दण्डस्य उत्सेधं, दण्डाग्रे चक्रं वीशो वा निर्मापयेत्।

महाघण्टा

आस्यविस्तारम् अष्टाङ्गुलम्, उत्सेधमष्टाङ्गुलं, तस्याः मूलविस्तारं षडङ्गुलं, गलं त्र्यङ्गुलोत्सेध, परीणाहं षडङ्गुलं, पट्टिकाद्वयसंयुक्तम्, ओष्ठमेकाङ्गुलं, शिखरोत्सेधं द्व्यङ्गुलं, नाहं सप्ताङ्गुलं, सुषिरं चतुर्नाडी समायुक्तं च, जिह्वा नवाङ्गुलायता भवेत्।

अर्घ्यपात्रम्

अर्घ्यपात्रस्य विस्तारं युगाङ्गुलम्, उत्सेधं द्व्यङ्गुलं, पृष्ठे पात्रं त्रिमात्रोत्सेधं कुर्यात्।

हविःपात्रम्

हविःपात्रं सुवर्ण - रजत - ताम्र-कांस्येषु अन्यतमेन निर्मापयेत्। तस्य विस्तारं द्वादशाङ्गुलमारभ्य षट्त्रिंशदङ्गुलान्तं त्र्यङ्गुलवृध्या नवधा भवेत्। भित्युन्नतमर्धाङ्गुलं, ओष्ठविस्तारं द्वियवं भवति।

पानीयपात्रम्

पानीयपात्रं सुवर्ण-रजत-ताम्र-कांस्येषु अन्यतमेन कुर्यात्। तस्य विस्तारं षडङ्गुलं, सप्ताङ्गुलं वा भवेत्, भित्युत्सेधं त्र्यङ्गुलं, चतुरङ्गुलं वा स्यात्। उदरवलयं दशाङ्गुलम् एकादशाङ्गुलं वा भवति।

मुखवासपात्रम्

मुखवासपात्रं सुवर्ण-रजत-ताम्र-दारुषु अन्यतमेन निर्मातव्यं भवति। तस्य विस्तारं द्वादशाङ्गुलं सुवृत्तं च। घनं द्वियवम्, अर्धाङ्गुलं भित्युत्सेधं दण्डायामं, द्वादशाङ्गुलम्, आयामविस्तारमष्टाङ्गुलम्, उत्सेधं चतुरङ्गुले पद्माकारं पादं च भवेत्।

दर्वी

दर्वी चतुर्विंशत्यङ्गुलायामा, अग्रायतं द्व्यंशं, विस्तारम् अष्टाङ्गुलं, पुच्छायामम् एकांशम्, अग्रात् मूलादारभ्य मध्ये द्व्यङ्गुलक्षयं स्यात्।

त्रिपादिका

त्रिपादिका चतुर्धा भवति। शङ्खपादिका, बकपादिका, त्रिपादिका, स्थालीपादिका इति।

शङ्खपादिकायाः उत्सेधं युगाङ्गुलं, मुखविस्तारं तत्समं त्रिपादयुता त्रिवक्त्रा इति।

बकपादिकायाः मुखविस्तारं षडङ्गुलं, तच्चतुर्गुणं पादायामम्, ईषत् त्रिभङ्गिका त्रिपादयुता इति।

त्रिपादिकायाः विस्तारं चतुः षट् अष्टाङ्गुलेषु अन्यतमम्, उत्सेधं तत्समं, त्रिपादयुता अधस्तात् द्व्यङ्गुलं शरावपृष्ठाकारं भवति।

स्थालीपादिकायाः विस्तारम् अष्टाङ्गुलम्, उत्सेधं तत्सममिति।

पादोदकपात्रम्

पादोदकपात्रस्य मूलं षोडशाङ्गुलं, मुखतारं विंशतिमात्रं, भित्युत्सेधं

सप्ताङ्गुलम्, ओष्ठं द्वयङ्गुलविस्तारम्, एतत् शरावाकृतिं च, तस्य उभयोः पार्श्वयोः मकरास्यवत् भवेत्। तस्य पृष्ठे उत्सेधं द्व्यङ्गुलं, द्विवक्रपादत्रयं सिंहपादवत् कुर्यात्।

आचमनपात्रम्

आचमनपात्रस्य उत्सेधं द्वादशाङ्गुलं तन्मूलस्य आयमविस्तारं षडङ्गुलम्, आस्यतारं द्वादशाङ्गुलम्, ओष्ठस्य विस्तारमेकाङ्गुलं, दण्डायामं चतुरङ्गुलम्, अधस्तात् आयामविस्तारं चतुरङ्गुलम्, उत्सेधं त्र्यङ्गुलं, सुवृत्तं पीठसहितं च भवेत्।

गण्डिका

गण्डिकायाः कुक्षिविस्तारं द्वादशाङ्गुलम्, उत्सेधम् अध्यर्धम्, अधस्तात् विस्तारं षडङ्गुलं, परीणाहं त्रिगुणं, कण्ठस्य विस्तारं चतुरङ्गुलम्, ओष्ठं द्वयङ्गुलम्, आस्यतारं चतुरङ्गुलं, तस्य पार्श्वे नासिका त्रिमात्रोत्तुङ्गा, तस्य वृत्तं कनिष्ठाङ्गुल्यसमं, पृष्ठस्य विस्तारायामं चतुरङ्गुलं, पादं द्वयङ्गुलोन्नतं भवति।

दीपाधारप्रतिमा

आज्यस्थालीं शिरसा पाणिभ्यां वा वहन् नम्रपुरुषः, वहन्ती नम्रस्त्री वा निर्मापयेत्।

दीपमाला

द्वारपार्श्वयोः ताम्र-अयः-दारुषु अन्यतमेन दीपमाला निर्मापयेत्। दीपमाला दण्डस्य उत्सेधं द्वारसमं, विस्तारं चतुरङ्गुलं, घनं त्र्यङ्गुलम्, आयता चतुरङ्गुला, विस्तारं त्र्यङ्गुलं, नालं द्वयङ्गुलं, दण्डेन संयुक्तः दीपाधारः भवेत्।

करदीपपात्रम्

करदीपपात्रम् अयसा हस्तमात्रं निर्मितं भवेत्। तस्य परीणाहम् एकाङ्गुलं, वक्रसहितम्, अग्रे दीपाधारं धुत्तूरपुष्पोपमं, आस्यतारं त्र्यङ्गुलं, चतुरङ्गुलं वा, गर्तं चतुरङ्गुलं, घनं यवमात्रम्, अधः प्रदेशे मुष्टियमं यमद्वयं वा दारुणा कारयेत्।

नीराजनपात्रम्

हेम-रजत-कांस्येषु अन्यतमेन नीराजनपात्रं निर्मातव्यम्। तस्य विस्तारं चतुर्विंशति - षोडश - द्वादशाङ्गुलेषु अन्यतमं समवृत्तं च भित्युत्सेधमर्धाङ्गुलं, सीमा विस्तारम् अर्धाङ्गुलं, पात्रमध्ये त्रिभागैकभागेन अब्जदलयुतम्, उन्नतम् एकाङ्गुलं, कर्णिकामध्ये उत्सेधं त्र्यङ्गुलं, परीणाहमेकाङ्गुलं, मध्यादिनवदिक्षु दीपाधारयुक्तं, मध्ये मध्ये यवं च संयोजयेत्। पृष्ठे पादं षट् चतुरङ्गुलयोः अन्यतमेन आयामविस्तारं संयोजयेत्।

यवनिका

यवनिकायाः विस्तारं द्वारविस्तारसमम्, आयामं द्वारविस्तारस्य अध्यर्धं, श्वेतवस्त्रेण समायुक्ता च भवेत्।

खट्वा

खट्वा दन्तैः दारुसारैर्वा निर्मातव्या। तस्याः विस्तारं चतुर्विंशति - विंशति- षोडश-द्वादशाङ्गुलेषु अन्यतमम्, अर्धाधिक पादोनद्विगुणं द्विगुणं वा भवेत्। पादोत्सेधम् आयामविस्तारार्धं, नाहं तत्समं, चतुर्भिः षड्भिः अष्टभिर्वा पादैः संयुक्तं भवेत्। ईलिका विस्तारं षडङ्गुलं, बहुलं तदर्धं भवति। तस्य उत्सेधं त्रिधा कृत्वा मध्ये पट्टिका, तद्बाह्ये कपोताकृतिः, विस्तारं त्र्यङ्गुलम्, आयामं यथार्हं, कक्ष्या तु कार्पासतन्तुना कृत्वा खट्वामावेष्टयेत्।

खट्वायाः आयामविस्तारसमं, दश-अष्ट-षडङ्गुलेषु अन्यतमम् उत्सेधम्, अण्डजाद्यैः क्षौमाद्यैश्च संयुक्तं तल्पं च निर्मापयेत्।

उपधानम्

उपधानस्य विष्कम्भं त्रिंशदङ्गुलं, परीणाहं त्रिगुणम्, आयामं यथोचितं, द्वादश द्व्यङ्गुलोत्सेधं युगपादं, विष्कम्भमष्टाङ्गुलं पालिकाकारवत् च भवेत्।

पुष्पफलका

खदिर-अर्जुन-मधूकाद्यैः शुभदारुसारैः निर्मातव्या पुष्पफलका भवति। तस्याः विस्तारम् अष्ट-चतुः-षट् तालेषु अन्यतमम्, आयामम् अष्ट - षट् - चतुर्हस्तेषु अन्यतमम् बाहुल्यं चतुः त्रि, द्विमात्रसंयुक्तं, युगपादस्य उत्सेधं द्वादशाङ्गुलं, विष्कम्भमष्टाङ्गुलं भवति।

विष्टरम्

विष्टरस्य विस्तारं चतुर्विंशत्यङ्गुलायामं, समचतुरश्रं वृत्तं वा भवेत्। बाहुल्यं वेदाङ्गुलं, मुष्टिः षडङ्गुलायामा, परीणाहं सप्ताङ्गुलं भवति।

आसनविष्टरम्

आसनविष्टरं शय्यायाः विष्टरवत् पादहीनं समं वा कुर्यात्।

यन्त्रिका

यन्त्रिका अयसा निर्मिता स्यात्। परीणाहं मध्यमाङ्गुलिः। द्विवक्रा, मूले मुकुलं वलयं च संयुक्ता भवति।

स्नपनविधिः

राहुसंप्लव-गुरुशुक्रोदय-मासर्क्ष-विष्णुपञ्चदिन अनावृष्टि-महाव्याधि-कोपादिनिमित्तसंभवे देवशस्य स्नपनं कार्यमिति वैखानसे[1] विधीयते।

स्नपनमण्टपस्य स्थानम्

देवालयाभिमुखे पश्चिमे उत्तरे ईशान्यां वा स्नपनमण्टपः निर्मातव्यः[2]।

नवविधस्नपनम्

स्नपनञ्चेदम् अधमाधमादारभ्य उत्तमोत्तमपर्यन्तं नवधा विभज्यते। तेषु चतुर्विंशतिस्नपन कलशम् अधमाधमम् (24), अष्टचत्वारिंशत् कलशस्नपनं अधममध्यमम् (48), अष्टोत्तरशतकलशस्नपनं अधमोत्तमम् (108), षोडशोत्तरद्विशतकलशस्नपनं मध्यमाधमम् (216), चतुर्विंशत्युत्तरत्रिशत कलशस्नपनं मध्यममध्यमम् (324), द्वात्रिंशदुत्तर चतुश्शतकलश स्नपनं मध्यमोत्तमम् (432), चत्वारिंशदुत्तर पञ्चशतकलशस्नपनम् उत्तमाधमम् (540), अष्टचत्वारिंशदुत्तर षट्शतकलशस्नपनम् उत्तममध्यमम् (648), षट्पञ्चाशदुत्तर सप्तशतकलशस्नपनम् उत्तमोत्तममिति (756) नवविध स्नपनं विमानार्चनाकल्पे[3] प्रोच्यते।

ज्ञानकाण्डे[4] तु नवविध स्नपनमित्थं निर्दिश्यते, यथा - चतुर्विंशतिकलश स्नपनं अधमाधमम् (24), अष्टचत्वारिंशत् कलश स्नपनम् अधममध्यमम् (48), अष्टोत्तरशतकलश स्नपनम् अधमोत्तमं (108), षोडशोत्तरद्विशतकलशस्नपनं मध्यमाधमम् (216), चतुर्विंशत्युत्तर त्रिशतकलशस्नपनं मध्यममध्यमम् (324), चत्वारिंशदुत्तरपञ्चशतकलश स्नपनं मध्यमोत्तमम् (540), अष्टचत्वारिंशदुत्तर षट्शतकलशस्नपनम् उत्तमाधमम् (648), चतुष्षष्ट्युत्तर अष्टशत कलश स्नपनम् उत्तम मध्यमम् (864), अशीत्युत्तरसहस्रकलशस्नपनम् उत्तमोत्तममिति (1080)।

खिलाधिकारे तु विशेषतया अष्टोत्तरशतकलशस्नपन, चत्वारिंशत

1. वि.पृ.323, क्रि.13,1-4
2. वि.पृ.326, ज्ञा.पृ.166
3. पृ.327
4. पृ.172

कलशस्नपन, चतुर्विंशति कलशस्नपन, सहस्रकलश स्नपनमिति स्नपनभेदः चतुर्धा वर्ण्यते।

अशक्तस्य नवविधस्नपनम्

विमानार्चनाकल्पे अशक्तस्य नवविध स्नपनं प्रकारान्तरेण दृश्यते। यथा[1]

पञ्चकलशस्नपनमधमाधमम्
सप्तकलशस्नपनमधममध्यमम्
नवकलशस्नपनमधमोत्तमम्
दशकलशस्नपनं मध्यमाधमम्
द्वादशकलशस्नपनं मध्यममध्यमम्
चतुर्दशकलशस्नपनं मध्यमोत्तमम्
षोडशकलशस्नपनमुत्तमाधमम्
अष्टादशकलशस्नपनमुत्तममध्यमम्
विंशतिकलशस्नपनमुत्तमोत्तममिति।

संभारसंभरणम्

प्राग्द्रव्य-प्रधानद्रव्य-अनुद्रव्यरूपेण संभाराणि त्रिविधानि भवन्ति। तेषु मृत्-पर्वत-धान्य-अङ्कुर-मङ्गलानि प्राग्द्रव्याणि[2] स्युः, पञ्चगव्य-घृत-मधु-दधि-क्षीर-गन्धोदक-अक्षतोदक-फलोदक-कुशोदक-रत्नोदक-जप्योदक-सर्वौषध्युदकानि द्वादशप्रधान द्रव्याणि[3] भवेयुः। पुण्यपुष्प-चूर्ण-कषाय-तीर्थोदिक-वनौषधि-हरिद्राचूर्ण - सर्वगन्धचूर्ण - उष्णोदक - प्लोत-मूलगन्ध - धातु - अम्बरादीनि अनुद्रव्याणि[4] भवन्ति।

स्नपनप्रकारः

आचार्यः संभाराणि संभृत्य स्नपनबिम्बम् अलाभे कौतुकं बिम्बम् अथवा उत्सवं बिम्बं वा संगृह्य अभ्यर्च्य प्रतिसरं बध्वा वाद्यादि घोषैस्सह देवं स्नानवेद्यां

1. वि.पृ.328-9
2. वि.पृ.323-4, ज्ञा.पृ.164-5
3. वि.पृ.324, ज्ञा.पृ.165
4. वि.पृ.325, ज्ञा.पृ,165,स.52,5-6

स्नपनपात्राणि

स्नपनोपयोगिपात्रादीनां लक्षणं विमानार्चनाकल्पे[1] एव स्पष्टतया प्रतिपाद्यते।

सहस्रधारापात्रम्

नित्यनैमित्तिकाभिषेकार्थं सहस्रधारायुतं पात्रं सुवर्णाद्यैः निर्मातव्यम्। तस्य विस्तारायामं चतुर्विंशति षोडशद्वादशाङ्गुलेषु अन्यतमं समवृतं भवेत्। भित्युत्सेधमङ्गुलं ओष्ठमेकाङ्गुलं मध्ये विस्तारायामं चतुरङ्गुलं कर्णिकाकारं भवति। मध्ये रत्नं सुवर्णं वा निक्षिप्य परितः अष्टदलोपेतं, पार्श्वयोः तालमात्रोन्नतं विस्तारं त्र्यङ्गुलम् अग्रं गण्डिकाद्वयं, मुकुलाकारं समुष्टिकं वा निर्मापयेत्।

शङ्खपद्मनिधी

शङ्खाकारं पद्मकारं च पात्रे द्वे आढकपूर्णे तदर्धपूर्णेवा निर्मापयेत्। पार्श्वे आयामं षड्विंशत्यङ्गुलं परीणाहं षडङ्गुलम्, अन्तर्जलनिर्याणमार्गयुतं नालं च भवेत्।

दीपाधारपात्रम्

दीपाधारपात्रं ताम्राद्यैः निर्मातव्यम्। तस्य उत्सेधम् एकहस्तादि नवहस्तान्तं भवेत्। पादविस्तारं शरांशेषु एकांशम् उत्सेधं तदर्धं, समवृत्तं पद्माकारं च। आज्यधारा विस्तारं तदष्टांशोनम्, ऊर्ध्वे मुकुलम् अष्टांशैकांशं, मध्ये एक-त्रि-पञ्च-सप्त-नव-एकादश-त्रयोदश-पञ्चदशसंख्याकेषु अन्यतमेन आज्यधारा समायुक्तम्। मध्ये नानापट्टिभिः नानाकुम्भैः संयुक्तं स्यात्।

दर्पणः

दर्पणः शुद्धेन कांस्येन च निर्मातव्यः। नव एकादश त्रयोदशाङ्गुलेषु

1. वि.पृ.178-92

अन्यतमं विस्तारायामं पूर्णचन्द्राकारं भवेत्। नालम् अष्टाङ्गुलं द्वादशाङ्गुलं वा नानापट्टिकासहितं कुर्यात्।

जलद्रोणी

जलद्रोणी सुवर्ण-रजत-ताम्रेषु अन्यतमेन संयुक्ता स्यात्। भारजलैः द्विभारजलैः त्रिभारजलैः संयुक्ता सुदृढा निर्विवरा सुवृत्ता चतुरश्रा ग्रीवाहीना पार्श्वयोः वलयसंयुक्ता मृण्मयी वलयहीना सुग्रीवा च भवेत्।

स्नानविष्टरम्

स्नानविष्टरं द्वात्रिंशत्-अष्टाविंशति - चतुर्विंशति - विंशति-षोडश-द्वादश - अष्टाङ्गुलेषु अन्यतमं विस्तारायामं समचतुरश्रं, तस्य पादायामं विस्तारार्धं त्रिपादं वा, नाहं यथार्हं, चतुष्पादैः संयुक्तम्, उपरि चतुर्दिशां वेदिकां चतुरङ्गुलोत्सेधां, वामभागे वारिमार्गयुतं वेदिविहीनं भवेत्।

मानं यथा -

महीदेवी ध्रुवबेरस्य बाहुसमा स्तनान्ता[1] वा नवतालमानेन[2] वा दशतालमानेन[3] वा कल्पयेत्।

मही ऊर्ध्ववक्त्रा ऐशान्यां न्यस्तमौलिका नैर्ऋत्यां न्यस्तपादा आकुञ्चित दक्षिणपादा प्रसारितवामपादा शयाना द्विभुजा धृतोत्पलदक्षिणहस्ता ऊरुप्रसारितवामहस्ता आभरणान्विता साम्बरा लेखनीया[4]।

ततः अस्याः महीदेव्याः ललाट-बाहु-स्तन[5]-जठर[6]भागेषु अन्यतमे स्थाने मन्त्रपूर्वकेण मृत् सङ्ग्राह्या भवेत्।

आचार्यः तं च मृदं हेमादिपात्रेषु संगृह्यग्रामप्रदक्षिणपूर्वकं आलयं च प्रविशेत्।

अङ्कुरार्पणम्

मृत्सङ्ग्रहणसमनन्तरम् अङ्कुरार्पणं कर्तव्यम्[7]। अलङ्कृते अङ्कुरार्पण मण्डपे पालिकाघटिकशरावाः स्थापनीयाः। पालिकादिषु अङ्कुरार्पणपात्रेषु मृदं निक्षिप्य तेषु बीजानां न्यसनं कार्यम्।

ध्वजदण्डस्थापनम्

अथ महोत्सवाङ्गतया क्रियमाणं ध्वजदण्डस्थापनम् एकं प्रधानं कर्म। तत्र ध्वजदण्डोपयुक्तः दारुविशेषः तस्य भेदः ग्राह्याग्राह्यविचाराः अन्तर्भवन्ति। तेषु -

ध्वजदण्डदारवः

ध्वजदण्डोपयुक्तः दारुविशेषः अन्तस्सार बहिस्सार इति द्विविधः। चम्पक - चन्दन-वकुल-अर्जुन-खदिर-बिल्व दीपकाः अन्तस्सार इति, नारिकेल - वेणु पूगवृक्षाः बहिस्सार इति अन्तस्सार बहिस्सारवृक्षाः निर्दिश्यन्ते[8]।

---

1. वि.पृ.347
2. *Ibid*
3. स.55,28
4. वि.पृ.347
5. *Ibid*
6. स.55,31, खि.32,75-6
7. वि.पृ.347
8. वा.32.अ

ब्राह्मणानां वेणुदण्डः, नृपाणां जातिवृक्षः, वैश्यानां चम्पकः, शूद्राणां क्रमुकः इति वर्णानुरोधेन ध्वजदण्डदारवः कथ्यन्ते[1]।

ध्वजदण्डदारु-ग्राह्याग्राह्याः

मधूक-सालवृक्ष-पनसादि सारवृक्षाणां दारवः ध्वजदण्डार्थं ग्राह्याः इति खिलाधिकारे[2] उच्यते। वासाधिकारे[3] पलाश - अश्वत्थ-बिल्व-बन्धूक-अशन-वकुल-अर्जुनाःदारवः ग्राह्याः इति प्रतिपाद्यन्ते।

कृमिच्छिद्र स्वयंशीर्ण[4] अशनिहत वातपतित सुषिर[5] कृमिकोटर वक्रसंयुक्ताः[6] दारवः ध्वजदण्डार्थम् अग्राह्याः भवन्ति।

ध्वजदण्डमानम्

विमानसम-पादाधिक -अर्धाधिक -पादहीन -अर्धहीनो वा ध्वजदण्डमान इति वैखानसग्रन्थेषु[7] एकरूपतया विव्रियते।

ध्वजदण्डस्य स्थापनस्थापनम्

ध्वजदण्डस्य स्थापनस्थानं वैखानसग्रन्थेषु एकरूपतया नैव दृश्यते। यथा -

[8]विमानार्चनाकल्पे यूथाधिप अक्षहन्त्रोः पृष्ठे चक्रस्य पृष्ठे वा ध्वजदण्डस्य स्थानं निर्दिश्यते चेत् वासाधिकारे[9] अक्षहन्तुः पृष्ठे इति, यज्ञाधिकारे[10] बलिपीठस्य पश्चिमे मध्यसूत्रस्य मध्यमे इति, प्रकीर्णाधिकारे[11] तु पीठगोपुरयोर्मध्ये विभक्तेषु पञ्चसु भागेषु पञ्चमे भागे इति ध्वजदण्डस्य स्थानं प्रतिपाद्यते।

1. पृ.54,28-9, आ.पृ.173, क्रि.14,15-6
2. पृ.423
3. 32.अ
4. Ibid
5. आ.पृ.173-4
6. प्र.27,267
7. वि.पृ.339, आ.पृ,174
8. पृ.341
9. 32.अ
10. 38,35-6
11. 27.306-10

ध्वजदण्डस्थापनम्

ध्वजदण्डस्थापने प्रथमम् अवटस्य खननं ततः पीठनिर्माणं कार्यम्। तत्र पीठोऽपि वेदिसंख्यानुरोधेन भिद्यते।

आदौ ध्वजदण्डस्य स्थापनार्थमवटं, पञ्चतालं- चतुस्तालं - त्रितालं वा भवोदिति विमानार्चनाकल्पे समूर्तार्चनाधिकरणे[1] खिलाधिकारे[2] च उच्यते। वासाधिकारे[3] तु षट्तालं - पञ्चतालं - चतुस्तालं वा इति कथ्यते।

ध्वजदण्डपीठस्य एकवेद्याः उत्सेधः एकहस्तः, विस्तारः द्विहस्तायतः इति, अयं अष्टदलैस्संयुक्तो भवेदिति च विमानार्चनाकल्पे[4] खिलाधिकारे[5] च एकवेद्याः मानं प्रतिपाद्यते। [6]प्रकीर्णाधिकारे तु एकवेदीयुक्तस्य ध्वजदण्डपीठस्य उत्सेधः त्रितालसमः तदध्यर्धविस्तारः रत्निमात्रसाष्टपत्रः भवेदिति च प्रकारान्तरेण निर्दिश्यते।

ध्वजदण्डपीठस्य तिसृणां वेदीनां विस्तारः उत्सेधं च एकतालमिति अष्टाङ्गुलं वा भवेदिति च वैखानसग्रन्थेषु[7] ध्वजदण्डस्य तिसृणां वेदीनां मानः निर्दिश्यते। ध्वजदण्डस्थापनार्थं परिकल्पिते अवटे पञ्चरत्नानि शाल्यादि धान्यानि च निधाय तस्मिन् ध्वजदण्डं संस्थापयेदिति विमानार्चनाकल्पे[8] ध्वजदण्डस्य स्थापनं विधीयते।

ध्वजदण्डस्थापनसमनन्तरम् उत्सवाङ्गतया कर्तव्यस्य ध्वजारोहणस्य प्रकारः सर्वेषु वैखानसग्रन्थेषु प्रतिपाद्यते यथा -

ध्वजारोहणप्रकारः

उत्सवाङ्गतया निर्दिष्टे ध्वजारोहणकर्मणि ध्वजपटलक्षणं, ध्वजपटलेख्यस्य गरुडस्य लक्षणं ध्वजपटप्रतिष्ठा, भेरीपूजा, भेरीताडनं, बलिनिर्वापणमित्येते अंशाः भवन्ति। तेषु ध्वजपटलक्षणं यथा -

1. 54,37-8
2. पृ.428
3. 32 अ
4. पृ.341
5. पृ.428
6. 24,47-8
7. वि.पृ.341-2, ज्ञा.पृ.176, स.54,76-7, वा.32 अ
8. पृ.341

ध्वजपटलक्षणम्

ध्वजारोहणाङ्गध्वजपटस्य लक्षणं विमानार्चनाकल्पे[1] ज्ञानकाण्डे[2] च स्पष्टतया निर्दिश्यते। तद्यथा -

अहतः शुद्धः शुक्लः कार्पासः तान्तवः सूक्ष्मः ध्वजपटः ध्वजारोहणे ग्राह्यः।

ध्वजपटस्य आयामः चतुर्दश - त्रयोदश - द्वादश -एकादश - दश- नव-अष्ट-षड्हस्तेषु अन्यतमः भवेत्। ध्वजपटस्य विस्तारस्तु सप्त - षट्- पञ्च-चतुस्तालेषु अन्यतमः भवेदिति ध्वजपटस्य मानं विमानार्चनाकल्पे[3] निर्दिश्यते चेत् ज्ञानकाण्डे[4] तु ध्वजपटस्य विस्तारः चतुस्तालः विमानद्वारसमः तदर्धो वा भवेदिति, आयामः द्वादश- अष्ट - सप्ततालेषु अन्यतमो वा भवेदिति उच्यते।

ध्वजपटलेख्य - गरुडमानम्

ध्वजपटलेख्यस्य गरुडस्य मानं विमानार्चनाकल्पे[5] सविशदं प्रतिपाद्यते। यथा -

ध्रुवबेरस्य बाहुसमः कर्णान्तः -स्तनान्तः-नाभ्यन्तो वा, द्वारसमः - पादाधिकः - अर्धाधिकः - पादहीनः अर्धहीनो वा, गर्भगेहस्य अर्धः त्रिपादः समो वा, नवतालमानेन वा गरुडः निर्मातव्यः इति कथ्यते।

ध्वजपटलेख्य गरुडलक्षणम्

ध्वजपटे लेख्यस्य गरुडस्य लक्षणं वैखानसग्रन्थेषु[6] एकरूपतया दृश्यते। तथाहि -

गरुडः समाकुञ्चितवामपादः, प्रसारित दक्षिणपादः स्थितः द्विभुजः प्राञ्जलिः पक्षद्वययुतः सुवर्णवर्णः सर्वाभरणभूषितः उरगारूढदक्षिणभुजः हाराङ्गदनूपुरकिरीटसहितः भवेत्। तस्य पार्श्वे शङ्खचक्रौ उपरिछत्रम् अष्टमङ्गलानि चन्द्रसूर्यौ सनकसनत्कुमारौ च लेखयेत्।

---

1. पृ.339
2. पृ.174
3. पृ.339
4. पृ.174
5. पृ.340
6. वि.पृ.340, ज्ञा.पृ.174

ध्वजपटप्रतिष्ठा

ध्वजपटस्थ गरुडं प्रथमं प्रतिष्ठाप्य तदनन्तरं ध्वजारोहणं कुर्यात्।

ध्वजारोहण - काल -

सायाह्नः- ध्वजारोहणस्य कालः इति विमानार्चनाकल्पे[1] ज्ञानकाण्डे[2] च प्रतिपाद्यते चेत् क्रियाधिकारे[3] समूर्तार्चनाधिकरणे[4] च प्रदोषः इति ध्वजारोहणस्य कालः प्रकारान्तरेण उच्यते।

भेरीपूजा-भेरीताडनम्

ध्वजारोहणकर्मणि भेरीपूजा भेरीताडनं च प्रधानं कर्म भवति। तत्र भेरीपूजा यथा -

आग्नेय्यां न्यस्तभेर्यां भूतेश आवाहनम् अर्चनं हविर्निवेदनं च विधीयते[5]। भेरीताडनं यथा

आचार्यः दक्षिणहस्तेन यष्टिं संगृह्य व्याहृतिभिः भेरीताडनं कुर्यात्[6]।

बलिप्रदानम्

आचार्यः वाद्यादिघोषपूर्वकं बलिं गृहीत्वा आलयगतद्वारपाल - लोकपाल - विमानपाल - अनपायिभ्यः ब्रह्मस्थानादारभ्य इन्द्रादिक्रमेण ग्रामे नवसु दिक्षु तत्तद्देवानां गद्यपद्यस्तोत्रैरावाहनपूर्वकबलिप्रदानं कुर्यादिति वैखानसग्रन्थेषु[7] विधीयते।

ध्वजारोहणप्रकारः

बलिनिर्वापणसमनन्तरं ध्वजपटं यन्त्ररज्जुना बध्वा मन्त्रपूर्वकेन आचार्यः ध्वजदण्डाग्रे संयोज्य प्रतिष्ठाप्य निवेदनादिकं च कुर्यादिति ध्वजारोहणप्रकारः विमानार्चनाकल्पे[8] सविशदं प्रतिपाद्यते।

---

1. पृ.339
2. पृ.176
3. पृ.165
4. 54,69
5. वि.पृ.342-3
6. ज्ञा.पृ.176, वि.पृ.342-3
7. वि.पृ.343, ज्ञा.पृ.175, स.55,51-7
8. पृ.344

कुम्भार्चनम्

उत्सवाङ्गतया निर्दिष्टेषु कर्मसु अन्यतमं कुम्भार्चनम्। अस्मिन् कर्मणि यागशालायाः मध्ये अष्टतालायतविस्तारां चतुरश्रां द्वितालोत्सेधां वेदिकां प्रथमतः प्रकल्पयेत्।

अस्यां वेद्यां द्वयङ्गुलोत्सेधम् अङ्गुलोत्सेधं वा धान्यान्यास्तीर्य नवधा विभज्य तेषु नवसंख्याकान् कुम्भान् स्थापयेत्। तेषु नादेयं जलं संपूर्य विष्णुगायत्र्या मध्यादि कुम्भेषु नवरत्नानि निक्षिप्य मध्ये प्रधानकुम्भे पञ्चायुधानि सौवर्णानि च प्रक्षिप्य प्रधानकुम्भे विष्णुं देव्यौ च आवाह्य प्राच्यादिदिक्षु विद्यमानेषु कुम्भेषु सत्य - अच्युत - अनिरुद्ध - कपिल - यज्ञ - नारायण- पुण्यानावाह्य विष्ण्वादीन् यावदुत्सवान्तं समभ्यर्चयेत्। अन्ते ध्रुवबेरे शक्तिसमारोपणं विधीयते[1]।

प्रतिसरबन्धः

महोत्सवे कुम्भार्चनसमनन्तरम् आचार्यः उत्सवबिम्बम् आसाद्य अभ्यर्च्य सौवर्णं तान्तवं वा प्रतिसरं बन्धयेदिति विमानार्चनाकल्पे[2] कथ्यते।

होमः

हौत्रशंसनपूर्वकं मूर्तिमन्त्रैर्होमः उत्सवाङ्गकर्मणि विशेषतया विधीयते। तत्र तिथि - वार - नक्षत्रादि दैवत्यहोमः प्रतिपाद्यते। तत्रापि होमः विशेषतया उत्सवस्य प्रथमदिनादारभ्य नवमदिन पर्यन्तं क्रमेण पालाश - शमी-न्यग्रोध-औदुम्बर-अश्वत्थ - खदिर -प्लक्ष-पालाशैः समिद्भिः होमः कार्यः इति विमानार्चनाकल्पे प्रकीर्णाधिकारे च प्रतिपाद्यते[3]।

क्रियाधिकारे[4] तु उत्सवस्य प्रथमदिनादारभ्य एकविंशतिदिनपर्यन्तं क्रमेण पलाश - बिल्व-शमी - न्यग्रोध-औदुम्बर-अश्वत्थ - खदिर - प्लक्ष-अपामार्ग- आम्र-कुश - दौर्ग- आमलक-पाटल-पनस-कोविदार-पुन्नाग-मन्दार-वकुल-चम्पक-कपित्थैः समिद्भिः होमः कार्य इति निर्दिश्यते।

---

1. वि.पृ.348-9, प्र.25,54-93
2. पृ.349
3. वि.पृ.350, प्र.25,137-8
4. 14,73-9

उत्सवदिनपुष्पाणि

होम-अर्चन-कुम्भपूजादिषु कर्मसु उपयुक्तानां पुष्पाणां निर्देशः विमानार्चनाकल्पे[1] दृश्यते। यथा -

प्रथमदिने	पद्मम्
द्वितीयदिने	बिल्वपत्रम्
तृतीयदिने	करवीरम्
चतुर्थदिने	कुमुदम्
पञ्चमदिने	नन्द्यावर्तम्
षष्ठदिने	तुलसी
सप्तमदिने	स्थलारविन्दम्
अष्टमदिने	विष्णुक्रान्तम्
नवमदिने	पङ्कजमिति

उत्सववाहनानि

उत्सवदिनेषु देवदेवं प्रतिदिनं शिबिकादियाने आरोप्य, प्रधानवीथिषु भ्रमणं कार्यम्। तत्र प्रथमदिनादारभ्य नवमदिनपर्यन्तं भ्राम्यमाणानि वाहनानि यथा-

प्रथमदिने	प्रभा हंसो वा
द्वितीयदिने	कण्ठीरवः
तृतीयदिने	हनुमान्
चतुर्थदिने	पक्षिराट्
पञ्चमदिने	अनन्तः
षष्ठदिने	गजेन्द्रः
सप्तमदिने	प्रभा,पुष्पकविमानं च
अष्टमदिने	तुरगः

1. पृ.356

नवमदिने रथोत्सवः इति खिलाधिकारे[1] प्रतिपाद्यते। क्रियाधिकारे[2] तु प्रथमदिनादारभ्य एकविंशतिदिनपर्यन्तं भ्राम्यमाणानि वाहनानि निर्दिश्यन्ते। तानि यथा -

वाहनानि

दिनसंख्या	दिवसे	रात्रौ
1.	शुक	हंस
2.	मृगेन्द्र	शरभ
3.	कपीन्द्र	प्रभा
4.	कल्पक	पुन्नाग
5.	पक्षीश	अर्धचन्द्रक
6.	गज	पाशि
7.	पुष्पक	कमल
8.	डोला	अश्व
9.	विमान	यान
10.	शिबिका	गजलक्ष्मी
11.	कच्छप	पुन्नाग
12.	कृष्णसार	मत्स्य
13.	कूर्म	तल्प
14.	कौतुकरथ	शार्दूल
15.	कुण्डली	गण्डभेरुण्ड
16.	प्रभापीठ	इन्द्र
17.	गिरि	पनस
18.	कालीय	चक्र
19.	आतप	पारिजात
20.	ध्वज	शङ्ख
21.	रथ	---

विमानार्चनाकल्पे तु वाहनान्येतानि नाम्ना नैव निर्दिष्टानि।

---

1. 32,129-33 2. 14,89-106

चूर्णोत्सवः

ततः तीर्थदिने प्रातःकाले चूर्णोत्सवः उत्सवाङ्गकर्मसु कार्यः। सपरिवारं देवं धान्यपीठे संस्थाप्य हरिद्राचूर्णेन स्नपनं चूर्णोत्सव इत्युच्यते[1]।

अवभृथः

यज्ञसमाप्तौ क्रियमाणः कार्यविशेषः अवभृथः[2]। अवभृथस्य देवता वरुणः[3]। देवयजनरूपे भगवतः क्रियमाणस्य उत्सवस्यान्ते अवभृथः विधिना कर्तव्य इति आगमग्रन्थेषु दृश्यते। तत्र अवभृथस्य कालः अवभृथस्य प्रदेशः, अवभृथप्रकारः इत्येते अंशाः वर्तन्ते तेषु -

अवभृथस्य कालः प्रदेशश्च

मध्याह्ने अवभृथः कार्यः इति अवभृथस्य कालः विमानार्चनाकल्पे[4] ज्ञानकाण्डे[5] च कथ्यते।

आलयाभिमुखे ऐशान्यां उत्तरे वा तटाके नद्यां नदीसंगमे समुद्रे[6] वाप्यां[7] निर्झरे[8] वा अवभृथः कार्य इति अवभृथप्रदेशः निर्दिश्यते।

अवभृथप्रकारः

आचार्यः जलाभिमुखे सुदर्शनविष्वक्सेन गरुडैस्सह सदेवीकं देवं संस्थाप्य रत्नोदकादिभिः संस्नाप्य सुदर्शनं च अभिषिच्य तीर्थजले सुदर्शन विष्वक्सेन गरुडान् निमज्जयेत्। अयमेव अवभृथः[9]। अस्मिन् तीर्थजले स्नानकरणेन पापविमुक्ताः भवन्तीति आस्तिकानां विश्वासः।

ध्वजावरोहणम्

अवभृथ दिवसस्य रात्रौ आचार्यः सुदर्शन विष्वक्सेन गरुडैर्विना ब्रह्मादीनां बलिप्रदानपूर्वकम् उद्वासनं कृत्वा वाद्यादि घोषैर्विना देवालयेषु शून्यागारेषु चैत्य

---

1. वि.पृ.356-7, ज्ञा.पृ.180
2. वाच.पृ.430
3. तै.अ.2,66
4. पृ.357
5. पृ.180
6. वि.पृ.357
7. खि.32,161
8. स.56,22
9. वि.पृ.357-8

वृक्षमूलेषु मातृदुर्गास्कन्द विघ्नेश शक्त्यादीनां स्थानेषु श्मशानसमीपे वापी कूप-तटाक- आराम-ग्राम-चतुस्सीम-भूत-क्रूर-देवतानां च स्थानेषु बलिप्रदानं विधाय अग्निसन्निधौ स्नानं कृत्वा ध्वजमन्त्रेण ध्वजावरोहणं कारयेत्[1]।

उत्सवसामग्रीलक्षणम्

उत्सवोपयुक्तानां पादुकादीनां सामग्र्याः लक्षणं विमानार्चनाकल्पे[2] एव विशदं प्रोच्यते। तद्यथा -

पादुका

पादुका सुवर्ण-रजत-ताम्रेषु-अन्यतमेन निर्मातव्या। तस्याः आयामं त्रिमात्रादि सप्तमात्रान्तेषु अर्धाङ्गुलवृध्या त्रि त्रि भेदा भवेत्। तस्याः अग्रविपुलं तदर्धं, तन्मध्यं तत्पादहीनम्, उत्सेधं तन्मात्रम्, आयामं चतुर्धांशं, तत्त्रिभागात् द्विभागं खुरं, शेषांशम् ऊर्ध्वदलम्, उत्सेधम्, अङ्गुष्ठमात्रं, तलोच्चं चतुर्भागं, तच्छरांशयुगांशं नालं, शेषांशं पुष्पं समम् अङ्गुष्ठोत्सेधं भवेत्।

तरङ्गम्

तरङ्गं क्षौम -पट्ट-दुकूल-कार्पसेषु अन्यतमेन द्वादशहस्तायतैः समायुक्तं च भवेत्। पञ्च - द्वादश- नवसंख्याकेषु अन्यतमेन नवाम्बरैः संयुक्तम् आस्यरज्वा समायुक्तं, नानारूपान्वितं श्वेतं वा भवेत्।

स्तम्भवेष्टनम्

स्तम्भवेष्टनं स्तम्भायामसमं, विस्तारं तदर्धं क्षौमाद्यैः संयुक्तं भवेत्।

वितानम्

वितानं स्तम्भवेष्टनस्य पङ्क्त्यायाम विस्तारसमं नानारूपान्वितं च स्यात्।

ध्वजः

ध्वजस्य आयामं त्रि-पञ्च-सप्त-अष्ट-द्वादशकरेषु अन्यतमं विस्तारं, षट्पञ्चचतुः त्रितालेषु अन्यतमम्। श्वेत - पीत - श्याम - रक्ताभः भवेत्। तस्य शिखरस्य आयामं हस्तमात्रायतम्, हस्तायामैः द्वित्रिपाः संयुक्तम्। तिर्यक्वेत्र द्वयान्वितम्, घण्टा सहितं, यष्टिः तद्द्विगुणः भवेत्।

---

1. वि.पृ.359 2. पृ.178-92

पताका

पताका विंशत्यङ्गुलविस्तारा, त्रिंशदङ्गुल आयता। इयं क्षुद्रध्वजं चेत् पञ्चाङ्गुलविस्तारम्, आयतं द्वादशाङ्गुलं वेत्रद्वयसंयुक्तं शिखरे रज्जुसमायुक्तं च कुर्यात्।

छत्रम्

छत्रं चतुस्तालं समवृत्तं भवेत्। अधोमुखं वैणवेन तन्तुना बध्वा वस्त्रेणाच्छाद्य कल्कं च प्रलिप्य मुक्तादामयुतं सरत्नहेमसंछन्नं हेममकुटोपेतमुत्तमम्। ताम्र-पित्तल-मकुटोपेतं मध्यमम्। दारुमकुटोपेतम् अधमं भवेत्।

पिञ्छम्

पिञ्छं चतुस्तालविस्तारायामं, सुवृत्तं भवेत्। किञ्चित् ऊर्ध्वमुखं छत्रवस्त्रद्वयं च आसाद्य मयूरपिञ्छैः बाह्यम् आभ्यन्तरं, तत्समं च आच्छाद्य मकुटनालदण्डैःसहितं कुर्यात्।

अजिनछत्रम्

अजिनछत्रं षट्तालविस्तारं समवृत्तं भवति। अधोमुखं वैण्वेन तन्तुना बध्वा सङ्क्षेपं विस्तीर्णयोग्यं वस्त्रेण बन्धनं च कुर्यात्। ततः क्षौमाद्यैः आच्छाद्य परितः तालमात्रं लम्बनं मकुटयन्त्रनालदण्डैस्सह कुर्यात्।

वर्षछत्रम्

वर्षछत्रम् अष्टतालविस्तारायामं वृत्तं चतुरश्रं वा भवेत्। वैणवेन तन्तुना बध्वा वस्त्रेणाच्छाद्य मधूच्छिष्टेनालिप्य अथवा तालपत्रैर्वा आच्छाद्य नालं शुकनासिकां वा संयोज्य दण्डाग्रे कुर्यात्।

चामरदण्डः

चामरदण्डः हेम-रजत-ताम्र-दारुषु अन्यतमेन निर्मातव्यः। तस्य आयामं चतुर्विंशत्यङ्गुलं, नाहं पञ्चाङ्गुलं, नानापट्टिकाकुम्भसंयुक्तः नानामण्डनसंयुक्तश्च कुर्यात्। चमरीमृगस्य श्वेतवालैः संयुक्तो स्यात्।

मयूरव्यजनम्

मयूरव्यजनं चित्रविचित्रितं, मयूरपिञ्छैः सञ्छन्नं यथायोग्यं च भवेत्।

क्षौमादिव्यजनम्

क्षौमादिव्यजनस्य विस्तारायामं चतुर्विंशति - षोडश-द्वादश-अष्टाङ्गुलेषु अन्यतमं समवृत्तं भवेत्। वेणुना निर्मितं दण्डं क्षौमाद्यैः संयुक्तं स्यात्। तस्यायामं त्रिगुणं, नाहं यथार्हं, नानातन्तुभिः चित्रविचित्रितं दण्डाग्रे संयोज्य क्षौमादिव्यजनं निर्मातव्यम्।

शिबिका

शिबिकायाः कूटोत्सेधं विस्तारात् द्विगुणं, तत्र एकांशं पादायामं, शिखरमेकांशं भवेत्। सुवर्णेन बर्हिपिञ्छैः संयुक्ता शिबिका स्यात्।

रथः

रथस्य विस्तारायामं पञ्च-सप्त -नव -एकादश तालेषु अन्यतमम्, उत्सेधं तत्द्विगुणं, मण्टपाकारं कूटाकारं वा भवेत्। रथायामत्रिगुणम् आधारं, चक्रस्य आयामविस्तारम् उत्सेधार्धं समवृत्तं च। शिबिकालङ्कारवत् पूर्वे मुकुलं नालं च संयोज्य निर्मापयेत्। रथस्य उत्सेधं पञ्चधा कृत्वा अधिष्ठानं सार्धांशं, पादं द्व्यंशं, सार्धांशं शिखरं कारयेत्।

भेरी

भेरी शुभदारुभिः निर्मातव्या। तस्याः आयामं चतुस्तालं, पादोनद्विगुणं द्विगुणार्धं वा परीणाहं, मुखतारं द्वादश-त्रयोदश चतुर्दशाङ्गुलेषु अन्यतमं, सुवृत्तं भवेत्। बाहुल्यमर्धाङ्गुलं, मुखद्वये आयसपट्टेन बन्धनं च कृत्वा नव - सप्त वा कीलान् संयोज्य अग्रमूलं वामदक्षिणं च स्मृत्वा भेरी निर्मातव्या।

कर्त्रिकाफलकम्

कर्त्रिकाफलकस्य. आयामम् अष्टाङ्गुलं वर्तुलं च भवेत्। वर्तुले अर्धं त्यक्त्वा शेषं संगृह्य अर्धचन्द्राकारस्य मध्ये षडङ्गुलं सुवृत्तं भ्रमीकृत्य मध्ये विस्तारोत्सेधं भित्तियुतं गर्तं च कृत्वा पार्श्वयोः त्र्यङ्गुलविस्तृता द्व्यङ्गुलबाहुल्या पट्टिका पुष्पवल्लीयुता कारयेत्। गर्भभित्ति बाह्यं यवद्वयम् अग्रद्वये मकरास्यं पृष्ठे आयामं द्वादशाङ्गुलं, द्विवक्त्रा, परीणाहमष्टाङ्गुलं, अश्वपादवत् एकांघ्रिश्च कर्त्रिकाफलकं निर्मापयेत्।

उलूखलम्

उलूखलम् अर्जुनजम्ब्वाद्यैः दारुविशेषैः कुर्यात् । मानाङ्गुलेन चतुर्विंशत्यङ्गुलं भवेत् । आयामं षोडशाङ्गुलं, नाहं तत्त्रिगुणं, तस्य गर्तम् आयामार्धं पञ्चभागं त्रिभागं द्विभागं एकभागं वा कल्पयेत् । उत्सेधं पञ्चधा कृत्वा पादं द्विभागं, ओष्ठविस्तारं षट् पञ्च चतुरङ्गुलं वा शेषं गर्तं कुर्यात् ।

मुसलम्

खदिराद्यैः दारुविशेषैः मुसलं निर्मापयेत् । मात्राङ्गुलेन आयामम् अष्टनव दश तालेषु अन्यतमम् । परीणाहम् अवक्रं निर्व्रणं च द्वादशाङ्गुलं भवति । अधः प्रदेशे चतुरङ्गुलम् आयसपट्टम् अचलेन संयोजयेत् ।

दात्रम्

दात्रायामं षोडशाङ्गुलं, विस्तारं द्विमात्रम्, आस्यं यवबाहुल्यं सुतीक्ष्णेन दारुणा च कुर्यात् । मुष्टिः द्वादशाङ्गुलपरीणाहा अयःपट्टेन संयोज्य सुदृढं कुर्यात् ।

खनित्रम्

खनित्रस्य आयामं द्विपञ्चाङ्गुलम् एकवक्रं भवेत् । विस्तारं त्रिमात्रम्, आस्यमात्रं चतुरङ्गुलं पञ्चाङ्गुलं वा स्यात् । तस्य मूलं सुषिरं, विष्कम्भं त्र्यङ्गुलं दारुणा मुष्टिः चतुस्तालमानेन कुर्यात् ।

पेषणी

पेषणी शिलामयी भवेत् । तस्याः आयामं चतुर्विंशति, विंशति, षोडशाङ्गुलं भवति । विस्तारं तदर्धं त्रिपादं वा, उत्सेधं विस्तार अर्धसमं भवेत् । तं च सप्तधा कृत्वा पादं त्र्यंशं, चतुर्भागम् ऊर्ध्वपट्टिका स्यात् । ऊर्ध्वपेषण्याः आयामं विस्तारसमम् आयामात् पादाधिकं नाहं, षड्भागैका मुष्टिः पेषणी कुर्यात् ।

प्रायश्चितम्

प्रायः दोषसमुत्पत्तिः चित्तं तस्य निराकरणमिति प्रायश्चित्तशब्दस्य निर्वचनं वैखानसग्रन्थेषु[1] दृश्यते। दोषाणां निराकारणं पापस्य शोधनं च प्रायश्चित्तमिति शब्दकल्पद्रुमकारः[2]। ज्ञाताऽज्ञात भेदेन क्रियमाणेषु पापभेदेषु प्रायश्चित्तानि अनेकानि भवन्ति। अतिपातक - महापातक-उपपातकादीनां प्रायश्चित्तकर्माणि स्मृति ग्रन्थेष्विव आगमग्रन्थेष्वपि आलयनिर्माण - बिम्बप्रतिष्ठा-अर्चना - स्नपन - उत्सवादिषु सञ्जातानां दोषाणां निवृत्यर्थं प्रायश्चित्तकर्माणि विधीयन्ते। तानि विमानार्चनाकल्पापेक्षया यथा -

आलयनिर्माणप्रायश्चित्तम्[3] -

भूपरीक्षा -	प्रायश्चित्तम्
भूपरीक्षर्थगमनकाले विघ्ने संप्राप्ते	वैष्णवविघ्नमन्त्रैर्जपः
भूपरीक्षर्थगमनकाले दुर्दर्शने संप्राप्ते	सौरमन्त्रैर्जपः
भूपरीक्षर्थगमनकाले दुर्वाक्यश्रवणे	ब्राह्मसारस्वतमन्त्राणां ध्यानम्
भूपरीक्षर्थगमनकाले कलहरुधिरादिषु	वैष्णवसौम्यविष्वक्सेन सुदर्शन गरुडमन्त्रैर्होमः
भूपरीक्षायां पांसुक्षये प्राप्ते	मिन्दाहुति पूर्णाहुतिमन्त्रैर्होमः
भूकर्षण -	
भूकर्षणे वृषभस्य अङ्गहीने	रौद्र ब्राह्ममन्त्रैर्होमः
भूकर्षणे हलादीनाम् उक्तवृक्षालाभे प्रमाण हीने च	वैष्णव सौम्य आग्नेय प्राजापत्य मन्त्रैर्होमः
भूकर्षणे रज्जुभेदने	वरुणमन्त्रैर्होमः
भूकर्षणे सीताभेदने	श्रीदैवत्येन होमः
भूकर्षणे ऋषिभेदने	वायव्येन मन्त्रेण होमः

1. वि.पृ.388, क्रि.20,1-2, खि.37,60
2. पृ.430
3. वि.पृ.388-97

भूकर्षणे क्षिणिभेदने	वासवमन्त्रेण होमः
भूकर्षणे युगभेदने	शेषमन्त्रेण होमः
भूकर्षणे प्रतोदभेदने	याम्यमन्त्रेण होमः
भूकर्षणे क्रियायां कपालादीनां दर्शने	सौम्य आग्नेय वैष्णवमन्त्रैर्होमः
भूकर्षणे क्रियायां विष्वक्सेनादीना मर्चनेहीने	वैष्णव तद्दैवत्यैर्होमः
भूकर्षण क्रियायां बीजावापन हीने	वैष्णव सौम्यवायव्यमन्त्रैर्होमः
भूकर्षण क्रियायां गोगण निवेदन हीने	वैष्णवविष्वक्सेन गरुड सुदर्शन मन्त्राणां दशपर्यायैर्होमः
भूकर्षण क्रियायां पददेवता बलौ हीने विरपीते वा	पददेवतामन्त्रपूर्वक वैष्णवब्राह्म वासवयाम्यादिमन्त्रैर्होमः
भूकर्षण क्रियायां ब्रह्मपद्मावटक्रियाहीने	वैष्णवब्राह्मवरुणमहीमन्त्रैर्होमः

विमाननिर्माण –

विमानानिर्माणे भूखनने शल्यादीनां दर्शने	वैष्णव ब्राह्मपञ्चभूदैवत्यमन्त्रैर्होमः
आद्येष्टकान्यासे आद्येष्टकाप्रमाणहीने	वैष्णव विष्णुसूक्तमन्त्रैर्होमः
आद्येष्टकान्यासे आद्येष्टका अग्रविपर्यासे	दिग्दैवत्यवैष्णवमन्त्रैर्होमः
आद्येष्टकान्यासे आद्येष्टका रत्नन्यासहीने	रत्नेशमन्त्रविष्णुसूक्तमन्त्रैर्होमः
आद्येष्टकान्यासे आद्येष्टका गर्भन्यासहीने	वैष्णवविष्णुसूक्तश्री भूदैवत्य मन्त्रैर्होमः
आद्येष्टकान्यासे आद्येष्टका गर्भभाजने प्रमाणहीने	सौरसौम्य आग्नेयमन्त्रैर्होमः
आद्येष्टकान्यासे आद्येष्टका द्रव्याणां स्थानाविपर्यासे	वैष्णव स्थानाधिदैवत्यमन्त्रैर्होमः
आद्येष्टकान्यासे अनुक्तेदेशे स्थापने	वैष्णवविष्णुसूक्तपुरुषसूक्त श्री भूदैवत्यमन्त्रैर्होमः

अन्त्येष्टकान्यासे अन्त्येष्टकाप्रमाणहीने	यथा आद्येष्टका प्रायश्चित्तम्
स्थूपिकीले प्रमाणहीने	वैष्णवसौम्य आग्नेयभूदैवत्यमन्त्रैर्होमः
विमाने सुधावर्णानुलेपन हीने	वैष्णवविष्णुसूक्त पुरुषसूक्त श्री भूदैवत्यमन्त्रैर्होमः
आलयस्य कवाटहीने	धात्रादिदैवत्य वैष्णव श्री भूदैवत्य मन्त्रैर्होमः
द्वारस्तम्भकवाटादिषु प्रमाणहीने	वैष्णव सौम्य आग्नेयमन्त्रैर्होमः

मण्डपनिर्माण –

आलये स्नपनादीनां मण्डपानां अग्निदाहे	पारमात्मिक हींकारविच्छिन्न मिन्दाहुति आग्नेयमन्त्रैर्होमः
शिलादीनां ग्रहणकाले उक्त क्रियाहीने	वैष्णवविष्णुसूक्त मिन्दाहुति विच्छिन्नमन्त्रैर्होमः

बिम्बनिर्माणप्रायश्चित्तम्[1]

ध्रुवबिम्बनिर्माणार्थशूलस्थापनविपर्यासे	ब्राह्मरौद्र वैष्णवमन्त्रैर्होमः
ध्रुवबिम्बनिर्माणार्थशूलानां प्रमाणहीने	वैष्णव पुरुषसूक्त अङ्गमन्त्रैर्होमः
ध्रुवबिम्बनिर्माणार्थ मधूच्छिष्टक्रिया विना कौतुकबेरं निर्मापिते	वैष्णव ब्राह्मरौद्रसौराग्नेयमन्त्रैर्होमः

बिम्बस्थापन प्रायश्चित्तम्

बिम्बस्थापनकर्मणि रज्जुबन्धनादीनां क्रमहीने	वैष्णव ब्राह्मरौद्र आग्नेयमहाभूत प्राजापत्य मन्त्रैर्होमः
बिम्बस्थापनकर्मणि बेरेअनुक्तवर्णानुलेपे	वैष्णवविष्णुसूक्त जयादीनांमन्त्रैः होमः

1. वि.पृ.398-401

बिम्बस्थापनकर्मणि जलाधिवासात्पूर्वं ध्रुवबेरस्स्यङ्गहानौ	वैष्णवविष्णुसूक्त पुरुषसूक्त श्री भूदैवत्य अङ्गमन्त्रैर्होमः
बिम्बस्थापनकर्मणि जलाधि-वासात्पश्चात् देवीयुक्तस्य देवस्य अङ्गहानिः प्राप्ते	वैष्णव विष्णुसूक्त पुरुषसूक्त श्रीसूक्तमहीसूक्त ब्राह्मरौद्र मुनिनां मन्त्रैर्होमः
बिम्बस्थापनकर्मणि मासादूर्ध्वं संस्कारहीने	वैष्णवविष्णुसूक्त पुरुषसूक्त श्रीभूदैवत्य ब्राह्म रौद्र परिषद् मन्त्रैर्होमः
बिम्बस्थापन कर्मणि अनुक्तकर्मणि	वैष्णवविष्णुसूक्त पुरुषसूक्त श्रीभूदैवत्यमन्त्रैर्होमः

बिम्बप्रतिष्ठा प्रायश्चित्तम्[1]

बिम्बप्रतिष्ठायाम् अङ्कुरार्पण कर्मणि ब्रह्मसोमादीनामर्चने हीने	तद्दैवत्यवैष्णवमन्त्रैर्होमः
बिम्बप्रतिष्ठायाम् अङ्कुरार्पणहीने	वैष्णवविष्णुसूक्त पुरुषसूक्त ब्राह्मसौम्यमन्त्रैर्होमः
बिम्बप्रतिष्ठायाम् अक्षिमोचनकर्मणि पीठसङ्घाते रत्नादिनामलाभे	वैष्णवविष्णुसूक्त पुरुषसूक्त ब्राह्म सौम्यमन्त्रैर्होमः
बिम्बप्रतिष्ठायाम् अक्षिमोचनकर्मणि गवादिद्रव्यहीने	गोदानसूक्त द्रव्याधिपदैवत्य वैष्णवमन्त्रैर्होमः
बिम्बप्रतिष्ठायाम् अक्षिमोचनहीने	वैष्णवविष्णुसूक्तग्रहदैवत्यैर्होमः
बिम्बप्रतिष्ठायाम् अधिवासहीने	वैष्णवार्षविष्णुसूक्तमन्त्रैर्होमः
बिम्बप्रतिष्ठायां यागशालायां महावेद्यां प्रमाणहीने	तद्देशाधिपदैवत्यवैष्णव विष्णुसूक्त श्रीभूदैवत्यमन्त्रैर्होमः
बिम्बप्रतिष्ठायां बेरशुद्धिविहीने	वैष्णवविष्णुसूक्त पुरुषसूक्तरुद्र आर्ष वरुणमन्त्रैर्होमः

1. वि.पृ.401-8

अग्निकुण्डानां प्रमाणहीने	ब्राह्मसौम्य आग्नेयमन्त्रैर्होमः
बिम्बप्रतिष्ठायां परिस्तरणकूर्चादीनां प्रमाणहीने	मिन्दाहुति सावित्री मन्त्रैर्होमः
बिम्बप्रतिष्ठायाम् आज्यस्थाल्यां चरु मक्षिकादीनां पतने	प्राजापत्य आग्नेयवैष्णवमन्त्रैर्होमः
बिम्बप्रतिष्ठायाम् आघारकर्माणि अग्नौअनुगते	विच्छिन्नमिन्दाहुति वैष्णवव्याहृति मन्त्रैर्होमः
परिस्तरणादिसम्भाराणां भेदने	आग्नेयमिन्दाहुति वैष्णवमन्त्रैर्होमः
बिम्बप्रतिष्ठायां क्रियाणां विपर्यासे	वैष्णवव्याहृति मन्त्रैर्होमः
बिम्बप्रतिष्ठायां वस्त्रे लक्षणहीने	श्रीदैवत्यवैष्णवमन्त्रैर्होमः
बिम्बप्रतिष्ठायां अण्डजादीनामलाभे	वैष्णव श्रीभूदैवत्य मन्त्रैर्होमः
बिम्बप्रतिष्ठायां तोरणेषु प्रमाणहीने	द्वाराधिपदैवत्यमन्त्रैर्होमः
बिम्बप्रतिष्ठायां दर्भमालाप्रमाणहीने	आर्ष वैष्णवमन्त्रैर्होमः
बिम्बप्रतिष्ठायां कुम्भे वस्त्रवर्णचिह्नादीनां प्रमाणहीने	वैष्णवविष्णुसूक्त पुरुषसूक्त ब्राह्म मुनि आग्नेयमन्त्रैर्होमः
बिम्बप्रतिष्ठायां श्वकुक्कुटादिभिः कुम्भस्पर्शने	वैष्णवविष्णुसूक्तपुरुषसूक्त ब्राह्मसौर आग्नेयमन्त्रैर्होमः
बिम्बप्रतिष्ठायां कुम्भभेदने	वैष्णवविष्णुसूक्तपुरुषसूक्त ब्राह्म ऐन्द्र आग्नेय आर्षमन्त्रैर्होमः
बिम्बप्रतिष्ठायां श्वकुक्कटादिभिः होमकुण्डस्पर्शने	आग्नेय वैष्णव वारुण मूलहोमादीनां मन्त्रैर्होमः
बिम्बप्रतिष्ठायां स्रुवादीनामलाभे	वैष्णव ब्राह्मसौम्य आग्नेय आदित्यमन्त्रैर्होमः
बिम्बप्रतिष्ठायां मासातीत दर्भादीनां ग्रहणे	वारुण वैष्णव ब्राह्म सौम्य आग्नेय आदित्यमन्त्रैर्होमः
बिम्बप्रतिष्ठायाम् अजादीनां दध्यादिग्रहणे	वैष्णव ब्राह्म आग्नेय सौर व्याहृति मन्त्रैर्होमः

अशुभस्थानात् मृदादीनां ग्रहणे	वारुण वैष्णवमन्त्रैर्होमः
बिम्बप्रतिष्ठायां दुर्गन्धादीनामिन्धनग्रहणे	आग्नेयवैष्णवव्याहृतिमन्त्रैर्होमः
बिम्बप्रतिष्ठायां वस्त्रादीनामग्निस्पर्शने	ब्राह्मवैष्णव सौर आग्नेयमन्त्रैर्होमः
बिम्बप्रतिष्ठायां कौतुकदिबेराणां न्यास विपर्यासे	वैष्णव पङ्क्तीश मन्त्रैर्होमः
बिम्बप्रतिष्ठायां स्नपनकाले बेरविपर्यासे	पञ्चवारुण वैष्णवमन्त्रैर्होमः
बिम्बप्रतिष्ठायां हौत्रप्रशंसनहीने	ब्राह्ममुनीन्द्रमन्त्रैर्होमः
बिम्बप्रतिष्ठायां परिषद्देवानाम् आवहनादीनां हीने	वैष्णवविष्णुसूक्त ब्राह्मरौद्रमन्त्रैर्होमः
शयनबिम्बानाम् उत्थापनेकृते	श्री भूमन्त्रैर्होमः
बिम्बप्रतिष्ठायाम् अध्ययनहीने	सारस्वतमन्त्रैर्होमः
बिम्बप्रतिष्ठायाम् आचार्यस्थापकादीनां भर्त्सनादौ	वैष्णवविष्णुसूक्त पुरुषसूक्त ब्राह्म सारस्वतमन्त्रैर्होमः
आचार्यदक्षिणे कालातीते	वैष्णव मुनिमन्त्रैर्होमः
बिम्बप्रतिष्ठायां कौतुकादीनामलाभे	वैष्णव विष्णुसूक्त पुरुषसूक्त वायव्यदिग्दैवत्यमन्त्रैर्होमः
बिम्बप्रतिष्ठायां सभ्याग्नौ शेषहोमविहीने	वैष्णव आग्नेयमन्त्रैर्होमः
कुम्भजलेन कौतुकादीनाम् आवाहने	वैष्णव विष्णुसूक्त पुरुषसूक्त मन्त्रैर्होमः ध्रुवबेरादावाहनम्

नित्यार्चनप्रायश्चित्तम्

नित्यार्चन कर्मणि कवाटोद्धाटनादारभ्य बलिपर्यन्तकर्मसु सञ्जातानां दोषाणां प्रायश्चित्तानि विमानार्चनाकल्पे दृश्यन्ते। तानि यथा[1]-

नित्यार्चनायां कालातिक्रमणे कवाटोद्धाटने	वैष्णव धात्रादिदैवत्यदौवारिक मन्त्रैर्होमः

1. वि.पृ.408-15

नित्यार्चनायां मार्जनादीनां हीने	वैष्णववारुणवायव्यविष्वक्सेन मन्त्रैर्होमः
नित्यार्चनायां पुष्पन्यासहीने	वैष्णवविष्णुसूक्तपुरुषसूक्त विष्णुगायत्रीमन्त्रैर्होमः
नित्यार्चनायां संबन्धकूर्चनहीने	वैष्णवमुनिमन्त्रैर्होमः
नित्यार्चनायां धात्रादीनामर्चने हीने	तत्तद्दैवत्यवैष्णव मन्त्रैर्होमः
नित्यार्चनायां आसनाद्युपचारहीने	प्रणामपूर्वकार्चनम्
नित्यार्चनायां अजस्रदीपे विच्छिन्ने	द्विगुणतया दीपोद्दीपनं सैररौद्र आग्नेय वैष्णव मन्त्रैर्होमः
नित्यार्चनायां प्रच्छन्नपटे विहीने	प्राजापत्यवैष्णव मन्त्रैर्होमः
नित्यार्चनायां वेददूषकादीनां दर्शने	वैष्णव ब्राह्मरौद्राग्नेयव्याहृति मन्त्रैर्होमः
नित्यार्चनायां एककाले अर्चनाहीने	द्वितीयदिने द्विगुणमर्चनम्
नित्यार्चनायाम् एकाहमर्चने हीने	वैष्णव विष्णुसूक्त पुरुषसूक्त श्री भूदैवत्य मन्त्रैर्होमः
नित्यार्चनायां द्वादशदिनार्चने हीने	वैष्णवविष्णुसूक्तपुरुषसूक्त परिषत् देवतामन्त्रैर्होमः
नित्यार्चनायां त्रिंशद्दिनार्चनहीने	वैष्णवविष्णुसूक्तपुरुषसूक्त श्रीभूदैवत्य सर्वदैवत्यमन्त्रैर्होमः
नित्यार्चनायां संवत्सरार्चने हीने	सप्ताहदिनात्मका महाशान्तिः
नित्यार्चनायाम् एककाले हविर्निवेदनेहीने	द्वितीये द्विगुणं निवेदनम्
नित्यार्चनायाम् एकदिनपर्यन्तं हविः निवेदनहीने	वैष्णव श्री भूदैवत्य मूर्तिमन्त्रैर्होमः हविर्निवेदनं
नित्यार्चनायाम् अपक्वादीनां हविः निवेदने	वैष्णव श्री भूदैवत्य आग्नेय वारुण वायव्य मन्त्रैर्होमः हविर्निवेदनं
नित्यार्चनायाम् अशुचीनां संस्पृष्ट हविर्निवेदने	वैष्णव विष्णुगायत्रीमन्त्रैर्होमः शान्तिहोमः हविर्निवेदनं च

नित्यार्चनायां अङ्गारादियुतहविः निवेदने	अष्टाक्षरविष्णुगायत्री वैष्णव मन्त्रैः स्तुतिः प्रणामम्
नित्यार्चनायां मक्षिकादिसंयुक्त हविर्निवेदने	वैष्णवविष्णुसूक्तश्रीभू दैवत्यमन्त्रैर्होमः द्विगुणं च निवेदनं
नित्यार्चनायां जन्तुसंस्पर्शन ताम्बूलनिवेदने	वैष्णव श्री भूदैवत्यमन्त्रैर्होमः ताम्बूलनिवेदनम्
नित्यार्चनायां नित्यहोमेहीने	वैष्णवमन्त्रैर्होमः होमद्विगुणं
नित्यार्चनायां प्रातःकाले बलि भ्रमणहीने	वैष्णव सौर सौम्य प्राजापत्य मन्त्रैर्होमः
नित्यार्चनायां बलिभ्रमणे आलय प्रदक्षिण हीने	वैष्णव गरुडमन्त्रैर्होमः बलिभ्रमणं च
नित्यार्चनायां प्रातर्बलिहीने	मध्याह्ने द्विगुणं
नित्यार्चनायां मध्याह्ने बलिहीने	सायाह्ने त्रिगुणं
नित्यार्चनायां एकदिन बलिहीने	वैष्णवविष्णुसूक्त पुरुषसूक्त दिग्दैवत्य मन्त्रैर्होमः प्रदक्षिणं च
नित्यार्चनायाम् अलङ्कारहीने	श्रीदैवत्यमन्त्रैर्होमः
नित्यार्चनायां छत्रपिञ्छादीनां हीने	वारुणमन्त्रैर्होमः
नित्यार्चनायां चामरादीनां हीने	वायव्यमन्त्रैर्होमः
नित्यार्चनायां दीपालाभे	आग्नेय वैष्णव व्याहृतिमन्त्रैर्होमः
नित्यार्चनायाम् अन्नबलिः भूमौ पतिते	बलिपूर्वकवैष्णव गरुड प्राजापत्य मन्त्रैर्होमः
नित्यार्चनायां बल्युद्धरण काले विघ्नप्राप्तौ	सौर सौम्य वैष्णवमन्त्रैर्होमः
नित्यार्चनायां अन्नबलौ प्रमाणहीने	वैष्णवप्राजापत्य मन्त्रैर्होमः

स्नपनप्रायश्चित्तम्[1]

नित्यस्नपनहीने	वैष्णवविष्णुसूक्त पुरुषसूक्तवारुण मन्त्रैर्होमः स्नपनं च
ग्रहणकाले स्नपनहीने	प्रायश्चित्तहोमः स्नपनं च
स्नपनकर्मणि प्रतिसरबन्धनहीने शयनकर्महीने च	वैष्णवश्रीभूदैवत्य सुदर्शन मन्त्रैर्होमः शयनाधिवासहीन प्रतिसरबन्धनं च
अङ्कुरार्पणानन्तरं स्नपने हीने	वैष्णवसौम्य श्रीभूदैवत्य विघ्नमन्त्रैर्होमः
स्नपनकर्मणि श्वभ्रादिप्रमाणहीने प्रमाणाधिके च	वैष्णव भूदैवत्य पङ्क्तीशमन्त्रैर्होमः
स्नपनकर्मणि विष्वक्सेनाद्यर्चने हीने	वैष्णव विष्वक्सेन मन्त्रैर्होमः
स्नपनकर्मणि पङ्क्तीशस्य अर्चने हीने	पङ्क्तीशजयादीनां मन्त्रैर्होमः
स्नपनकर्मणि इन्द्रादीनामर्चनाकरणे	इन्द्रादीनां मन्त्रैः वैष्णवमन्त्रैश्च होमः
स्नपनकर्मणि कलशप्रमाणहीने प्रमाणाधिके च	वैष्णववायव्य आग्नेयमन्त्रैर्होमः
स्नपनकर्मणि मृदः हीने	वैष्णवमहीदैवत्य मन्त्रैर्होमः
स्नपनकर्मणि पर्वतेषु प्रमाणहीने	वैष्णव आग्नेयमन्त्रैर्होमः
स्नपनकर्मणि धान्यहीने	वैष्णववायव्यमन्त्रैर्होमः
स्नपनकर्मणि अङ्कुरहीने	वैष्णवगरुडव्याहृति मन्त्रैर्होमः
स्नपनकर्मणि अष्टमङ्गलेषु तत्तत् वर्णहीने प्रमाणहीने च	वैष्णव इन्द्रमन्त्रैर्होमः
स्नपनकर्मणि पञ्चगव्यादि द्वादशद्रव्येषु उक्तप्रमाण हीने	अधिदेवता मन्त्रैः वैष्णव मन्त्रैश्च होमः

1. वि.पृ.416-9

स्नपनकर्मणि साधिते कलशे भिन्ने	वैष्णवमन्त्रैर्होमः
स्नपनकर्मणि स्नपनद्रव्यविपर्यासे	वैष्णवद्रव्याधिपदैवत्यमन्त्रैर्होमः
स्नपनकर्मणि कलशानामस्पृश्यस्पर्शने	शान्तिमन्त्रैः वैष्णवमन्त्रैश्च होमः
स्नपनकर्मणि द्रव्येषु क्रिमिकीटादिपतने	वैष्णवमन्त्रैः द्रव्याधिपमन्त्रैश्चहोमः
स्नपनकर्मणि रत्नानामलाभे	वैष्णवमन्त्रैर्होमः
स्नपनकर्मणि द्वादशवस्त्रालाभे	वैष्णव श्रीदैवत्यमन्त्रैर्होमः

उत्सवप्रायश्चित्तम्[1]

उत्सवकर्मणि अवभृथसंख्याक्रम विपर्यासे	उत्सवतिथिवारनक्षत्रदैवत्य मन्त्रैर्होमः
उत्सवकर्मणि ध्वजारोहणे गरुड प्रतिष्ठाहीने	वैष्णवविष्णुसूक्त पुरुषसूक्त ध्वज गरुडमन्त्रैर्होमः प्रतिष्ठा च
उत्सवकर्मणि ध्वजदेवादीनामर्चने हीने	वैष्णवतत्तद्दैवत्यमन्त्रैर्होमः
उत्सवकर्मणि भेरीताडने हीने	रौद्रव्याहृतिमहाव्याहृतिमन्त्रैर्होमः
उत्सवकर्मणि ध्वजारोहणानन्तरं गरुड निवेदनाकरणे	वैष्णवध्वजगरुडमन्त्रैर्होमः
उत्सवकर्मणि गरुडस्य मुद्गान्न-निवेदनाकरणे	वैष्णवध्वजगरुडमन्त्रैर्होमः
उत्सवकर्मणि ध्वजदण्डे चोराद्यपहृते अग्निदग्धे अशनिनोत्पाटिते च	वैष्णववायव्य आग्नेय ह्रींकार गारुडध्वजमन्त्रैर्होमः
उत्सवकर्मणि ध्वजगरुडे पतिते	ब्राह्मप्राजापत्य सौर सौम्य आग्नेय व्याहृतिमन्त्रैर्होमः
उत्सवकर्मणि कालोत्सवे भ्रंशे	वैष्णव विष्णुसूक्त पुरुषसूक्त ध्वज गरुडमन्त्रैर्होमः
उत्सवकर्मणिउत्सवादौ स्नपनहीने	वैष्णवविष्णुसूक्त पुरषसूक्त वारुण मन्त्रैर्होमः

1. वि.पृ.419-27

उत्सवकर्मणि प्रतिसरबन्धने हीने	वैष्णव विष्वक्सेनसुदर्शनमन्त्रैर्होमः
उत्सवकर्मणि कुम्भवेद्यां प्रमाणहीने अधिके च	वैष्णवाग्नेय भूदैवत्यमन्त्रैर्होमः
उत्सवकर्मणि तोरणानामलाभे	दौवारिकमन्त्रैर्होमः
उत्सवकर्मणि दर्भमालाहीने	आर्षमन्त्रेण होमः
उत्सवकर्मणि अलङ्कारहीने	श्री दैवत्यमन्त्रैर्होमः
उत्सवकर्मणि प्रातः काले वलिंनिर्वाप्य उत्सवे हीने	वैष्णवविष्वक्सेन गरुड उत्सवाधि दैवत्य मन्त्रैर्होमः
उत्सवकर्मणि वलिप्रादानहीने	वैष्णववलिरक्षक मन्त्रैर्होमः
उत्सवकर्मणि वलिद्रव्ये पात्रे वा भूमौ पतिते	प्रायश्चित्तपूर्वक वलिप्रदानम्
उत्सवकर्मणि अनुक्तस्थाने वलि शेषं प्रक्षिप्ते	वैष्णव अक्षहन्तृ विष्वक्सेन गरुड सुदर्शनमन्त्रैर्होमः
उत्सवकर्मणि देवस्य द्विगुणार्चने हविर्निवेदने च हीने	वैष्णव शान्तिमन्त्रैर्होमः द्विगुणार्चनं हविर्निवेदनं च
उत्सवकर्मणि यथोक्तहोमे विहीने	वैष्णवविष्णुसूक्तपुरुषसूक्तमन्त्रैर्होमः
उत्सवकर्मणि चक्रादीनामर्चने हीने	वैष्णव विष्णुसूक्त पुरुषसूक्त विष्वक्सेन गरुडसुदर्शन मन्त्रैर्होमः
उत्सवकर्मणि नृत्तगेये च हीने	वैष्णवरौद्र मन्त्रैर्होमः
उत्सवकर्मणि स्तोत्रे हीने	ब्राह्मसारस्वत मन्त्रैर्होमः
उत्सवकर्मणि छत्रे पिच्छादौ हीने	वैष्णवबलिरक्षक मन्त्रैर्होमः
उत्सवकर्मणि देवेशः यानात्पतिते	वैष्णवविष्णुसूक्त पुरुषसूक्त दिनाधिप दैवत्यमन्त्रैर्होमः
उत्सवकर्मणि अन्नबलिः अर्घ्यबलिः च भूमौ पतिते	वैष्णवबलिरक्षक दैवत्यमन्त्रैर्होमः

उत्सवकर्मणि यानात्पतिते बेरे हीनाङ्गे	महाशान्तिहोमपूर्वक शक्तिसमारोपणं
उत्सवकर्मणि गायकादीनां पतने	श्रीदैवत्य वैष्णवमन्त्रैर्होमः
उत्सवकर्मणि आचार्यादीनां पतने संक्षोभे च	आर्ष वैष्णवमन्त्रैर्होमः
उत्सवकर्मणि ध्वजादीनां पतने	ध्वजवारुण वायव्यमन्त्रैर्होमः
उत्सवकर्मणि देवेशस्य वर्षधारादीनां मध्ये उत्सवे कृते	वैष्णव विष्णुसूक्त पुरुषसूक्त श्री भूदैवत्यमन्त्रैर्होमः
उत्सव कर्मणि उत्सवे देवेशः वर्ष धारादीनां स्पर्शने	वैष्णवदिग्दैवत्य वारुण वायव्य यद्देवादीनां मन्त्रैर्होमः
उत्सवकर्मणि उत्सवकाले कलह रुधिरादीनां दर्शने	वैष्णव आग्नेय ब्राह्म रौद्र दिनाधिपदैवत्य मन्त्रैर्होमः
उत्सवकर्मणि आलयाभ्यन्तरे शस्त्राद्यैर्मरणे	महाशान्तिपूर्वकदिनाधिप दैवत्यमन्त्रैर्होमः
उत्सवकर्मणि आलये अशीति दण्डाभ्यन्तरे मरणे	महाशान्तिपूर्वक पार्षदमन्त्रैर्होमः
उत्सवकर्मणि आरोहणाद्यवरोहणान्ते देवतान्तरोत्सवादिकरणे	वैष्णवविष्णुसूक्त पुरुषसूक्त पार्षदमन्त्रैर्होमः
उत्सवकर्मणि तीर्थदिनात्पूर्वरात्रौ प्रतिसरबन्धनं शयनं च हीने	वैष्णव श्री भूदैवत्य सुदर्शन मन्त्रैर्होमः
उत्सवकर्मणि तीर्थस्नानकाले कालातीते हीने वा	वैष्णववारुणस्कन्ददैवत्यमन्त्रैर्होमः
उत्सवकर्मणि तीर्थदिवसस्य रात्रौ ध्वजावरोहणहीने	ध्वजगरुड वैष्णवमन्त्रैर्होमः
उत्सवकर्मणि अवरोहणे बलिहीने	वैष्णव अलयपरिषत् दैवत्य मन्त्रैर्होमः
उत्सवकर्मणि उत्सवान्तस्नपनहीने	वैष्णव विष्णुसूक्त पुरुषसूक्त जयादिमूर्ति मन्त्रैर्होमः

उत्सवकर्मणि अनुक्ते दोषे — वैष्णवविष्णुसूक्त पुरुषसूक्त विष्णुगायत्री मन्त्रैर्होमः

अस्पृश्यस्पर्शादीनां कर्मणां दोषनिवृत्यर्थं एतानि प्रायश्चित्तानि च कर्माणि विमानार्चनाकल्पे[1] एव सुस्पष्टं दृश्यन्ते।

ग्रहविकार - ग्रहयुद्ध - अनावृष्टि -नक्षत्रभेद - अन्तरिक्षविकार - देश कालस्वभावादीनां विरुद्धकर्मणां दोषनिवृत्यर्थं शान्तिपञ्चकम् आगमग्रन्थेषु विधीयते। तद्यथा -

शान्तिपञ्चकम्

अद्भुतशान्ति - प्रभूतशान्ति - महाशान्ति - शान्ति - शुद्धिरिति शान्तयः पञ्चधा भवन्तीति विमानार्चनाकल्पे[2] प्रकीर्णाधिकारे[3] च उच्यते तेषु -

अद्भुतशान्तिः

देवालयाभिमुखे उत्तरे ऐशान्यां पर्वताग्रे तटाकतीरे षोडशस्तम्भसंयुक्तं मण्डपं, कूटं, प्रपां वा निर्माय तन्मध्ये श्रामणकाग्निकुण्डं द्विहस्तायतविस्तारं हस्तमात्रसमुत्सेधं स्थण्डिलं च प्रथमतः प्रकल्पयेत्।

प्रागादिचतस्रुषु दिक्षु आहवनीयाद्यग्निकुण्डान् विदिक्षु औपसनाग्निकुण्डान् प्रकल्प्य तन्मध्ये धान्यराशौ सुवर्ण-रजत-ताम्र-मृण्मयेषु अन्यतमं कुम्भं संगृह्य तं यवान्तरं तन्तुना परिवेष्ट्य तस्मिन् अष्टमङ्गलानि पञ्चायुधानि, रत्नादिविकाराणि ग्रहरूपाणि च निक्षिप्य आचार्य ऋत्विजः होमः कार्यः इति निर्दिश्यते।

आचार्यः अग्निकुण्डेषु नवानां ग्रहाणाम् अधिदैवत्यक्रमेण हुत्वा अन्ते कुम्भजलेन राजानमभिषेचयेत्। इत्थम् अद्भुतशान्तिः विमानार्चनाकल्पे[4] प्रकीर्णाधिकारे[5] दृश्यते।

प्रभूतशान्तिः

अद्भुतशान्त्युक्तप्रकारेण होमं हुत्वा देवम् अष्टोत्तरशत अष्टचत्वारिंशत् वा कलशैः अभिषिच्य निवेदनादिकं कुर्यात्। अयमेव प्रभूतशान्तिः[6]।

---

1. पृ.427-35
2. पृ.461
3. 29,138
4. पृ.431-3
5. 29,139-201
6. वि.पृ.466

महाशान्तिः

कुम्भं विना श्रामणकाग्नौ होमः स्नपनं चेत् महाशान्तिः[1]।

शान्तिः

औपासनाग्नौ होमः ब्राह्मणभोजनञ्च शान्तिरितिकथ्यते।

शुद्धिः

वास्तुहोमपूर्वक विशेषहोमः शुद्धिरित्युच्यते।

शान्तिपञ्चकमिदं क्रियाधिकारे[2] महाशान्ति- अतिशान्ति- अद्भुतशान्ति- सामान्यशान्ति - उत्पातशान्ति - शान्तिरिति षड्विधा प्रकारान्तरेण प्रतिपाद्यते।

अथ सर्वयज्ञप्रदः सर्वदोषोपशमनः सर्वतुष्टिकरः सर्वकामप्रदः सर्वलोकशान्तिदः मन्त्रक्रियाद्रव्यहीनदोषनिवृतिरूपः पवित्रोत्सवः वैखानसागमे[3] विधीयते।

पवित्रोत्सवः

संवत्सरार्चने ज्ञानाज्ञानयोः सञ्जनितानां अस्पृश्यस्पर्शादिदोषाणां निवारणार्थं भगवतः वैखानसागमरीत्या पवित्रोत्सवः करणीयः। अस्मिन् पवित्रोत्सवकर्मणि पवित्रोत्सवकालः पवित्रोत्सवप्रकारः विधीयते। तत्र

पवित्रोत्सवकालः

पवित्रोत्सवस्य कालः वैखानसग्रन्थेषु नैकरूपतया दृश्यते। यथा -

मासेषु आषाढ-श्रावण-भाद्रपदेषु अन्यतमः मासः। तिथिषु शुक्लद्वादशी, विष्णुपञ्चकदिनेषु अन्यतमः इति विमानार्चनाकल्पे[4] प्रकीर्णाधिकारे[5] च उच्यते। क्रियाधिकारे[6] तु मार्गशीर्षमासः शुक्लपक्षः, कृष्णद्वादशी इति, नक्षत्रेषु श्रवणं, विष्णु पञ्चकदिनेषु अन्यतमः इति निर्दिश्यते।

---

1. वि.पृ.466
2. 29,1-20
3. वि.पृ.429, क्रि.31,23, प्र32,35-7
4. पृ.469
5. 32,39-40
6. 31,24-5

संसर्पः अधिमासः तिथिवारनक्षत्रशून्यं दशमी, एकादशी निमित्तदिनं च पवित्रोत्सवस्य अयोग्यः काल इति[1]।

पवित्रोत्सवः नवाहं सप्ताहं पञ्चाहं त्र्यहम् एकाहं वा कुर्यात्[2]।

पवित्रोत्सवप्रकारः

आलयस्याग्रे मण्डपं प्रपां वा प्रथमतः निर्माय तत्र यागशालां परिकल्प्य तामलङ्कृत्य अग्निकुण्डं निर्मापयेत्।

पद्म-क्षौम-सुवर्ण-सूत्राणि पवित्राणि उत्तमानीति रौप्यानि मध्यमानीति कार्पासानि अधमानि इति च पवित्राणाम् उपादानद्रव्यं निर्दिश्यते।

निर्मितानि अष्टोत्तरशतसंख्याकानिपवित्राणि देवेशस्य कण्ठादारभ्य जान्वन्तं समर्पितमुत्तमं भवति। चतुःपञ्चाशत् संख्याकानि पवित्राणि ऊर्वन्तं समर्पितं मध्यमं स्यात्। सप्तविंशतिसंख्याकानि पवित्राणि नाभ्यन्तम् अधमं भवेत्।

आचार्यऋत्विजः अग्निप्रतिष्ठापनपूर्वकं पवित्राणाम् अधिवासनं हौत्रादि होमः पवित्रसमर्पणम् अग्निविसर्जनं च कुर्यात्[3]। विशेषतः प्रकीर्णाधिकारे[4] तु कुम्भजलेन साकं देवस्य प्रोक्षणम् अधिकतया उच्यते।

अनुष्ठानप्रशंसा

सर्वे वैदिकाचाराः तपोयज्ञाश्च विष्णुपूजाङ्गतया वैखानसाः मन्यन्ते। ऊर्ध्वपुण्ड्रादारभ्य यान्यनुष्ठानकर्माणि सन्ति, तानि विधिना अनुष्ठेयानि भवन्ति। तत्र ऊर्ध्वपुण्ड्रधारणस्य आवश्यकता, पवित्राणां प्राधान्यता, ब्रह्मस्नानं मन्त्राणां ऋष्यादिकथनं प्रणवस्वरूपं, सावित्र्याः स्वरूपं च स्पष्टतया विमानार्चनाकल्पे[5] दृश्यते।

---

1. वि.पृ.470
2. वि.पृ.475, प्र.32,42
3. वि.पृ.470-5
4. 32,107
5. पृ.480-91

ज्ञानभागः

भगवदालये क्रियामाणाः क्रियाकलापाः ब्रह्मज्ञानसापेक्षाः। तदवगमनवर्णनपरो भागः ज्ञानभागइति व्यपदिश्यते। मोक्षविषयिका बुद्धिः ज्ञानमित्युच्यते[1]। तत्त्वावगमनं ज्ञानमिति विमानार्चनाकल्पे कथ्यते। तस्य भावः तत्त्वम्। तत् पदेन नारायणः गृह्यते। तेन नारायणस्य भगवतः अवगमनमेव ज्ञानभागस्य प्रमेयः। तत्र भगवतः स्वरूपं, श्रीः वैकुण्ठस्वरूपवर्णनं, जगत्सृष्टिः, शरीरस्वरूपं, मोक्षः एते विषयाः ज्ञानभागे प्रतिपाद्यन्ते, ते च यथा[2]-

भगवतः स्वरूपम्

परमात्मा निष्कलः सर्वव्यापी दृश्यः अदृश्यः अच्छः विमलः नित्यः अचिन्त्यः अप्रमेयः निर्गुणः निश्चलः निरवयवः निराद्यन्तः निर्विकल्पः निर्द्वन्द्वः निर्वचनः अतीन्द्रियः अनिर्देश्यः सद्रूपः असद्रूपः परन्धामः परंज्योतिः सर्वज्ञः सर्वशक्तिमयः सर्वाधारः सनातनः ज्ञातृज्ञेयज्ञानविहीनः ज्ञानघनः बहिर्प्रज्ञः प्रज्ञावस्थः जगत्सृष्टिस्थितिलयकर्ता आत्मनिष्ठः विष्णुः इति भगवतः स्वरुपं प्रतिपाद्यते।

श्रीः

श्रीः विष्णोर्विभूतिः। सा नित्या आद्यन्तरहिता अव्यक्तरूपिणी विष्णोः सङ्कल्पानुरूपा नित्यानन्दमयी मूलप्रकृतिरूपा शक्तिः।

वैकुण्ठस्वरूपवर्णनम्

हिरण्मयाण्डस्य कर्ता परमात्मा। तदन्तर्गतानां सर्वेषाम् अण्डानामुपरि सनातनं नित्यम् अचिन्त्यं देवैरपि अनभिलक्ष्यं नित्यसूरिभिरनुभूयमानं वैष्णवाण्डं वर्तते।

तत्रामोदः प्रमोदः संमोदः वैकुण्ठ इति एकैकस्योपरि विष्णुलोकाः चत्वारः भवन्ति। तेषाम् आमोदादीनां विष्णुलोकादीनां क्रमेण विष्णु-महाविष्णु-सदाविष्णु- नारायणः-अधिष्ठातारो भवन्ति।

हेममयप्राकारयुते चतुर्द्वारगोपुरतोरणसहस्रैः सहिते कनक कमल

---

1. अ.को.पृ.31 2. वि.पृ.491-510

कुसुमादिभिरलङ्कृते दिव्यलोके वैकुण्ठे सहस्रादित्य सङ्काशं सुवर्णमयं ब्रह्मादि देवर्षिभिः सेवितं दिव्यपरिजनैर्युतं द्वादशतलं विमानं वर्तते। अत्र भगवान् नारायणः स्वसङ्कल्पेन देवी भूषणायुधैस्सह विराजते। अयमेव वैकुण्ठः।

जगत्सृष्टिः

प्रलयकाले भोगपर्यङ्कशयितस्य विष्णोः नाभिकमलात् ब्रह्मा आविर्बभूव। स एव जगत्सर्वं सृजति इति तैत्तिरीयोपनिषदि[1] प्रतिपादितप्रकारेण जगत्सृष्टिः वर्ण्यते।

शरीरस्वरूपम्

श्रोत्रादिपञ्च ज्ञानेन्द्रियाणि वाक्पाणिपादादि पञ्चकर्मेन्द्रियाणि अन्तःकरण चतुष्टयम् अस्थि- चर्म- नाडी- रोम -मांसादीनि संयुक्तानि भूत्वा शरीरं भवेत्।

स्वाङ्गुलीभिः षण्णवत्यङ्गुलो देहः भवेत्, अस्मिन् देहे नाभौ द्वादशारचक्रं, नाभेः ऊर्ध्वे कुण्डलिनी शक्तिः हृदये अर्कमण्डलं नासाग्रे चन्द्रमण्डलं मूर्ध्नि विमुक्तिद्वारं, हृत्पद्मे च परमात्मा भवेत्।

मोक्षः

नित्यानन्दस्य अमृतपानवत् सर्वदा तृप्तिकरस्य परंज्योतिः जीवस्य प्रवेशनमेव मोक्षः।

---

1. 2, 1-2

योगभागः

जीवात्मनः परमात्मना योगः योगशब्देन व्यवह्रियते । अयं च योगः देहशुद्ध्यर्थं मुक्तिप्राप्त्यर्थं च उपयुज्यते । योगभागेऽस्मिन् योगाङ्गानि योगाधिकारिणः लक्षणम् आसनभेदाः प्राणायामप्रकारः प्रत्याहरस्वरूपं धारणविधिः ध्यानप्रकारः समाधिः इत्येते अंशाः विमानार्चनकल्पे[1] एव निर्दिश्यन्ते। ते च यथा -

योगाङ्गानि

यम - नियम - आसन - प्राणायाम- प्रत्याहार - ध्यान - धारण - समाधिः इत्येते अष्टौ योगस्याङ्गनि भवन्ति।

योगाधिकारिणः लक्षणम्

योगाङ्गेषु यमः दशधा भिद्यते । ते अहिंसा, सत्यम्, अचौर्यं, स्वदारनिरतिः, मैथुनत्यागः, दया, आर्जवं, क्षान्तिः धैर्यं, मिताशनं, शौचमिति।

योगाङ्गेषु प्रयुक्तः नियमः अपि दशधा भिद्यते । ते तपः, सन्तोषः, आस्तिक्यबुद्धिः दानं, विष्णुपूजा, वेदार्थश्रवणं, कुत्सितकर्मसु लज्जा, गुरूपदेशश्रद्धा, मन्त्राभ्यासः, होमः इति।

एतैः विंशतिगुणैर्युक्तः योगाधिकारी भवति।

आसनभेदाः

योगाङ्गेषु प्रयुक्तस्य आसनस्य भेदाः नवधा भिद्यन्ते। ते ब्राह्म - स्वस्तिक- पद्म - गौमुख-सिंह-मुक्त - वीर -भद्र- मयूराः इति।

आसनेष्वेषु ब्राह्म -स्वस्तिक- पद्मासनानि उत्तमानि भवन्ति। गोमुख-सिंह-मुक्तानि मध्यमानि स्युः। वीर-भद्र-मयूराणि अधमानि स्युः।

प्राणायामप्रकारः

प्राण -अपान - समानयोगः प्राणायामः भवेत्। अयं च प्राणायामः रेचक-पूरक-कुम्भक इति त्रिविधो भवेत्। निश्वासविसर्गः रेचकः। निश्वासोध्मानं पूरकः। निश्वासनिरोधनं कुम्भकः इति।

1. पृ.510-9

प्राणम् अपानेन संयोज्य देहमद्ये स्थितं पुरुषं दृष्ट्वा नासाग्रे च पश्यन् इडापिङ्गलानाडिषु वायुं च समारोप्य शनैः शनैः वायुं च विसर्जयेत्। अयमेव प्राणायामः।

प्रत्याहारस्वरूपम्

सर्वेभ्यः विषयेभ्यः इन्द्रियाणां निवर्तनं प्रत्याहारः। पादादिमूर्ध्निपर्यन्तं मर्मस्थानेषु वायुं च समारोप्य ऊर्ध्वतः अधस्ताच्च समाकर्षणं, नाडीमार्गेषु वायु समारोपणं निरोधनं चेति प्रत्याहारस्वरूपं कथ्यते।

धारणाविधिः

पृथिव्यादि महाभूतेषु पञ्चसु देवानां पञ्चस्वरूपाणि हृदये परमात्मानं च धारणं धारणाविधिः।

ध्यानप्रकारः

परमात्मनः चिन्तनं ध्यानम्। ध्यानञ्चेदं निष्कलं सकलं च द्विविधं भवेत्। तेषु निष्कलं देवैरपि अनभिलक्ष्यम् अदृश्यं च स्यात्।

सकलं ध्यानं तु निर्गुणं सगुणं चेति द्विधा भिद्यते। तत्र निर्गुणं निष्कल स्वभावः। परमात्मनो अन्यत् किञ्चित् नास्तीति केवलस्य परमात्मनः ध्यानं निर्गुणम्। ध्यानेऽस्मिन् सर्वजगत्कारणः नारायणः एव अवभासते। इदमेव निर्गुणध्यानमिति व्यपदिश्यते।

देवीभूषणायुधैस्सह सपरिषदः कल्याणगुणनिधेः ध्यानं सगुणध्यान मुच्यते।

अनयोः निर्गुणसगुणध्यानयोः सगुणं ध्यानम् उत्तमोत्तमं सर्वसिद्धिप्रदं चेति विमानार्चनाकल्पे कथ्यते।

समाधिः

जीवात्मनः परमात्मना सम्मावस्था समाधिर्भवेत्।

चतुर्थोऽध्यायः

उपसंहारः

तदित्थं वैखानसागमग्रन्थस्य मरीचिप्रोक्तस्य विमानार्चनाकल्पस्य समालोचनात्मके अस्मिन् शोधप्रबन्धे **प्रथमाध्याये** आगमशब्दार्थः शैवागमः पाञ्चरात्रागमः वैखानसागमः वैखानसागमस्य कर्ता वैखानसग्रन्थाः इत्येते विषयाः विवेचिताः।

द्वितीयाध्याये वैखानसागमविषयाणां ज्ञान-योग-क्रियांशानां सुस्पष्टमुपवर्ण्यमानस्य विमानार्चनाकल्पस्य स्वरूपं निरूपितम्।

समालोचनात्मकाध्ययनपरे **तृतीयाध्याये** विमानार्चनाकल्पस्य वैखानसग्रन्थान्तरैः क्रियाधिकार - खिलाधिकार- प्रकीर्णाधिकार -यज्ञाधिकार वासाधिकार - समूर्तार्चनाधिकरण - ज्ञानकाण्डैः संवाद विवादौ सनिदर्शनं सङ्कीर्तितौ। वैखानसागमानुसारिणि परार्थयजने अङ्गभूतानाम् आलयनिर्माण योग्यभूमेः संग्रहः आलयनिर्माणं बिम्बकल्पनं बिम्बप्रतिष्ठा अर्चनम् स्नपनम् उत्सवः प्रायश्चिमित्येते विषयाः तुलनात्मकसमीक्षणाय स्वीकृताः। तदेवं शोधप्रबन्धेऽस्मिन् विमानार्चनाकल्पस्य परिचयः विपश्चिद्भ्यः उपकल्पितः।

इत्थं मानवानां मोक्षसाधनोपायम् अर्चनामार्गं सुविशदं प्रतिपाद्यमानः वैखानसैः सश्रद्धम् आश्रियमाणश्चाऽयं विमानार्चानाकल्पः ग्रन्थान्तरसंवादिभिः विसंवादिभिश्च विचारैः मया विमृष्टः अयमं आस्तिकानां प्रमोदाय कल्पतामित्याशासे।

अनुबन्धः

परिवार देवताः मूर्ति मन्त्रयुताः।

विमानार्चनाकल्पः पृ.103-148

1. विष्णु
2. पुरुष
3. कपिल
4. सत्य
5. यज्ञ
6. अच्युत
7. नारायण
8. अनिरुद्ध
9. पुण्य
10. वराह
11. सुभद्र
12. नारसिंह
13. ईशितात्मन्
14. वामन
15. सर्वोद्वह
16. त्रिविक्रम
17. सर्वविद्येश्वर
18. शचीपति
19. अग्नि
20. यम
21. निर्ऋति
22. वरुण
23. वायु
24. कुबेर
25. ईशान्
26. श्री
27. भू
28. सर्व
29. हयात्मक
30. सुखावह
31. रामदेव
32. सुवह
33. पुण्य
34. मित्र
35. अत्रि
36. शिव
37. विश्व
38. सनातन
39. सनन्दन
40. सनत्कुमार
41. सनक
42. ब्रह्मन्
43. मार्कण्डेय
44. गङ्गाधर

45. पद्मापितृ
46. धातृ
47. विधातृ
48. भुवङ्ग
49. पतङ्ग
50. पतिर
51. वरुण
52. न्यक्ष
53. विवस्वान्
54. मित्र
55. क्षतृ
56. मणिक
57. सन्ध्या
58. विखनस
59. तापस
60. किष्किन्ध
61. तीर्थ
62. वक्रतुण्ड
63. नागराज
64. शङ्खनिधि
65. पद्मनिधि
66. तुहिण
67. बलिन्द
68. नन्दक
69. शार्ङ्ग
70. शङ्खचूलिन्
71. चक्रचूलिन्
72. चण्ड
73. प्रचण्ड
74. विष्वक्सेन
75. श्रीभूत
76. गरुड
77. सुदर्शन
78. पाञ्चजन्य
79. जय
80. महाभूत
81. पाकोर्जुन
82. आदित्य
83. चन्द्र
84. अङ्गारक
85. बुध
86. बृहस्पति
87. शुक्र
88. मन्द
89. राहु
90. केतु
91. गङ्गा
92. यमुना
93. नर्मदा
94. सिन्धु

95. दुर्गा
96. सिद्धि
97. ज्येष्ठा
98. धात्री
99. सुरा
100. सुन्दरी
101. स्वाहा
102. स्वधा
103. संह्लादिनी
104. राका
105. सिनीवाली
106. हविरक्षक
107. पुष्परक्षक
108. पुरुष
109. त्वष्ट्र
110. गदा
111. चामुण्ड
112. बलिरक्षक
113. गविष्ठ
114. हरिणी
115. तोय
116. अग्नि
117. वायु
118. ऋग्वेद
119. यजुर्वेद
120. सामवेद
121. अथर्ववेद
122. शिव
123. विष्णु
124. काश्यप
125. गुह
126. पङ्क्तीश
127. पवित्र
128. पावन
129. तक्षक
130. कुहू
131. हनुमति
132. ब्रह्मणी
133. सरित्प्रिया
134. वैशाखिनी
135. वैष्णवी
136. वाराही
137. इन्द्राणी
138. काली
139. जया
140. विजया
141. विन्दा
142. पुष्टिका
143. नन्दका
144. कुमुद्वती

145. उत्पलका
146. विशोका
147. कुण्ठिनी
148. ग्रन्थिनी
149. कृच्छ्रिणी
150. कुण्डिनी
151. विकारिणी
152. दद्रुणी
153. इन्द्रियविकारिणी
154. वत्सर
155. प्राणादिपञ्च
156. मरुत्
157. शतरुद्र
158. एकादशरुद्र
159. द्वादशादित्य
160. गन्धर्व
161. मुनि
162. अप्सरस्
163. अश्विन्
164. वसु
165. विद्याधर
166. तुम्बुर
167. नारद
168. ऋतु
169. प्रजापति
170. मुद्गल
171. हलेश
172. जाम्बव
173. असुर
174. किन्नरमिथुन
175. प्रह्लाद
176. मदन
177. वीपा
178. व्याजिनी
179. कामिनी
180. चन्द्राभा
181. सुन्दर
182. मत्स्य
183. कूर्म
184. वराह
185. नृसिंह
186. वामन
187. परशुराम
188. कमला
189. राघव
190. सीता
191. सौमित्रि
192. भरत
193. शत्रुघ्न
194. हनुमान्

195. शर
196. शार्ङ्ग
197. सुग्रीव
198. विभीषण
199. अङ्गद
200. बलभद्र
201. कृष्ण
202. रुक्मिणी
203. सत्यभामा
204. गोपाल
205. श्रीदामन्
206. सुन्दर
207. कल्किन्

परिवारदेवताः मूर्तिमन्त्रयुताः समूर्तार्चनाधिकरणम् अ.36

1. विष्णु
2. अनन्तशयन
3. श्रीदेवी
4. महीदेवी
5. ब्रह्मन्
6. शङ्कर
7. मार्कण्डेय
8. भृगु
9. धातृ
10. विधातृ
11. भुवङ्ग
12. पतङ्ग
13. पतिर
14. वरुण
15. मणिक
16. तापस
17. सन्ध्या
18. वैखानस
19. किष्किन्ध
20. तीर्थ
21. श्रीभूत
22. इन्द्र
23. अग्नि
24. यम
25. निर्ऋति
26. वरुण
27. वायु
28. कुबेर
29. ईशान
30. आदित्य
31. भौम
32. शनैश्चर
33. बृहस्पति
34. बुध
35. शुक्र
36. गङ्गा
37. चन्द्र
38. रुद्र
39. गुह
40. पुरुष
41. धात्री
42. ज्येष्ठा
43. दुर्गा
44. कुण्ठिनी
45. ग्रन्थिनी
46. कुच्छुणी

47. कुष्ठिनी
48. विकारिणी
49. दद्रुणी
50. इन्द्रियविकारिणी
51. अर्वती
52. मरीचि
53. पुलह
54. पुलस्त्य
55. क्रतु
56. वसिष्ठ
57. अत्रि
58. गविष्ठ
59. वायु
60. अग्नि
61. जल
62. पृथ्वी
63. श्री
64. सरस्वती
65. न्यक्ष
66. विवस्वान्
67. मित्र
68. क्षतृ
69. हविरक्षक
70. सर्वेश्वर
71. ब्राह्मणी
72. शर्वप्रिया
73. वैशाखिनी
74. विश्वगर्भा
75. वाराही
76. इन्द्राणी
77. काली
78. पुष्परक्षक
79. बलिरक्षक
80. विष्वक्सेन
81. गरुड
82. वक्रतुण्ड
83. नागराज
84. सुदर्शन
85. ध्वज
86. शङ्ख
87. महाभूत
88. विष्णुभूत

परिवारदेवताः मूर्तिमन्त्रयुताः
ज्ञानकाण्डः पृ 135-8

1. विष्णु
2. श्रीदेवी
3. मही
4. मार्कण्डेय
5. भृगु
6. ब्रह्मन्
7. शङ्कर
8. धातृ
9. विधातृ
10. भृति
11. पतङ्ग
12. पतिर
13. वरुण
14. मणिक
15. सन्ध्या
16. तापस
17. वैखानस
18. किष्किन्ध
19. तीर्थ
20. इन्द्र
21. अग्नि
22. यम
23. निर्ऋति
24. वरुण
25. वायु
26. कुबेर
27. ईशान
28. आदित्य
29. भौम
30. शनैश्चर
31. बृहस्पति
32. बुध
33. शुक्र
34. गङ्गा
35. चन्द्र
36. रुद्र
37. गुह
38. पुरुष
39. धात्री
40. ज्येष्ठा
41. दुर्गा
42. कुण्ठिनी
43. ग्रन्थिनी
44. कृच्छ्रुणी
45. कुण्ठिनी
46. विकारिणी

47. दद्रुणी
48. इन्द्रियविकारिणी
49. मरीचि
50. पुलह
51. पुलस्त्य
52. क्रतु
53. वसिष्ठ
54. अत्रि
55. आकाश
56. वायु
57. अग्नि
58. तोय
59. सरस्वती
60. न्यक्ष
61. विवस्वान्
62. मित्र
63. क्षतृ
64. हविरक्षक
65. सर्वेश्वर
66. ब्रह्मणी
67. सरित्प्रिया
68. वैशाखिनी
69. विश्वगर्भा
70. वाराही
71. इन्द्राणी
72. काली
73. पुष्परक्षक
74. बलिरक्षक
75. विष्वक्सेन
76. श्रीभूत
77. गरुड
78. वक्रतुण्ड
79. नागराज
80. सुदर्शन
81. ध्वज
82. शङ्ख
83. महाभूत
84. विष्णुभूत
85. अनन्तशयन
86. असि
87. गदा
88. धनुः

विमानार्चनाकल्पानुरोधेन ध्रुवबेरस्य स्थानकादिनिर्णयः



नवषट्पञ्चमूर्तीनां तरुणालयनिर्माणप्रकारः



उपयुक्तग्रन्थाः

अमरकोशः

सं.- वामनाचार्यः, के.सि. पब्लिषर्स् दिल्ली, 1990.

आनन्दसंहिता

वैखानसग्रन्थमाला, ईगावारिपालें 1925.

ऋग्वेदंसहिता

सं. वासुदेवशर्मा, निर्णयसागरप्रेस् -1930, मुम्बई.

क्रियाधिकारः

श्रीवेङ्कटेश्वर प्राच्य ग्रन्थमाला, तिरुपतिः, 1953.

खिलाधिकारः

सं. रो.भ. पार्थसारथि भट्टाचार्यः, तिरुमल तिरुपति देवस्थानम्, तिरुपतिः 1961.

ज्ञानकाण्डः

सं. रो.भ. पार्थसारथि भट्टाचार्यः, ति.ति.दे., तिरुपतिः -1960.

तन्त्रसङ्ग्रहः

सं. बदरीनाथशुक्लः, वाराणसीय संस्कृतविश्वविद्यालयः, वाराणसी 1970.

तैत्तिरीयब्राह्मणम्

सं. आर्. श्यामशास्त्री, Vol - II मोतीलाल् बनारसी दास्, दिल्ली. 1985.

तैत्तिरीयसंहिता

सं. श्रीपाद दामोदर, सातवलेकर स्वाध्यायमण्डल्, पारी शक 2014.

तैत्तिरीयारण्यकम्

सं. वे.शा.रा.रा. बाबाशास्त्रीफडके आनन्दाश्रममुद्रणालयं पुण्यपत्तनम्, 1926, 27.

तैत्तिरीयोपनिषत्

वाविल्लरामस्वामिशास्त्रुलु अण्ड् सन्स् मद्रास्, 1928.

दर्शनोदयः

लक्ष्मीपुरं श्रीनिवासाचार्यः, राजकीयशाखा मुद्रणालयं, मैसूर्-1933.

पारमात्मिकोपनिषत्

सं. दीवि वेङ्कटनरसिंहाचार्यः, श्रीवैखानस, भगवच्छास्त्र ग्रन्थामाला नल्लूर 1948.

प्रकीर्णाधिकारः

श्रीवैखानसविद्यानिलयः, श्रीशैलनाथुलु अण्ड् सन्स्, मद्रास् 1929.

प्रतिष्ठानुक्रमणिका

सं. दीवि वेङ्कट नरसिंहाचार्यः श्रीवैखानसभगवच्छास्त्रग्रन्थमाला, नल्लूर् 1979

पौष्करसंहिता

सं. यदुगिरि यतिराज संपत्कुमाररामानुजमुनिः, बेङ्गलूर् 1934.

ब्रह्मोत्सवानुक्रमणिका

सं. दीविवेङ्कट नरसिंहाचार्यः श्रीवैखानसभगवच्छास्त्रग्रन्थमाला, नल्लूर् 1978.

भगवदर्चाप्रकरणम्

श्रीवेङ्कटेश्वर स्वामि देवस्थानम्, द्वारकातिरुमल, 1982.

भगवदाराधनचन्द्रिका

सं. दीवि कृष्णस्वामि अय्यङ्गार्, श्रीवैखानसभगवच्छास्त्रग्रन्थमाला, नल्लूर् 1987.

भार्गवतन्त्रम्

सं. डा. राघवप्रसादचैधरी, गङ्गानाथझा केन्द्रियसंस्कृतविद्यापीठम् इलाहाबाद, 1981.

…, श्रीवैखानस
…डालेः तिरुपतिः
…1967

उपयुक्तग्र…

श्रीवैखानसागमः	श्रीरं… अय्यङ्गार-आर्	Sri Venakateswara University Oriental Journal, Tirupati-1958
…खानसाराधनं वैदिकम्	श्रीपार्थसारथि भट्टाचार्यः	Sri Venkateswara University Oriental, Journal Tirupati, 1959
विष्वक्सेनविषये श्रीपाञ्चरात्र वैखानसयोः मतभेदः	श्रीरघुनाथाचार्यः डा.एस्.बि.	Journal of the Ganganath Jha Kendriya Sanskrit Vidyapeeta, Allahabad, 1973
वैखानस साहित्यस्य सूची क्रमः	श्रीराघवप्रसाद	विमर्शः केन्द्रिय संस्कृत विद्यापीठं, तिरुपतिः 1972
वैखानसागम परिचयः		विश्वसंस्कृतम्, होशिआर् पुरम्, 1972-73
वैखानससम्प्रदायस्य प्राचीनत्वम्		विश्वसंस्कृतम्, होशिआर् पुरम्, 1972-73
मूर्तिपूजा वैखानस आगमश्च	श्री…चार्यः प्रो. एन्. एस्.	The Sanskrit Academy Diamond Jublee Commemoration Vol- Madras -1990
अर्चनाविवेकः	श्रीलक्ष्मीनरसिंहभट्टः	विमर्शः केन्द्रियसंस्कृतविद्यापीठं तिरुपतिः1972
वैखानसागमः	"	संस्कृतविमर्शः, राष्ट्रियसंस्कृतसंस्थानम्, नईदिल्ली, 1983

Printed at Annapurna Graphics, Tirupati Ph. 2235006